Copyright ©
by Csaba Dezső 2004

तद् ब्रह्म वः क्रमविनश्यदनाद्यविद्य-
मुद्द्योततां स्फुरदमन्दनवाभिनन्दम्।
संवित्पदे ऽवतरणोन्मुख एव यत्र
शाम्यन्ति कान्तविषयान्तरभोगवाञ्छाः॥ १॥

॥ नान्द्यन्ते सूत्रधारः॥

अहो अहो नटत्वं नाम जघन्यः को ऽपि सतताभ्यस्तसूत्कटकपटव्यापारडम्बरः कुटुम्बभरणोपायः।

हरो विष्णुर्ब्रह्मा मुनिरवनिपः पामरपशु-
र्विटो भीरुः शूरः प्रमुदितमतिर्दुःखित इति।
स्पृशन् सर्वाकारान् विहरति जने निस्त्रपतया
नटो वस्तुस्थित्या जठरभरणे शिल्पशरणः॥ २॥

तद् वरमिमं कुशिल्पमल्पफलमलघुक्लेशमतित्रपाकरमुपसंहृत्य क्वचिदाश्रमे किमपि गुरुकुलमुपासीनः सकलदुःखोपरमं परमं पुरुषार्थमभिगन्तुं यतिष्ये।

॥ विमृश्य॥

तत् क्वेमं कृपणकं कृपापात्रप्रायं कुटुम्बभरमर्पयित्वा गम्यताम्?

॥ अग्रतो ऽवलोक्य॥

भवतु, अमुष्य तावदाशयं विज्ञास्ये।

॥ प्रविश्य पारिपार्श्वकः सूत्रधारमवलोक्य॥

किमयमद्य निर्वेदपरिम्लानवदन इव दृश्यते? पृच्छाम्येनम्।

॥ उपसृत्य॥

भाव, किमिदं विषण्णवदनमास्यते? ननु क्वचन विनियुक्तो ऽसि वृत्तिकारशिष्यैः?

॥ सूत्र॰ पूर्वोक्तं यतिष्य इत्यन्तं पठति॥

॥ पारि॰॥

---

**2** ॰मुद्द्योततां ] em. RT, ॰दुद्योततां PāPu^pc, ॰दुद्योत॰ Pu^ac **3** संवित्पदे ऽव॰ ] conj. Dezső–Isaacson, संवित्परे ऽर्ध॰ RT (conj. ?), संचित्यरार्द्ध॰ Pā, संचिंत्यरार्द्ध॰ Pu **5** नान्द्यन्ते ] PuRT, नाद्यंते Pā **6** अहो अहो नटत्वं नाम ] Pā^pcPu, अहो अदो नटत्वं नाम RT(misreading Pu?), अहोनामटत्वं नाम Pā^ac **6** ॰सूत्कट॰ ] em. RT, ॰मुत्तर॰ PāPu **7** ॰डम्बरः कुटुम्ब॰ ] em. RT, ॰डंबरकुटुंब॰ PāPu **8** विष्णुर्ब्र॰ ] PuRT, विष्णुव्र॰ Pā **9** भीरुः ] PuRT, भीरु Pā **9** शूरः ] PāRT, सूरः Pu **9** ॰मतिर्दु॰ ] PuRT, ॰मतिदु॰ Pā **10** सर्वाकारान्वि॰ ] PuRT, सर्वाकारावि॰Pā **10** जने ] conj. Isaacson, जनो PāPuRT **12** ॰पसंहृत्य ] PāRT, ॰पसं[[ ]]हृत्यं Pu **12** क्वचिदा॰ ] em. RT, क्वदाचिदा॰ Pā, कदाचिदा॰ Pu **15** तत्क्वेमं ] em. RT, तत्क्षेमं PāPu **21** विनियुक्तो ] em., विनिर्युक्तो PāPuRT

अलमस्थाने निर्वेदेन। को नु खलु देवेषु मनुष्येषु तिर्यक्षु वा कपटचर्यामुत्तीर्य परमार्थे पर्यवसितः? सर्व एवायं ब्रह्मादिस्तिर्यक्पर्यन्तो जन्तुग्रामः संसारे माययैव परिवर्तते। भवतः किमधिकं जातम्?

मायाविडम्ब्यमानस्य विश्वस्य जगतो यथा।
व्यवहारो न सत्यार्थस्तथास्माकं भविष्यति॥ ३॥

॥ सूत्र॰ ॥

मारिष, यथाह भवान्। किं त्वयमीदृशो ऽप्यशक्यनिर्वाह आस्माकीनो व्यवहारः।

॥ पारि॰ ॥

भाव, कथमिव?

॥ सूत्र॰ ॥

मारिष, भरतमुनिनोपदिष्टे दशरूपकप्रयोगे किल कृतश्रमा वयम्। अद्य चात्रभवतः शैशव एव व्याकरणविवरणकरणाद् वृत्तिकार इति प्रथितापरनाम्नो भट्टजयन्तस्य शिष्यपरिषदाहमाज्ञप्तो यथास्मद्गुरोः कृतिरभिनवमागमडम्बरं नाम किमपि रूपकं प्रयोक्तव्यमिति। तदिदमलौकिकमशास्त्रीयमप्रयुक्तपूर्वं कथं प्रयुञ्ज्महे? तदस्याः कुजीविकाया उपेक्षणमेव श्रेयः।

॥ पारि॰ ॥

भाव, मैवम्। अनतिक्रमणीयशासनाः खल्वत्रभवन्तो वृत्तिकारस्य शिष्याः। यत् पुनरशास्त्रीयमिति शङ्कसे, तत्र कः प्रयोक्तुरपराधः?

काव्यं करोति स कविर्भरतोपदेश-
मुल्लङ्घ्य, तस्य च तथा प्रथयन्ति शिष्याः।
सामाजिकास्तव त एव, भवान् प्रयुङ्क्तां
पार्श्वस्थितः परिवदिष्यति किं जनो ऽन्यः॥ ४॥

---

37 Cf. *Kādambarīkathāsāra* 1.11ab: वृत्तिकार इति व्यक्तं द्वितीयं नाम बिभ्रतः।; NM II 718.6: अन्वर्थो नववृत्तिकार इति यं शंसन्ति नाम्ना बुधाः।

---

**26 f.** ॰मार्थे…जातम् ] om. Pu **26 f.** संसारे माययैव ] Pā, संसारमाययैव RT (em. ?) **28** ॰डम्ब्य॰ ] PuRT, ॰डंव्य॰ Pā **29** भविष्यति ] em. RT, भविष्यते PāPu **31** भवान् ] em. RT, भगवान् PāPu **31** ॰मीदृशो ऽप्य॰ ] PāRT, ॰मीदशो[[ ]] Pu$^{ac}$, ॰मीदशोप्य Pu$^{pc}$ **31** ॰शक्य॰ ] Pā$^{pc}$PuRT, ॰श[[ ]]य॰ Pā$^{ac}$ **31** ॰ह आस्माकीनो ] RT$^{pc}$, ॰हो अस्माकीनो PāPu, ॰हो ऽस्माकीनो RT$^{ac}$ **36** अद्य ] Pā$^{pc}$PuRT, अ[[ ]] Pā$^{ac}$ **37** विवरणकरणाद् वृ॰ ] PāPu$^{pc}$RT, विवरणाद् वृ॰ Pu$^{ac}$ **40** कुजीविकाया ] em., कुजीवितिकाया PāPu, कुवृत्तिकाया em. RT **42** मैवम् ] em. RT, मेवं PāPu **46** सामाजिकास्त॰ ] PuRT, समाजिकास्त॰ Pā **46** प्रयुङ्क्तां ] em. RT, प्रयुक्तं PāPu

॥ सूत्र॰ ॥

कृतं जनापवादेन।

॥ पारि॰ ॥

तत्किं राजभयमाशङ्कसे?

॥ सूत्र॰ सस्मितम्॥

तदपि नास्ति।

॥ पारि॰ ॥

तत्किं विलम्बसे? ननु नियुज्यन्तां तासु तासु सौगतार्हतादिभूमिकासु कुशीलवाः।

॥ सूत्र॰ ॥

मारिष, न शक्नोम्येव दुर्वहमिदमुद्वोढुमिन्द्रजालमायाप्रायं नटवृत्तम्।

अशास्त्रकं वास्तु तदन्वितं वा
काव्यं, जनः कुप्यतु रज्यतां वा।
अहं तु निर्विण्णमनाः स्ववृत्ति-
मुत्सृज्य तीर्थानि चिनोमि तावत्॥ ५॥

भवान्पुनः कृपणकमस्मत्कुटुम्बकं वा संवाहयतु, मामेव वानुगच्छतु। मया त्विदानीमेवास्मिन्महति विहारे वीतरागभिक्षुशतपरिगृहीते नातिदूरनिर्वाणमार्गदेशिनि तत्त्वबुभुत्सुना प्रवेष्टव्यम्।

॥ इति निष्क्रान्तौ॥

॥ प्रस्तावना॥

---

**58** दुर्वहमि॰ ] RT (em. ?), दुर्वहमहमि॰ PāPu **60** रज्य॰ ] PuPā$^{pc}$RT, रत्य॰ Pā$^{ac}$ **61** तु ] PāRT, नु Pu **61** निर्विण्ण॰ ] PāRT, निर्विण॰ Pu **63** वानु॰ ] RT (em. ?), चानु॰ PāPu **64** नातिदूर॰ ] conj. Isaacson, नातिदूरे PāPuRT

॥ ततः प्रविशत्यासनस्थो रक्तपटसंवीतः शाक्यभिक्षुरुपासकश्चाग्रतः ॥

॥ भिक्षुः, सवैराग्यम् ॥

अनादौ संसारे स्थितमिदमहो मूढमनसां
जनित्वा जन्तूनां मरणमथ मृत्वापि जननम् ।
इयं सा दुःखानां सरणिरिति संचिन्त्य कृतिना
निधातव्यं चेतो जननमरणोच्छेदिनि पदे ॥ १ ॥

॥ उपा० ॥

भो भदंत, किं खु एदं जणणमरणववहारबाहिरं ठाणं? केण वा उवाएण एदं पावीयदि?

॥ भिक्षुः ॥

धीमन्, यदि शुश्रूषुरसि तदिह चतुरार्यसत्यपरिज्ञाने यत्नमाधेहि ।

॥ उपा० ॥

भो भदंत, काइं उण ताइं चत्तारि अज्जसच्चाइं?

॥ भिक्षुः ॥

धीमन्, दुःखं समुदयो निरोधो मार्ग इति चत्वार्यार्यसत्यानि ।

॥ उपा० ॥

भो भदंत, इत्तियमेत्तेण ण मे पवोहो उप्पण्णो । सवित्थरेण उवदिसदु भवं ।

॥ भिक्षुः ॥

आयुष्मन्, बोध्यसे—

स्वसंवेद्यं तावत् सुखविसदृशं दुःखमखिलं
यतस्तस्योद्भूतिः स तु समुदयो मोहमहिमा ।
निरोधो निर्वाणं सकलपरितापव्युपरम

8 f. भो भदन्त, किं खल्वेतज् जननमरणव्यवहारबाह्यं स्थानम्? केन वोपायेनैतत् प्राप्यते? 13 भो भदन्त, कानि पुनस्तानि चत्वार्यार्यसत्यानि? 17 भो भदन्त, इयन्मात्रेण न मे प्रबोध उत्पन्नः । सविस्तरेणोपदिशतु भवान् ।

3 ff. = NM II 424.9–12.

**5 कृतिना** ] PāPuNM, कृतिभिर् RT (em. ?) **6 जननमरणोच्छेदिनि** ] RT (em. ?) NM, जननमरणच्छेदिनि PāPu **8 जणण°** ] RT (em. ?), जनन° PāPu **8 वा** ] PuRT, चा Pā **8 उवाएण** ] PāRT, उवाणण Pu **11 शुश्रूषुर°** ] PāRT, शुश्रुषुर° Pu **11 चतुरा°** ] PāRT, वतुरा° Pu **13 काइं** ] conj., किं PāPuRT **13 ताइं** ] conj., ते PāPuRT **13 चत्तारि** ] PāPuRT$^{pc}$, चत्वारि RT$^{ac}$ **13 अज्जसच्चाइं** ] conj., अज्ज*सच्चा PāPu, अय्यसच्चा RT (em. ?) **15 दुःखं** ] PāPu$^{pc}$RT, ज्ज (?) खं Pu$^{ac}$ **15 समुदयो** ] em. RT, समुदायो PāPu **15 चत्वार्यार्यसत्यानि** ] em. RT, चत्वार्यसत्यानि PāPu **17 °मेत्तेण ण** ] em. RT, °मेत्तेण PāPu **17 उप्पण्णो** ] PāRT, उप्पणो Pu **22 °व्युपरम** ] RT (em. ?), °व्युपरमः PāPu

उपायस्तत्प्राप्तौ कुशलमतिभिर्मार्ग उदितः ॥ २ ॥

⟨॥ उपा॰ ॥⟩

भो भदंत, केण दाणि उवाएण अप्पा णं दीहरपबंधपउत्तं मोत्तूण दुत्तरं दुक्खगहणं णिव्वाणे णिवसदि?

॥ भिक्षुः ॥

साधो, न साधु बुध्यसे। न खल्वात्मा नाम कश्चिद् यो दुःखसङ्कटमुत्तीर्य निर्वाणमधिगच्छति। ननु,

संसारकारागारस्य दारुणायासकारिणः।
अयमेव दृढः स्तम्भो यः स्थिरात्मग्रहो नृणाम् ॥ ३ ॥

तथा हि,

अयमहमिति पश्यतो हि जन्तो-
र्भवति ममेदमिति ध्रुवं प्रतीतिः।
अहमिति च ममेति चावगच्छन्
न हि विजहाति जडाशयः कुतृष्णाम् ॥ ४ ॥

अविप्रलुप्ततृष्णस्य दूरे वैराग्यभावना।
अनभ्यस्ते च वैराग्ये संसारतरणं कुतः? ॥ ५ ॥

॥ उपा॰ ॥

भो भदंत, जदा दाव णत्थि य्येव को वि अप्पा, को दाणि संसारदुक्खं अणुभवदि? को वा एदं उत्तरिअ णिव्वाणागारअं पडिवज्जदि?

॥ भिक्षुः, सस्मितम् ॥

---

25 f. भो भदन्त, केनेदानीमुपायेनात्मैतद् दीर्घप्रबन्धप्रवृत्तं मुक्त्वा दुस्तरं दुःखगहनं निर्वाणे निवसति? 40 f. भो भदन्त, यदा तावन् नास्त्येव को ऽप्यात्मा, क इदानीं संसारदुःखमनुभवति? को वा एतदुत्तीर्य निर्वाणागारकं प्रतिपद्यते?

---

30 ff. NM II 298.5–10 (*bauddhapakṣa*): तस्मादुत्सृज्यतामेष मूर्धाभिषिक्तः प्रथमो मोह आत्मग्रहो नाम। तन्निवृत्त्या चात्मीयग्रहो ऽपि विरंस्यति, ‘अहमेव न, किं मम’ इति। तदिदमहंकारममकारग्रन्थिप्रहाणेन नैरात्म्यदर्शनमेव निर्वाणद्वारमवलम्ब्यताम्। तस्य च मार्गः क्षणिकपदार्थनिश्चयः। क्षणिकेषु हि सर्वभावेषु निराश्रयेषु ज्ञानस्याप्याश्रयविरहात् कुतस्त्यमात्मकल्पनमिति।

---

**24** ⟨उपा॰⟩ ] em. RT, om. PāPu **26** दुक्ख॰ ] em., दुःक्ख॰ Pā, दुःख॰ PuRT **26** णिव्वाणे ] RT (em. ?), णित्वाणे PāPu **30** ॰रका॰ ] $Pā^{pc}$PuRT, ॰राका॰ $Pā^{ac}$ **31** ॰ग्रहो ] em. RT, ॰गृहो PāPu **31** नृणाम् ] $RT^{pc}$PāPu, नॄणाम् $RT^{ac}$ **36** विजहाति ] em. RT, विजहति PāPu **36** जडाशयः ] RT (em. ?), जडासयः PāPu **38** वैराग्ये ] $Pā^{pc}$PuRT, वैराग्यै $Pā^{ac}$ **40** णत्थि ] PāPu$RT^{pc}$, नत्थि $RT^{ac}$ **41** ॰दुक्खं अणु॰ ] em., ॰दुक्खमणु॰ em. RT, ॰दुःखम॰ PāPu **41** णिव्वाणागारअं ] em. Isaacson, णिव्वाणागारए em. $RT^{pc}$, णिव्वाणागायए PāPu, निव्वाणागारए $RT^{ac}$ **42** भिक्षुः ] PāRT, भिक्षूः Pu

वत्स, निरोधो निर्वाणमपवर्गः समाप्तिरिति नित्ये ऽपि सत्यात्मनि सुतरामघटमानम्। न हि नित्यस्य निरोध उपपद्यते। तस्माद् विज्ञानमात्रमेवेदं हर्षविषादाद्यनेकरूपरूषितमनादिप्रबन्धप्रवृत्तविचित्रवासनानुसारसमासादिततविततकारभेदममुना नैरात्म्यादिभावनामार्गेण व्यपनीतविविधोपाधिपटलोपहितनानाकारकालुष्यममलसंविन्मात्रनिष्ठमवतिष्ठतां वा सन्तानात्मना, सन्ततिरेव वा विच्छिद्यतामित्ययमेव निर्वाणमार्गो नेदीयान्।

॥ उपा॰ ॥

भो भदंत, जदि णत्थि थिरो अप्पा परलोए कस्स कम्मभोओ? इण्हिं पि कस्स सुमरणणिबंधणा होंति ववहारा?

॥ भिक्षुः ॥

कुशलं बोध्यसे।

अर्थक्रियासाधनतां न नित्याः
क्रमाक्रमाभ्यामुपयान्ति भावाः।
नार्थक्रियां काञ्चिदसाधयन्तो
भवन्ति चैते परमार्थसन्तः॥ ६॥

एवं हि वदन्ति नीतिविदः—

50 f. भो भदन्त, यदि नास्ति स्थिर आत्मा परलोके कस्य कर्मभोगः? इदानीमपि कस्य स्मरणनिबन्धना भवन्ति व्यवहाराः?

44 ff. NM I 196.1–2: अत एवेदमपि न वचनीयम्—'एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्तं पश्यामः, तत्र यथेष्टं संज्ञाः क्रियन्ताम्' (PVin I p. 70.9–11) इति।; also NM II 493.10–13 (*bauddhapakṣa*): द्वितीयस्याभावात् स्वच्छत्वाद् ज्ञानस्य कालुष्यमन्यकृतं युक्तमिति चेत्, अविद्यावासनाकृतं तद्भविष्यति। स्वतः स्वच्छमपि ज्ञानमनाद्यविद्यावासनाविभवोपनतमनेकाकारकालुष्यरूषितवपुरिव प्रकाशते। 48 NM II 439.3–4: निर्वाणादिपदाख्येयमपवर्गं तु सौगताः। सन्तत्युच्छेदमिच्छन्ति स्वच्छां वा ज्ञानसन्ततिम्॥ 50 f. NM II 296.11–16: निराश्रयेषु विज्ञानस्कन्धेषु क्षणभङ्गिषु। कथं स्मृत्यादिकार्यं वा परलोको ऽपि वा कथम्॥ सत्यपि परलोके कथमकृताभ्यागमकृतविप्रणाशौ पराक्रियेते? येन हि ज्ञानेन चैत्यवन्दनादि कर्म कृतं, तस्य विनाशान्न तत्फलोपभोगः। यस्य च फलोपभोगस्तेन न तत्कर्म कृतमिति—नैष दोषः, कार्यकारणभावस्य नियामकत्वात्। 54 ff. NM II 300.1–4 (*bauddhapakṣa*): भावानां हि सत्त्वं क्रमयौगपद्याभ्यां व्याप्तम्। नित्येषु च पदार्थेषु व्यापकानुपलम्भनात् (i. e. क्रमयौगपद्यानुपलम्भात्)। तद्व्याप्तमपि सत्त्वं हि बलात् तेभ्यो निवर्तते॥

**45** °रूषितम° ] em. Sanderson, °रूपितम° PāPuRT **47** °मवतिष्ठतां ] em. Isaacson, °मपतिष्टतां PāPu$^{pc}$, °तां Pu$^{ac}$, °मुपतिष्ठतां em. RT **50** णत्थि ] PāPuRT$^{pc}$, नत्थि RT$^{ac}$ **50** कस्स ] PāPuRT$^{pc}$, कस्य RT$^{ac}$ **51** कस्स ] PāPu, कस्य RT **51** °णिबंधणा ] PāPuRT$^{pc}$, निबंधना RT$^{ac}$ **54** नित्याः ] PāRT, नित्या Pu **55** क्रमाक्र° ] Pā$^{pc}$RT, क्रामाक्र° Pā$^{ac}$ (?), क्रमोक्र° Pu **57** °सन्तः ] em. RT, °मन्तः PāPu

यदेवार्थक्रियाकारि तदेव परमार्थसत्।

इति। अपि च,

नायं कुम्भो नश्वरात्मान्यथा वा
हेतोर्नाशं मुद्गरादेरुपैति।
व्यर्थो वा स्यादक्षमो वा स हेतुः
कल्पे ऽप्यस्यानागमाद्वा न नश्येत्॥ ७॥
तेनात्मलाभसमनन्तरमेव भावा
नश्यन्ति भान्ति तु तथा समसन्ततित्वात्।
सन्तानवृत्तिमवलम्ब्य च कर्तृभोक्तृ-
स्मृत्यादिकार्यघटनापि न दुःसमर्था॥ ८॥

॥ उपा॰ ॥

जदि सअलो खणभंगुरो भावसत्थो, णत्थि य्येव एदस्स बिइए खणे अवत्थि-

---

70 ff. यदि सकलः क्षणभङ्गुरो भावसार्थः, नास्त्येवैतस्य द्वितीये क्षणे ऽवस्थितिः, तत् कथमेष विज्ञानेन विषयीकर्तुं पार्यते? अर्थः खलु विज्ञानेन सहानु वा तेन प्रकाश्यते, विज्ञानं वा जनयन्नपि नो नियन्त्रणमाकारं वा अप्राप्तेन तेन विषयीक्रियते। अन्यथेदं प्रत्यक्षं क्षणभाविनो दुर्लभम्।

---

59 NM II 299.3–4 (*bauddhapakṣa*): सत्त्वं तावदर्थक्रियाकारित्वमुच्यते। यथोक्तम्—‘अर्थक्रियासमर्थं यत् तदेव परमार्थसत्’ इति। (cf. PV (Pandey) 2.3ab: अर्थक्रियासमर्थं यत् तदत्र परमार्थसत्।) 61 ff. NM II 306.3–13 (*bauddhapakṣa*): अतश्च क्षणभङ्गिनो भावाः प्रलयं प्रति हेत्वनपेक्षत्वात्। भावो हि स्वतो नश्वरात्मा भवेत्, तद्विपरीतो वा। विनश्वरस्वभावे ऽस्मिन् कृतं प्रलयहेतुभिः। अनश्वरस्वभावे हि कृतं प्रलयहेतुभिः॥ क्व तर्हि मुद्गरादीनां व्यापारः? विजातीयसन्ततिजन्मनीति ब्रूमः। अभावस्तु तज्जन्यो (i.e. मुद्गरादिजन्यो) न संभवत्येव प्रमाणविरुद्धत्वात्। भावो हि स्वरूपेण न भवति न त्वभावो ऽप्यस्य भवतीति। स्वरूपं तु तस्य (i.e. अभावस्य) भवनात्मकं चेत्, सर्वदैव भवेदेव न न भवेत्। अभवनात्मकं तु तदेव न भवेत्, परापेक्षाया अभावात्। न हि मुद्गरादिकारणान्तरसापेक्षः कुम्भादेर्विनाशो भवितुमर्हति, उत्पत्ताविव नाशे ऽपि समर्थासमर्थभिन्नाभिन्नोपकारकारिसहकार्यादिविकल्पकलापानपायात्।; also NM II 307.1–7 (*bauddhapakṣa*): अपि च यदापि तेन नष्टव्यं तदाप्यस्य न स्वरूपादतिरिक्तः कश्चन विनाशहेतुरवतरति। तच्च स्वरूपमाद्ये ऽपि क्षणे तस्य तादृशमेवेति तदैव वा नश्येत्, न कदाचिद्वा। अपमृत्योरपक्रान्तः तस्य चेत् प्रथमः क्षणः। अविनाशिस्वभावत्वादास्तां युगशतान्यपि॥ न चैवमभ्युपगम्यते। तस्मादात्मलाभाविनाभावी भावानां विनाश इति सिद्धः क्षणभङ्गः। 67 f. NM II.296.15–197.3 (*bauddhapakṣa*): नैष दोषः, कार्यकारणभावस्य नियामकत्वात्। अनादिप्रबन्धप्रवृत्तो हि ज्ञानानां हेतुफलभावप्रवाहः। एष एव च सन्तान इत्युच्यते। तत्कृतश्चायं अनुसन्धानादिकार्यनियमः। सन्तानानादित्वात् तदविच्छेदाच्च परलोको ऽपि न क्लिष्टकल्पनः।

---

**62** हेतोर्नाशं ] em. RT$^{pc}$, हेतोनाशं PāPu, तोर्नाशं RT$^{ac}$ **62** ॰रुपैति ] PāPuRT$^{pc}$, ॰रु ⊔ ति RT$^{ac}$ **63** वा ] PuRT, चा Pā **63** ॰दक्षमो ] PāRT, ॰दृक्षमा Pu **65** ॰व भा॰ ] Pā$^{pc}$PuRT, ॰वाभा॰ Pā$^{ac}$ **66** सम॰ ] em. RT, मस॰ PāPu **68** ॰नापि ] em. (also Pā$^{pc}$?), ॰नादि Pā(ac?) PuRT **68** दुःसमर्था ] PāPu, दुःसमर्थम् em. RT **70** णत्थि ] PāPuRT$^{pc}$, नत्थि RT$^{ac}$

दी, ता कहं एसो विण्णाणेण विसईकादुं पारीअदि? अत्थो खु विण्णाणेण सह अणु वा तेण पकासिज्जदे, विण्णाणं वा जणेंतो वि णो णिअंतणं आआरं वा अप्पत्तेण तेण विसईकरीअदि। अण्णहा एदं पच्चक्खं खणभाइणो दुल्लहं।

॥ भिक्षुः॥

आयुष्मन्, यदि स्फुटं पश्यसि तदर्थो ऽपि नाम न कश्चिद् विज्ञानस्य यो विषयभावमुपयाति। ज्ञानमेवेदं नीलपीताद्याकारखचितमवभाति। कुतः?

आकारद्वितयाश्रितं न युगपज्ज्ञानार्थयोर्वेदनं
लोके ऽर्थश्च जडः प्रकाशवपुषा ज्ञानेन चेद् गृह्यते।
स्यादादौ ग्रहणं प्रदीपवदनाकारं च नो गृह्यते
ज्ञानं तेन तदेव भाति विविधाकारं कुतो ऽर्थो ऽपरः? ॥ ९ ॥

तस्मात् सर्वं शून्यं सर्वं क्षणिकं निरात्मकं सर्वम्।

---

77 NM II 488.4–13 (*bauddhapakṣa*): उच्यते—इदं तावत् परीक्ष्यताम्, यदेतत् प्रत्यक्षविज्ञानं 'नीलमिदं पीतमिदम्' इत्युत्पद्यते, तत्र किमेक आकारः प्रकाशते उत द्वितयमिति। यदि द्वितयमवभाति, 'अयमर्थो नीलम्, इदं तज्ज्ञानम्' इति, तत् किमत्र विचार्यते? जितं भवद्भिः। जितस्य यदापद्यते, तदस्मासु विधीयताम्। अथ एक एवायमाकारः प्रथते, तर्ह्यस्ति विचारावसरः। कस्यायमाकारः? किमर्थस्य किं ज्ञानस्येति? स चैवं विचार्यमाण आकारः यद्यर्थस्येति तद् भवन्तो जेष्यन्ति। ज्ञानाकारपक्षे तु वयं जेष्याम इति।; also NM II 492.15–493.3 (*bauddhapakṣa*): आकारद्वयप्रतिभासो हि नास्तीत्युक्तम्। अभ्युपगमे वा सुदुस्तरमनवस्थादूषणम्। अर्थाकारश्च प्रत्यक्षः तत्कृतश्च ज्ञानाकारः प्रत्यक्ष इत्युच्यमाने ऽर्थाकारस्तावत् साकारेण ज्ञानेन गृहीतः। स इदानीं ज्ञानाकारो ऽपि ग्राह्यत्वात् साकारज्ञानान्तरं भवेत्। तदपि साकारं ज्ञानान्तरं तथाभूतज्ञानान्तरग्राह्यमेव स्यादित्यनिष्टम्। 78 f. NM II 489.12–17 (*bauddhapakṣa*): अतश्च ज्ञानस्यायमाकारः। ज्ञानं हि प्रकाशकमप्रकाशस्यार्थस्य भवद्भिरभ्युपगम्यते। ततश्चार्थात् प्रथमतरमस्य ग्रहणेन भवितव्यम्, अगृहीतस्य दीपादेः प्रकाशस्य प्रकाशकत्वादर्शनात्। उत्पन्नेष्वपि च घटादिष्वर्थेषु प्रकाशवैकल्याद् वा प्रतिबन्धवैधुर्याद् वा भवत्यग्रहणम्। ज्ञानस्य तूत्पन्नस्य सतो न किंचिद् ग्रहणे प्रतिबन्धकम् (: em. Isaacson, ed.: प्रतिबन्धकः)। न च प्रकाशकान्तरापेक्षणं स्वत एव दीपवत् प्रकाशस्वभावत्वात्। 79 f. NM II 490.15–17 (*bauddhapakṣa*): ज्ञानं च गृह्यमाणमाकाररहितं ग्रहीतुमशक्यमिति बलात् साकारमेव तद् ग्रहीतव्यम्। साकारे च ज्ञाने गृहीते सति द्वितीयकारणाभावात्कुतो ज्ञानातिरिक्तो बाह्यो ऽर्थः?

---

**71 विण्णाणेण** ] PāRT, विणाणेण Pu **71 पारीअदि** ] em., पारिअदि PāPuRT **72 अणु वा तेण** ] em., अणुवावातेण PāPu, अनुवादेण RT$^{ac}$, अणु वा देण RT$^{pc}$ **72 पकासिज्जदे** ] em. RT$^{pc}$, पकासिज्ज*ते Pā, पकासिज्जंते Pu, पकासिज्जते RT$^{ac}$ **72 जणेंतो** ] conj., जिणिंतो PāPuRT **72 वि णो णिअंतणं** ] conj. Isaacson, विणाणिअत्तणे PāPu, विणा णिअंतेण RT (em. ?) **73 अप्पत्तेण तेण** ] conj., अप्पत्ते तेण PāPuRT **73 °करीअदि** ] PāPu, °करीयदि RT$^{pc}$, °करियदि RT$^{ac}$ **73 पच्चक्खं** ] conj., चएक्षू PāPu, च पक्खं RT (em. ?) **75 पश्यसि** ] conj. Isaacson, पृच्छसि PāPuRT **76 °ताद्या°** ] conj. Isaacson, °तान्बरा° Pā, °तांब्बरा° Pu, °ताम्बरा° RT **76 °खचितम°** ] PuRT, °खचिनम° Pā **78 प्रकाश°** ] em. RT, प्रकाम° PāPu **79 च नो** ] em. Isaacson, मनो PāPuRT

सर्वं दुःखमितीत्थं ध्यायन् निर्वाणमाप्नोति॥१०॥

॥ नेपथ्ये गण्डिकाध्वनिः॥

॥ उपा॰, श्रुत्वा॥

भो भदंत, एसो खु सअलभिक्खुसंघसंघडणवेलापिसुणो गंडिसद्दो समुच्छलिओ, ता एत्थभवं पमाणं।

॥ भिक्षुः॥

यद्येवं तद्यथा वेला नातिक्रामति तथा समाचरामः।

॥ उत्थाय परिक्रम्य दिशो ऽवलोक्य॥

एष खलु मृणालतन्तुधवलयज्ञोपवीतलाञ्छितश्यामवक्षःस्थलो वेणुयष्टिहस्तः को ऽपि ब्राह्मणयुवा इतो ऽभिवर्तते। तद्यावदेष न वेलाविघ्नमुत्पादयेत्तावद्यथाप्राप्तमनुतिष्ठामः।

॥ उपा॰॥

भो भदंत, को वि अ कालो एदस्स बम्हणजुवाणस्स इह ट्ठिदस्स वट्टदि। जस्सिं य्येव खणे इमस्सिं रुक्खमूले भदंतो उवविट्ठो तस्सिं य्येव खणे एसो इह पविट्ठो भदंतेण ण लक्खिदो। लदाजालंतरिदेण एदिणा सयलो य्येव आयण्णिदो भदंतवण्णिदो उवएसो।

॥ भिक्षुः॥

यद्येवं ततः किं तथाविधेनैव वयमिदानीं वेलां लङ्घयामः?

॥ इति सहोपासकेन निष्क्रान्तः॥

॥ ततः प्रविशति यथानिर्दिष्टः स्नातको बटुश्च॥

॥ स्नात॰॥

स्वाध्यायः पठितो यथाविधि परामृष्टानि चाङ्गानि षण्
मीमांसापि निरूपितेति विहितं कर्म द्विजन्मोचितम्।

---

85 f. भो भदन्त, एष खलु सकलभिक्षुसङ्घसङ्घटनवेलापिशुनो गण्डिशब्दः समुच्छलितः। तदत्रभवान् प्रमाणम्। 94 ff. भो भदन्त, को ऽपि च काल एतस्य ब्राह्मणयून इह स्थितस्य वर्तते। यस्मिन्नेव क्षणे ऽस्मिन् वृक्षमूले भदन्त उपविष्टः तस्मिन्नेव क्षण इह प्रविष्टो भदन्तेन न लक्षितः। लताजालान्तरितेनैतेन सकल एवाकर्णितो भदन्तवर्णित उपदेशः।

---

**82** दुःखमि॰ ] RT (em. ?), दुखमि॰ PāPu **82** निर्वाणमा॰ ] PuRT, निवाणमा॰ Pā **90** ॰वक्षः॰ ] PāPuRT$^{pc}$, ॰वक्ष॰ RT$^{ac}$ **95** रुक्ख॰ ] em. RT, रक्ख॰ PāPu **95** भदंतो ] PāPu, भदंत RT (em. ?) **96** लक्खिदो ] PāRT, लखिदो Pu **96** एदिणा ] PāPu, om. RT **97** आयण्णिदो ] em. RT, आयसिदो PāPu **97** ॰वण्णिदो ] PāRT, ॰वणिदो Pu **99** वेलां ] PāRT, वेला Pu **100** निष्क्रान्तः ] em., निष्क्रान्तः॥ ⟨॥ विष्कम्भकः॥⟩ em. RT, निःक्रांतः PāPu$^{pc}$, निक्रांतः Pu$^{ac}$ **103** स्वाध्यायः ] RT (em. ?), स्वाध्याय॰ PāPu

नित्याधूतकुतर्कधूसरगिरां यावत्तु वेदद्विषां
न्यक्कारो न कृतः कृतार्थ इव मे तावन्न विद्याश्रमः॥ ११॥

अग्न्याश्चैते वेदविप्लवकृतां कुबुद्धयः शौद्धोदनिशिष्यकाः। तदेनानेव स्तेनानिव तावन् निगृह्णीमः।

॥ परिक्रामति॥

॥ बटुः॥

अय्य, उवणीदं मए एदं ण्हाणोवअरणं। ण्हादुं पत्थिदो अय्यो।

॥ स्नात॰॥

किं चातः?

॥ बटुः॥

ण खु अणुऊलं उवचिट्ठदि। विहारगामी खु एस मग्गजणो सयलो संचरदि।

॥ स्नात॰॥

नन्वत्र विहारे भिक्षूनवलोक्य ततः स्नास्यामः।

॥ बटुः॥

जं अय्यो आणवेदि।

॥ उभौ परिक्रामतः॥

॥ स्नात॰, अग्रतो ऽवलोक्य॥

अहो विहारस्य रामणीयकम्! इह हि

प्रासादाः शशिरश्मिशुभ्रहिमवच्छृङ्गप्रतिस्पर्द्धिनः
स्निग्धान्याम्रवणानि शाद्वलचिता हृद्या लतामण्डपाः।
उन्मीलद्बिसकन्ददन्तुरशरद्व्योमानुकारोदकाः

---

111 आर्य, उपनीतं मयैतत् स्नानोपकरणम्। स्नातुं प्रस्थित आर्यः। 115 f. न खल्वनुकूलमुपतिष्ठते। विहारगामी खल्वेष मार्गजनः सकलः सञ्चरति। 119 यदार्य आज्ञापयति।

---

105 f. NM I 7.6–9: न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानां वेदप्रामाण्यरक्षाहेतुत्वात्। वेदेषु हि दुस्तार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलितास्थाः कथमिव बहुवित्तव्ययायासादिसाध्यं वेदार्थानुष्ठानमाद्रियेरन् साधवः? 122 ff. cf. NM II 347.13–16: नास्त्यात्मा फलभोगमात्रमथ च स्वर्गाय चैत्यार्चनं, संस्काराः क्षणिकाः युगस्थितिभृतश्चैते विहाराः कृताः। सर्वं शून्यमिदं वसूनि गुरवे देहीति चादिश्यते, बौद्धानां चरितं किमन्यदियती दम्भस्य भूमिः परा॥

---

**106 न्यक्कारो** ] em. RT, त्यक्तारो PāPu **107 अग्न्याश्चैते** ] em. RT, अत्र्याश्चैते PāPu **111 अय्यो** ] RT (em. ?), आय्या PāPu **115 ण खु** ] PāPuRT$^{ac}$, ण क्खु RT$^{pc}$ **115 °मी खु** ] PāPuRT$^{ac}$, °मी क्खु RT$^{pc}$ **115 मग्ग°** ] PāRT, मग्ज° Pu **119 अय्यो** ] RT (em. ?), आय्या PāPu **122 रामणीयकम्** ] RT (em. ?), रमणीयकं PāPu **124 °न्याम्र°** ] RT (em. ?), °न्यास्त्र° PāPu **125 °बिस°** ] RT (em. ?), °विस° PāPu **125 °शर°** ] Pā$^{pc}$PuRT, °शिर° Pā$^{ac}$

पद्मिन्यो विहरत्सरोरुहरजोरक्ताङ्गभृङ्गाङ्गनाः॥ १२॥

॥ पद्मिनीं निर्वर्णयन् ॥

अधःशाखैरूर्ध्वस्थितविततमूलैः कमलिनी-
जलं धत्ते लक्ष्मीं पुलिनतरुषण्डैः प्रतिमितैः।
इहान्तर्दृश्यन्ते विटपविनिविष्टाः क्षितिरुहां
विहङ्गाः खादन्तः फलशकलमुत्तानवदनाः॥ १३॥

॥ बटुः॥

अय्य, पेक्ख एयाणं मउअपवणंदोलिअविचित्तधयवडमंडिअमेरुगंडिआणिव्विसेसपासादब्भंतरविणिवेसिदाणं कणअमइआणं पज्झरंतणिरंतरपहावित्थारगसुंदरवण्णाभरणभूसिआणं बुद्धपडिमाणं चंदणघणसारघुसिणमअणाहिविलेवणकुसुमधूवोवहारसामिद्धी। अहो अच्छरिअं!

॥ स्नात॰, निर्वर्ण्य॥

न खलु तपस्विजनमठिकास्थानमिदं, राजोद्यानमेतत्। कष्टं भोः कष्टम्!

विटपथिकलुण्ठ्यमानैर्वन्द्ये पथि जातगहनदिङ्मोहैः।
अस्थाने क्षिप्यन्ते विविधानि धनानि धनवद्भिः॥ १४॥

किलाप्रमाणे ऽप्यस्मिन्नागमे विषयसुखपराङ्मुखमनसां समाधिभावनाभ्यासस-क्तानां यथा तथा कल्पितप्राणवृत्तीनां किमेवंविधैरनुपशान्तजनोचितैर्भोगसाधनविभवैः?

॥ बटुः॥

---

133 ff. आर्य, पश्य एतासां मृदुकपवनान्दोलितविचित्रध्वजपटमण्डितमेरुगण्डिकानिर्विशेषप्रासादाभ्यन्तरविनिवेशितानां कनकमयीनां प्रक्षरन्निरन्तरप्रभाविस्तारकसुन्दरवर्णाभरणभूषितानां बुद्धप्रतिमानां चन्दनघनसारघुसृणमृगनाभिविलेपनकुसुमधूपोपहारसमृद्धीः। अहो आश्चर्यम्।

---

**127** पद्मिनीं निर्वर्णयन् ] em., पद्मिनी निर्वर्ण्णयत् Pā, पद्मिनी निर्वर्णयत् Pu, पद्मिनीं निर्वर्ण्य em. RT **128** ॰रूर्ध्व॰ ] RT (em. ?), ॰रूर्द्ध॰ PāPu **128** ॰वितत॰ ] Pā$^{pc}$PuRT, ॰विततत॰ Pā$^{ac}$ **130** इहान्त॰ ] PuRT, इहांभ॰ Pā **130** ॰विनिविष्टाः ] RT (em. ?), ॰विनिविष्टा PāPu **133** अय्य पेक्ख ] PāRT, अय्या पक्ख Pu **133** एयाणं ] PāPu, एआणं RT **133** ॰मंडिअ॰ ] PāPuRT$^{pc}$, ॰मण्डिअ॰ RT$^{ac}$ **133** ॰गंडिआ॰ ] PāPuRT$^{pc}$, ॰गण्डिआ॰ RT$^{ac}$ **134** ॰णिव्विसेस॰ ] PāPuRT$^{pc}$, ॰निव्विसेस॰ RT$^{ac}$ **134** पज्झरंत॰ ] RT (em. ?), पष्करंत॰ PāPu **135** ॰णिरंतरपहावित्थारग॰ ] em. RT$^{pc}$, ॰निरंतरपहावित्थारग॰ RT$^{ac}$, ॰णिएंतरपहाविस्थब्ज॰ (?) Pā, ॰णिएंतरपहाविस्थद्ग॰ Pu **135** ॰वण्णा॰ ] RT (em. ?), ॰वअणा॰ PāPu **136** ॰कुसुमधू॰ ] em. RT, ॰कुसूधू॰ Pā, ॰कुसुधू॰ Pu **136** ॰वोवहार॰ ] conj., ॰पोपहार॰ PāPuRT **138** तपस्वि॰ ] RT (em. ?), तपश्वि॰ PāPu **139** ॰गहन॰ ] PāRT, ॰गहत॰ Pu

अय्य, पेक्ख पेक्ख, एदस्सिं धवलहरसिहरे सुरहिकुसुमधूवगंधपब्भारणिब्भररभरिददसदिसामुहे एदे वंदआ भोअणोम्मुह व्व दीसंति।

॥ स्नात॰ ॥

साधु लक्षितम्। तत् कदाचिदावां दृष्ट्वा स्वव्यापारयन्त्रणामनुभवेयुरेते भिक्षवः। तदिहैव लतामण्डपे तावदेभिरनुपलक्ष्यमाणौ क्षणं पश्याव एषां व्यवहारम्।

॥ तथा कुरुतः ॥

॥ स्नातः, सकौतुकमवलोक्य ॥

अये, केनचिदपि भिक्षुसङ्घभोजनोन्मुखेन नापि स्नातम्।

॥ बटुः ॥

चिट्ठदु ण्हाणं, अंबरपरिवत्तणमेत्तं पि ण कदं!

॥ स्नात॰, निपुणं निर्वर्ण्य ॥

आचमनकल्पो ऽप्येषां शूद्रनिर्विशेषः। कथं चत्वारो वर्णा वर्णसङ्करा अपि वा सर्व एवैकस्यां पङ्क्तौ भुञ्जते! अहो रम्यमाश्रमव्रतम्!

॥ बटुः ॥

अय्य, ण इत्तिअं य्येव एदं। पेक्ख एदाण परिविसंतीण भक्खदाणोम्मुहाण थोरथणमंडलाण दासीण विविहविब्भमा कडक्खा भिक्खुवयणेसु णिवडंति। एदं च किं पि णिम्मलकलसणिक्खित्तं पाणयं उवणीदं।

॥ स्नात॰ ॥

पङ्करसशब्दनिह्नुतमन्यव्यपदेशमत्र मधुपानम्।

---

145 ff. आर्य, पश्य पश्य, एतस्मिन् धवलगृहशिखरे सुरभिकुसुमधूपगन्धप्राग्भारनिर्भरभरितदशदिशामुखे एते वन्दका भोजनोन्मुखा इव दृश्यन्ते। 154 तिष्ठतु स्नानम्, अम्बरपरिवर्तनमात्रमपि न कृतम्! 159 ff. आर्य, न इयदेवैतत्। पश्य, एतासां परिवेषयन्तीनां भक्ष्यदानोन्मुखीनां स्थूलस्तनमण्डलाणां दासीनां विविधविभ्रमाः कटाक्षा भिक्षुवदनेषु निपतन्ति। एतच्च किमपि निर्मलकलशनिक्षिप्तं पानकमुपनीतम्।

---

**145** ॰धूव॰ ] conj., ॰धूय॰ PāPuRT **145** ॰गंध॰ ] PāPuRT[pc], ॰गन्ध॰ RT[ac] **146 f.** ॰णिब्भरभरिद॰ ] PāRT, ॰णिब्भभरिद॰ Pu **146** भोअणोम्मुह ] em., भाअणोम्मुहो PāPu, भोअणोम्मुहा em. RT **146** दीसंति ] PuRT, दीसंति Pā **152** भिक्षुसङ्घभोजनोन्मुखेन नापि ] conj. Isaacson, भिक्षुसङ्घभोजनो दुःखेनापि PāPu, भिक्षुणा सङ्घभोजने दुःखेनापि RT (em. ?) **154** अंबर॰ ] em., अंवर॰ PāPuRT **154** ॰परिवत्तण॰ ] RT[pc] (em. ?), ॰पडिवत्तण॰ PāPu, ॰परिवत्तन॰ RT[ac] **156** शूद्र॰ ] PuRT, सूद्र॰ Pā **159** इत्तिअं ] em., इत्तिअ PāPuRT **159** एदाण ] PāRT, एहाण Pu **160** ॰म्मुहाण थो॰ ] PāRT, ॰म्मुहाणा था॰ Pu **160** कडक्खा ] RT (em. ?), कडक्ख PāPu **160** णिवडंति ] em., णिवडंता PāPu, णिपडंता RT (em. ?) **161** पाणयं उवणीदं ] em., पाणयमुवणीदं RT (em. ?), पाणयसुवणीदं Pā[pc]Pu, पायण॰ Pā[ac] **163** पङ्क॰ ] PāRT, पक॰ Pu **163** ॰मन्यव्यप॰ ] em. RT, ॰मद्यव्यप॰ PāPu

मांसाशनं च कोटित्रयरहितमहो तपःकृच्छ्रम्॥ १५॥

॥ बटुः॥

अय्य, पेक्ख पेक्ख, एसो भिक्खू

तिसिओ वि पिअइ ण तहा जीहाइ भमंतकुवलअं पाणं।
दिट्ठीहि जहा दासीण विआसिअलोअणं वअणं॥ १६॥

॥ स्नात॰॥

भवतु, दृष्टो वीतरागाणामाश्रमसमाचारः।

॥ बटुः॥

उज्याणेसु णिवासो सुलहं पाणं च सुलहमण्णं पि।
ण य किं पि णियमदुक्खं धण्णो वंदत्तणं लहइ॥ १७॥

॥ स्नात॰॥

अलमिदानीं परिहासेन। एष स महापण्डितः प्रसिद्धो धर्मोत्तरनामा भिक्षुः कृताहारः प्रासादादवतीर्य तरोरधश्छायायां शाद्वलभुवमध्यास्ते। तदुपसर्पाव एनम्।

॥ ततः प्रविशति यथानिर्दिष्टो भिक्षुरुपासकश्च॥

॥ भिक्षुः॥

आयुष्मन्, अपि गृहीतं तद् भवता हृदये दयानिधेर्भगवतो बोधिसत्त्वस्योपदेशजातम्?

॥ उपा॰॥

पुणो वि भदंतो अणुग्गहं करिस्सदि।

॥ भिक्षुः, अग्रतो ऽवलोक्य॥

अयमसावद्यापि ब्राह्मणयुवा स्थित एव। विवक्षोरिवास्य मुखं पश्यामि।

---

166 ff. आर्य, पश्य पश्य, एष भिक्षुः तृषितो ऽपि पिबति न तथा जिह्वया भ्रमत्कुवलयं पानम्। दृष्टिभिर्यथा दासीनां विकासितलोचनं वदनम्॥ 172 f. उद्यानेषु निवासः सुलभं पानं च सुलभमन्नमपि। न च किमपि नियमदुःखं धन्यो वन्दत्वं लभते॥ 183 पुनरपि भदन्तो ऽनुग्रहं करिष्यति।

---

**166** अय्य, पेक्ख ] PāPuRT$^{pc}$, अय्य, षेक्ख RT$^{ac}$ **167** ॰कुवलअं ] PāPu, ॰कुवलयं RT (em. ?) **168** दिट्ठीहि ] conj., दिट्ठीइ PāPuRT **168** विआसिअ॰ ] PāPu, विअसिअ॰ RT (em. ?, unmetrical) **168** वअणं ] RT (em. ?), चअणं PāPu **172** उज्याणेसु ] em. RT, उज्या*णेमु Pā, उज्याणेमु Pu **172** अण्णं ] PāRT, अणं Pu **173** ॰दुक्खं ] RT (em. ?), ॰दुखं PāPu (unmetrical) **173** धण्णो ] PāRT, धणो Pu (unmetrical) **176** ॰रधश्छा॰ ] PuRT, ॰रधच्छा॰ Pā **176** ॰भुवम् ] em. RT, ॰भुवनम् PāPu **178** ॰निर्दिष्टो ] PāRT, ॰निर्दिष्टौ Pu **179** भिक्षुः ] PāRT, भिक्षु Pu **185** ब्राह्मण॰ ] PuRT, व्राह्मण॰ Pā **185** विवक्षोरिवास्य ] em. RT, विवक्षो एवास्य PāPu

॥ स्नात॰, उपसृत्य॥

भिक्षो, कुशलिनो भवन्तः? कच्चिदविघ्नमुपपद्यत इयमाश्रमचर्या?

॥ भिक्षुः॥

स्वागतम्। अनुपहतेयं शाद्वलभूमिः। उपविश्यताम्।

॥ स्नातः, उपविश्य॥

किं पुनरस्योपदिष्टमाचार्येण यत्रैवं ग्रहणं पृच्छ्यते?

॥ भिक्षुः, उपासकमुद्दिश्य॥

ब्रूहि, यदेष पृच्छति।

॥ स्नात॰॥

केयमवज्ञा उपासक ब्रूहीति? बटो, शृण्वस्य यदयमाचष्टे।

॥ भिक्षुः॥

ब्राह्मण, शृण्वस्मादिति ननु वक्तुं युक्तम्।

॥ स्नात॰॥

भो रक्तपट, न खल्वाख्यातोपयोग इत्यस्य विषय एवंविधाः प्रलापाः। हन्त, नटस्य शृणोतीत्ययमेवात्र न्यायो युक्तः।

॥ भिक्षुः॥

अहो मौखर्यं द्विजन्मनो यस्य त्रिभुवनैकगुरोः परमकारुणिकस्य भगवतो बुद्धस्य ⟨शासनं⟩ प्रलापः!

॥ स्नातः, उपासकमुद्दिश्य॥

त्वमपि कथय तावत्, किमनेन पाठितो ऽसि।

॥ उपा॰॥

णं चत्तारि मे अय्यसच्चाइ गुरुणा उवदिट्ठाइ दुक्खं समुदओ णिरोहो मग्गो त्ति।

---

207 ननु चत्वारि म आर्यसत्यानि गुरुणा उपदिष्टानि, दुःखं समुदयो निरोधो मार्ग इति।

---

199 A 1.4.29.

---

**187** **॰पद्यत इयमा॰** ] conj., ॰पद्यते त इयमा॰ em. RT, ॰पद्यत तेयमा॰ PāPu **191** **यत्रैवं** ] RT (em. ?), यत्रैव PāPu **194** **स्नात॰** ] PāPu, स्नात॰, ⟨स्वगतम्⟩ em. RT **195** **॰मवज्ञा** ] em. RT, ॰मवक्रा PāPu **195** **ब्रूहीति** ] PāPu, ब्रूहीति। ⟨प्रकाशम्⟩ em. RT **195** **बटो** ] PuRT, वटो Pā **195** **शृण्वस्य यदयमाचष्टे** ] conj., शृणुस्वयमयमाचष्टे PāPu; शृणुष्व यमयमाचष्टे em. RT **197** **ब्राह्मण** ] PuRT, व्राह्मण Pā **200** **युक्तः** ] RT (em. ?), युक्ते PāPu **201** **भिक्षुः** ] PāPu, भिक्षुः ⟨स्वगतम्⟩ em. RT **202** **द्विजन्मनो** ] PāRT, द्विजन्मयो Pu **203** **⟨शासनं⟩** ] conj. Sanderson, om. PāPuRT **205** **पाठितो** ] em. RT, पठितो PāPu **207** **मग्गो** ] RT (em. ?), मग्ग PāPu

॥ स्नात॰, सस्मितम्॥

इदं तत्परमकारुणिकशासनम्? अयं च न प्रलापो यत्र नैरात्म्यदर्शनं श्रेयोमार्ग इति गीयते?

॥ भिक्षुः॥

द्विजाते, अग्नीषोमीयादिपशुविशसनं श्रेयःसाधनं साध्वित्येतद्दृष्टिभावनाकलुषितान्तःकरणानां भवद्विधानां प्रलाप इवायमाभाति परमार्थोपदेशः।

॥ स्नात॰॥

कथमयं दुराचारः शाक्यो वेदवाक्येष्वपि विवदते। किं कुर्मः? कस्याग्रतो ब्रूमः? पतितसङ्गसम्बाध एवायं विहारो वर्तते।

॥ दिशो ऽवलोक्य, सहर्षम्॥

अहो बतामी विहारोद्यानदर्शनदोहदिनो ऽतिबहवः पुण्यैरत्रभवन्तो विश्वरूपप्रभृतयो महाविद्वांसः प्राश्निका उपस्थिताः। भवतु, लब्धो ऽवसरः पापानां निग्रहस्य।

॥ ततः प्रविशन्ति यथाविभवं प्राश्निकाः॥

⟨॥ प्राश्निकाः॥ ⟩

एष स्नातकसङ्कर्षण एष च भिक्षुधर्मोत्तरो विवदमानाविव वदनलक्ष्म्यैव लक्ष्येते। हन्त, पश्यामस्तावत्।

॥ गोष्ठीं परिक्रामन्ति॥

॥ भिक्षुः॥

स्वागतमार्याः, इहोपविश्यताम्।

॥ इति शाद्वलभूमिं निर्दिशति॥

॥ प्राश्निकाः, उपविश्य॥

---

213 f. cf. NM I 642.9–12: या तु अग्नीषोमीयादिपशुहिंसेतिकर्तव्यतांशस्था, यस्यां क्रत्वर्थो हि शास्त्रादवगम्यत इति वैधी प्रवृत्तिः, तस्यामपि कारुणिको लोकः सविचिकित्सो भवति। वदति च, ‘यत्र प्राणिवधो धर्मस्त्वधर्मस्तत्र कीदृशः?’ इति। न चैतावता वेदस्याप्रामाण्यम्।

---

**210** च ] em., स PāPuRT **213** ॰विशसनं ] RT (em. ?), ॰विशंसनं PāPu **213** ॰त्येतद्दृष्टि॰ ] conj. Isaacson, ॰तितेद्धृष्टि॰ Pā, ॰तितद्धृष्टि॰ Pu, ॰ति तद्दृष्टि॰ RT (em. ?) **214** प्रलाप इवा॰ ] conj. Isaacson, प्रलाप एवा॰ PāPuRT **216** विवदते ] PāRT, विवदति Pu **217** ब्रूमः ] em. RT, ब्रवीमः PāPu **217** ॰सम्बाध ] RT (em. ?), संवाध PāPu **219** बतामी ] PuRT, वतामी Pā **219** ऽतिबहवः ] PuRT, ऽतिवहवः Pā **222** प्रविशन्ति ] RT (em. ?), प्रविशति PāPu **223** ⟨प्राश्निकाः⟩ ] em. RT, om. PāPu **224** ॰धर्मोत्तरो ] RT (em. ?), ॰धर्मोत्तरौ PāPu **224** वदनलक्ष्म्यैव ] em. RT, दवदनलक्ष्यैव PāPu, दवदहनलक्ष्यौ conj. RT **225** पश्यामस्तावत्। गो॰ ] RT (em. ?), पश्यामः। तावद्गो॰ PāPu

किमिह प्रस्तुतम्?

॥ इति भिक्षुं पृच्छन्ति॥

॥ भिक्षुः॥

अमुष्य यज्ञोपवीतिनो बोधिसत्त्वोपदेशः प्रलाप इवाभाति।

॥ स्नात॰ ॥

अयमहमेष च भिक्षुः परीक्षकाः कृतधियो भवन्त इति।
सारासारविचारे कुतो ऽन्य एवंविधो ऽवसरः? ॥ १८ ॥

॥ प्राश्नि॰ ॥

न्याय्यं चेदभिधीयते परिमितं सिद्धान्तबीजं वचो
हेयं चेच्छलजातिनिग्रहपदप्रायं कथाडम्बरम्।
नैवेर्ष्या हृदि वाचि नो परुषता न भ्रूविभेदो मुखे
साधूनां यदि वाद एष तदिमे सर्वत्र सभ्या वयम्॥ १९ ॥

॥ भिक्षुस्नातकौ॥

एवमेतद् यथार्याः समादिशन्ति।

॥ प्राश्नि॰ ॥

तत् को ऽत्रभवतोः प्रथमपक्षवादी?

॥ स्नातकः॥

कृत एव भिक्षुणा पूर्वपक्षोपन्यास उपासकं प्रबोधयता।

॥ भिक्षुः, स्नातकमुद्दिश्य॥

अपि श्रुतं तद् भवता?

॥ स्नात॰ ॥

श्रुतम्।

---

240 cf. NM I 27.13–28.3: यच् च निग्रहस्थानपरिगणिता अपि हेत्वाभासाः पुनरुपदिश्यन्ते, तद् वादे चोदनीया भविष्यन्तीत्याशयेन। छलजातिनिग्रहस्थानानि जल्पवितण्डोपकरणानि। तेषामवधृतस्वरूपाणां स्ववाक्ये परिवर्जनं, क्वचिदवसरे प्रयोगः, परयुक्तानां च प्रतिसमाधानमित्यादि शक्यक्रियम्।; also NM II 635.1–3: तत्त्वाध्यवसायसंरक्षणं जल्पवितण्डयोः प्रयोजनमुक्तम्। तदङ्गभूतानि छलजातिनिग्रहस्थानानि। यद्यपि च वादे केषांचिदभ्यनुज्ञानमस्ति, तथापि जल्पवितण्डे एव तेषां प्राचुर्येण क्षेत्रम्।

---

**232** पृच्छन्ति ] em.RT, पृच्छति PāPu **234** बोधिसत्त्वो॰ ] PuRT, वोधिसत्त्वो॰ Pā **236** भवन्त इति ] PāPu, भवन्तः। इति RT (em. ?, unmetrical) **237** ॰विचारे कुतो ] em.RT, ॰विचारकुतो Pā, ॰विचारं कुतो Pu **241** नैवेर्ष्या ] conj.RT, न द्वेषो em.RT, मानैवैषो PāPu **241** परुषता ] PāRT, परुषती Pu **242** सभ्या ] em.RT, सत्या PāPu, सज्जा conj.RT **244** ॰र्याः ] PāRT, ॰र्या Pu **246** ॰भवतोः ] PāRT, ॰भवतो Pu **248** उपासकं ] PāRT, उसासकं Pu

॥ भिक्षुः ॥

यद्येवं तदनुभाष्यताम्।

॥ स्नात० ॥

बाढम्। सङ्क्षेपत एवानुभाष्यते तावत्।

दुःखं तस्य निमित्तं तदुपरमस्तदुपपत्तये मार्गः।
नैरात्म्यदर्शनाख्यस्तत्सिद्धिः क्षणिकतासिद्धेः॥ २०॥
तत् क्षणिकत्वं सत्त्वान् नाशं प्रति कारणानपेक्षत्वात्।
स्मृत्यादिव्यवहारः सन्ताने हेतुफलभावात्॥ २१॥
क्षणिको ऽपि न बाह्यो ऽर्थः कश्चित् संवित्तिविषयतां याति।
आकारनिचयखचितं चकास्ति विज्ञानमेवेदम्॥ २२॥
तस्मात् सर्वं शून्यं सर्वं क्षणिकं निरात्मकं सर्वम्।
सर्वं दुःखमितीत्थं ध्यायन् निर्वाणमाप्नोति॥ २३॥

॥ भिक्षुमुद्दिश्य॥

अपि भवत्येवम्?

॥ भिक्षुः, सावज्ञम्॥

आं भवति सङ्क्षिप्तम्।

॥ स्नात० ॥

तदत्रेदानीं श्रूयताम्।

॥ प्राश्नि० ॥

अवहिताः स्मः।

॥ स्नात० ॥

अयं यथोक्तः क्षणभङ्गसिद्धौ
  सत्यां भवेदप्यपवर्गमार्गः।
विचार्यमाणास्तु न नैपुणेन
  स्पृशन्ति भावाः क्षणभङ्गुरत्वम्॥ २४॥

॥ भिक्षुः॥

---

**256** बाढम् ] PuRT, वाढं Pā **258** °दर्शना° ] Pā[pc]PuRT, °दर्शनाना° Pā[ac] **258** °ख्य-स्तत्सिद्धिः ] Pā[pc]PuRT, °ख्यस्ततां। स्नात Pā[ac] **258** °सिद्धेः ] PāRT, °सिद्धिः Pu **259** कारणा° ] RT (em. ?), करणा° PāPu **261** संवित्ति° ] Pā[pc]PuRT, संस्मात् सर्वं शून्यं सर्वं क्षणिकं निरात्मकं सर्ववित्ति° Pā[ac] **264** सर्वं ] PuRT, om. Pā **266** भवत्ये-वम् ] em. Isaacson, भवत्वेवम् PāPuRT **267** ff. भिक्षुः…श्रूयताम् ] om. Pā[ac], inserted on the margin Pā[pc] **272** अवहिताः ] Pā[pc]PuRT, अविहिताः Pā[ac] **275** °प्यपवर्ग° ] PuRT, °प्यवर्ग° Pā **276** नैपुणेन ] PāPuRT[pc], नेपुणेन RT[ac]

कुतः?

॥ स्नात॰ ॥

हेत्वभावादेव।

॥ भिक्षुः ॥

ननूक्तो हेतुः सत्त्वादिति।

॥ स्नातः ॥

सत्त्वाख्यं यदवादि मानमलसदृष्टान्तवन्ध्यात्मनः
सम्बन्धग्रहणं न शक्यमृजुना मार्गेण धूमाग्निवत्।

॥ भिक्षुः ॥

यद्येवं ततः किम्? व्यतिरेकमुखेनापि व्याप्तिग्रहो व्याप्तिग्रह एव।

नित्येभ्यः क्रमयौगपद्यविरहाद् व्यावर्तमानं पुन-
स्तत् सत्त्वं निदधीत भङ्गिषु पदं गत्यन्तरासम्भवात्॥ २५॥

॥ स्नात॰ ॥

नित्येभ्य इव तेनैव व्यापकासम्भवेन ते।
क्षणिकेभ्यो ऽपि भावेभ्यः सत्त्वं व्यावर्ततेतराम्॥ २६॥

पश्य,

उत्पद्य काञ्चिदपि यद्ययमारभेत
भावः क्रियां क्षणिकतां न तथा सतीयात्।
तस्यात्मलाभसमनन्तरमेव मृत्यु-

---

285 ff. NM II 303.14–304.3 (*bauddhapakṣa*): अतो यद्यपि कार्यहेतौ धूमाग्न्योरिव, स्वभावहेतावपि वा क्वचिद् वृक्षत्वशिंशपात्वयोरिव पूर्वमिह साध्यसाधनधर्मयोर्ग्रहणं धर्म्यन्तरे न वृत्तम्, तथापि साध्यधर्मिण्येव व्याप्तिग्रहणमुपपत्स्यते विपक्षव्यावृत्तेः सुपरिनिश्चितत्वात्। सैव च विपक्षाद्व्यावृत्तिः, स एव चास्य हेतोः स्वसाध्येनान्वयः। न ह्येवं सम्भवति, नित्येभ्यश्च व्यावृत्तं सत्त्वं, क्षणिकेषु च न निविष्टमिति, तृतीयराश्यभावात्, निराश्रयत्वानुपपत्तेश्च। 289 f. NM II 300.1–6 (*bauddhapakṣa*) भावानां हि सत्त्वं क्रमयौगपद्याभ्यां व्याप्तम्। नित्येषु च पदार्थेषु व्यापकानुपलम्भनात्। तद्व्याप्तमपि सत्त्वं हि बलात् तेभ्यो निवर्तते॥ न च राशिस्तृतीयो ऽस्ति तेन गत्यन्तरक्षयात्। क्षणिकानेव तान् भावान् सत्त्वं समवलम्बते॥ 295 ff. NM II 323.11–15: कार्यकारणभाव एष भदन्तसिद्धान्ते दुरुपपादः। परोत्पत्तावव्याप्रियमाणमेव यदि कारणमुच्यते सर्वं सर्वस्य कारणं स्यात्। न चालब्धात्मनस्तस्य व्यापारः परजन्मनि। लब्धात्मनस्तु व्यापारे स्थितिः सिद्धा क्षणान्तरे॥

---

**283** ननूक्तो ] em. RT, नमुक्तो PāPu **284** ff. ॥ स्नातः॥ सत्त्वाख्यं … गत्यन्तरासम्भवात् ] conj. Sanderson, ॥ स्नातः॥ 25abcd ॥ भिक्षुः॥ यद्येवं … व्याप्तिग्रह एव। PāPuRT **285** ॰वन्ध्या॰ ] em., ॰वन्द्या॰ PāPuRT **288** किम् ] em. RT, किमा PāPu **290** सत्त्वं ] em. Sanderson, तत्वं PāPu, तत्त्वं RT **293** क्षणिकेभ्यो ] PāRT, क्षणिकोभ्या Pu **293** व्यावर्ततेतराम् ] em. RT, व्यावर्त्तेतरां PāPu **295** उत्पद्य ] PāPu, उत्पाद्य RT (em. ?)

क्रोडीकृतस्य करणावसरः कुतो ऽन्यः? ॥ २७ ॥

॥ भिक्षुः ॥

क्षणभङ्गिषु भावेषु नन्वियानेव कार्यकारणभावः। इदं प्रतीत्येदं प्रतीयत इति प्रतीत्यसमुत्पादमात्रम्।

॥ स्नातः ॥

अस्त्यत्रान्यदपि वक्तव्यम्। तदास्ताम्। इदं तु ब्रूमः। अस्मिन् मते कारणत्वमेव न तात्त्विकं भावानां विशेष उपादानकारणत्वात्।

तत्र स्वकर्मफलभोगसमर्थनादि
ज्ञानेषु हेतुफलभावकृतं समग्रम्।
हीयेत, हेतुफलभाव इहास्तु को ऽपि
ज्ञानान्तरेषु परसन्ततिजेषु तुल्यः॥ २८ ॥

॥ भिक्षुः, अधोमुखो भूमिमालिखति॥

॥ स्नात॰ ॥

कार्यकारणभावे वा सिद्धे ऽपि परमार्थतः।
ज्ञानान्यत्वानपायात् का स्वकर्मफलभोक्तृता? ॥ २९ ॥

---

300 f. NM II 324.1–3: अथ ब्रूयात्—'इदं प्रतीत्येदं प्रतीयत इतीदंप्रत्ययतामात्रमेव कार्यकारणभाव' इति—तथापि लब्धात्मनः क्षणस्य प्रतीतिरिति द्वितीयक्षणावस्थानमपरिहार्यमेव। 304 f. NM II 322.1–6: अपि च क्षणिकत्वे पदार्थानामिदमत्रोपादानकारणं, इदं सहकारिकारणमिति विशेषो ऽपि दुरवगमः। तथा हि—किमिदमुपादानं नाम? किं स्वसन्तानविनाशेन बीजादिवत् कार्यजनकमुपादानम्, उत स्वविशेषसमर्पणेनोत्पादकमिति। यदि पूर्वः पक्षः, परलोकचर्चा चार्वाकवदुपेक्षिता स्यात्, ज्ञानसन्तानविनाशेन ज्ञानान्तरारम्भप्रसङ्गात्।; also NM II 343.5–14: किंच नाङ्गीकरोषि त्वमात्मानं पारलौकिकम्। उपैषि परलोकं च विदितं ते बकव्रतम्॥ कर्म सन्तानिना ऽन्येन यत् कृतं चैत्यवन्दनम्। ततो ऽद्य फलमन्येन भुज्यते ऽकृतकर्मणा॥ न च निर्वृत्तिरप्यस्य चैत्यवन्दनकर्मणा। ज्ञानक्षणेन नैकेन किंचित् कर्म समाप्यते॥ कार्यकारणभावश्च यस्त्वयोक्तः स दूषितः। कार्यकारणभावे ऽपि न ह्यन्यत्वं निवर्तते॥ अनैकान्तिकता चास्य सन्तानान्तरबुद्धिभिः। उपादानत्वरूपो ऽपि विशेषः प्राङ् निराकृतः॥; also NM II 344.1–6: कर्मानुवृत्तिरप्येषा न चैकस्यास्ति कस्यचित्। कार्यकारणयोर्भेदात्कार्पासकुसुमादिवत्॥ अन्यत्रैव हि कर्म स्यादन्यत्रैव च तत्फलम्। न च सन्तानभोगाय कश्चित् कर्मानुतिष्ठति॥ फलमस्मान् ममैव स्यादिति सर्वः प्रवर्तते। सर्वथा शाक्यभिक्षूणां परलोको विसंष्ठुलः॥

---

**298** करणा॰ ] em., करुणा॰ PāPuRT **303** अस्त्यत्रान्यदपि ] PāPu, अस्त्यन्यदपि RT (em.?) **307** ॰भाव इहास्तु ] conj. Isaacson, ॰भावकृतस्तु conj. RT, ॰भावफलवस्तु PāPu **308** तुल्यः ] PāRT, तुल्य Pu

अपि च, क्षणिका भावाः सत्त्वादिति साध्यविपर्ययसाधनाद् विरुद्धो ऽयं हेतुः।

॥ भिक्षुः ॥

कथमिव?

॥ स्नात° ॥

उक्तं क्षणिकानां नार्थक्रियाकारित्वमिति। स्थास्नवस्तु भावाः सहकारिसन्निधाने क्रमेण युगपद्वा निर्वर्तयितुमुत्सहन्त एवेत्यर्थक्रियाकारित्वमिति तत्स्थैर्यसिद्धिः।

॥ भिक्षुः, तूष्णीमास्ते ॥

॥ स्नात° ॥

आत्महानिश्च भावानां हेत्वधीनात्मलाभवत्।
अन्वयव्यतिरेकौ हि सदृशावुभयोरपि॥ ३०॥

॥ भिक्षुः ॥

नन्वन्यथासिद्धौ विनाशहेतावन्वयव्यतिरेकौ तस्य विसभागसन्ततिनिमित्तत्वात्। उत्पत्तिहेतावन्वयव्यतिरेकौ कार्यान्तराभावान् न तथा भवितुमर्हतः।

॥ स्नात°, सस्मितम् ॥

किमिच्छया द्वेषेण वा? कार्यान्तराभावो ऽपि केषाञ्चिन् मते दुर्भणो ऽभिव्यक्त्यादेः सम्भवात्।

॥ भिक्षुः ॥

नोत्पत्तिहेतून् विरहय्य दृष्ट-

---

313 ff. NM II 325.5–10: अथवा लब्धात्मनः पदार्थस्य परोत्पत्तौ व्याप्रियमाणत्वेन कारकत्वावधारणाद् द्वित्रक्षणस्थायित्वमवश्यमनन्तरनीत्या भवेदिति प्रत्युत सत्त्वादक्षणिकत्वसिद्धेः विरुद्धो ऽयं हेतुः। अतश्चैवं नित्यानामेवार्थक्रियाकारित्वोपपत्तेः समवाय्यसमवायिनिमित्तभेदेन त्रिविधा कारणसामग्री परस्परसंसर्गमागत्य यथासन्निधानं कार्यं प्रसूत इति कृतं क्रमयौगपद्यविकल्पैस्तावकैः। 322 ff. NM II 327.5–8: नश्वरानश्वरत्वादिविकल्पास्तु न साधवः। सामग्र्यधीनः प्रध्वंसः भावानामात्मलाभवत्॥ मुद्गरादिसामग्र्या घटस्य किं क्रियते? मृत्पिण्डादिसामग्र्या किमस्य क्रियते? आत्मलाभ इति चेत्, अनयाप्यात्महानं करिष्यते। 331 ff. NM II 327.13–15: कारकव्यापारकार्यत्वदर्शनादपर्यनुयोग एष इति चेत्, विनाशे च समः समाधिः, उत्पत्तिवद्विनाशस्यापि कारकान्वयव्यतिरेकानुविधायित्वात्।

---

**313** सत्त्वादिति ] em. RT, सत्वादिभि° PāPu **313** °विपर्यय° ] em. RT, °विपर्य° PāPu **313** विरुद्धो° ] PāPuRT$^{pc}$, वरुद्धो° RT$^{ac}$ **317** स्थास्नवस्तु ] em. Isaacson, स्थास्नु वस्तु PāPuRT **318** °धाने ] em., °धानेन PāPuRT **318** निर्वर्तयि° ] em. RT, निवर्त्तयि° PāPu **319** तत्स्थैर्य° ] RT (em. ?), तस्थैर्य° PāPu **323** °व्यतिरेकौ ] RT (em. ?), °व्यतिरेको PāPu **325** नन्वन्यथा° ] em. RT, नन्वयथा° PāPu **326** °हेताव° ] Pā$^{pc}$PuRT, °हेतोव° Pā$^{ac}$ **326** कार्यान्तराभा° ] RT (em. ?), कार्यान्तरभा° PāPu **328** वा ] PāPu$^{pc}$RT, का Pu$^{ac}$ **331** °हेतून् वि° ] em. RT, °हेतुर्वि° PāPu

मुत्पद्यमानं क्वचिदेव कार्यम्।

॥ स्नात° ॥

विनाशहेतून् विरहय्य दृष्टं
किं वा विनश्यत् क्वचिदेव कार्यम्? ॥ ३१ ॥

॥ भिक्षुः ॥

ननु विनाशहेत्वसन्निधानान् मन्वन्तरेष्वपि कश्चिन् न विनश्येद् घट इति निर्यासो भवेत्।

॥ स्नात°, सोपहासम्॥

कष्टं भोः कष्टम्, नित्यत्वे घटस्य सति समाप्ता लोकयात्रा, उत्सन्नाः प्रजाः, उपस्थितो जगतां घट एव नित्यमृत्युः। यस्य हि नास्ति विनाशकारणमाकाशादेरिव भवत्वसौ नित्यः, किं जातम्? न च नास्ति विनाशकारणमवयविनामवयवविभागादेरवश्यंभावित्वात्। अपि च रे मूढ, भवत्पक्षे ऽपि घटक्षणसन्ततिरनुच्छिन्ना तथैव किं न दृश्यते? आगतं चेदस्यां विसभागसन्ततिकारणं हन्त तर्हि विनाशकारणमपि मत्पक्षे तथैवागमिष्यतीति स समानः पन्थाः। तदयमीदृशः क्षणभङ्गपक्षः।

॥ भिक्षुः, सलज्जमास्ते॥

॥ उपा° ॥

अरे रे दुट्ठबम्हण, कधं भदंतं अधिक्खिवसि?

---

349 अरे रे दुष्टब्राह्मण, कथं भदन्तमधिक्षिपसि?

---

337 ff. NM II 328.3–12: ननु सापेक्षाणां भावानां नावश्यंभाविता भवेदिति घटस्य विनाशहेतुर्नोपनिपतेदपि कदाचिदित्येवमसौ किं नित्य एव भवत्विति—अहो महान्प्रमादः, उत्सन्नाः प्रजाः, पतितो महान्वज्राशनिः, दुष्परिहरो ऽयं दोष उत्थितः। यदि घटो नित्यो भवेत्, एष कालाग्निरुद्र इव त्रिभुवनमपि भस्मीकुर्यात्। अपि च रे मूढ, सावयवस्याश्रितस्य कार्यस्य च नूनमवयवविभागाद् आश्रयविनाशाद् वा यदा कदाचिद् भवितव्यमेव विनाशेनेति कस्तन्नित्यत्वशङ्कावसरः? तथा हि न रामाभिषेककलशमद्य यावदनुवर्तमानमीश्वरवेश्मन्यपि पश्यति लोक इत्यवश्यंभावी तस्य विनाशहेतुः। तस्मात् सहेतुको विनाश इति न स्वत एव विनश्वरा भावाः।

---

**337** °त्वसन्नि° ] em. RT, °तुसन्नि° PāPu **337** मन्वन्तरे° ] em. RT, मत्वन्तरे° PāPu **338** भवेत् ] RT (em. ?), भावत् Pā, भावत Pu **339** सोपहासम् ] PāPu, om. RT **341** विनाश° ] RT (em. ?), विनास° PāPu **342** °कारणमा° ] RT (em. ?), °कारणआ° Pā, °कारणं आ° Pu **342** नित्यः। किं जातम्? ] conj. Sanderson-Dezső, नित्यः। किं जातम्? न च नास्ति विनाशकारणआ (°णमा° RT) काशादेरिवभवत्वसौनित्यः। किं जातम्? PāPuRT **343** °देरव° ] em. RT, °दिरव° PāPu **343** च ] PuRT, व Pā **344** विसभाग° ] em. RT, विभाग° PāPu **345** मत्पक्षे ] PāPu$^{pc}$RT, मत्पेक्षे Pu$^{ac}$ **345** समानः ] RT (em. ?), समान° PāPu **349** °बम्हण ] RT (em. ?), °वम्हण PāPu **349** कधं ] Pā, कथं Pu, कहं RT

॥ बटुः ॥

अरे रे वण्णसंकरा, उवज्झाअस्स एवं वाहरसि?

॥ उपा° ॥

कस्स एसो उवज्झाओ? णवरं एअस्स उट्टमुहस्स।

॥ बटुः सक्रोधमुत्तिष्ठन्नुपासकमुखे चपेटां पातयितुमिच्छति ॥

॥ स्नातकभिक्षुप्राश्निकाः ॥

अलमलमतिचापलेन।

॥ इति निवारयन्ति ॥

॥ स्नात° ॥

अपि च स्थैर्यग्राहिण्या स एवायमिति प्रत्यभिज्ञया बाधितो ऽयं हेतुः। तिष्ठतु वा प्रत्यभिज्ञा, यदिदमनिमेषदृष्टेरत्रुटितसत्ताकपदार्थग्राहि प्रत्यक्षं तदपि बाधकमेव। तस्मिंश्च तादृशि प्रत्यक्षे सति, यत् केचिदविचक्षणाः क्षणग्राहि प्रत्यक्षमाचक्षते तदपि प्रतिक्षिप्तमेव क्षणस्य दीर्घकालतानुपपत्तेरिह च तथा ग्रहणात्।

॥ प्राश्नि° ॥

कृतं विस्तरेण।

आकर्णितः कर्णसुखप्रदो ऽयं
  त्वद्वर्णितः स्नातक नीतिमार्गः।
तेन व्युदस्तः क्षणभङ्गवादो
  विज्ञानवादे त्वभिधत्स्व किञ्चित् ॥ ३२ ॥

॥ स्नात° ॥

भिक्षो, श्रूयताम्।

---

351 अरे रे वर्णसङ्कर, उपाध्यायस्यैवं व्याहरसि? 353 कस्यैष उपाध्यायः? केवलमस्योष्ट्रमुखस्य।

---

359 ad *pratyabhijñā* cf. NM II 329 ff. 360 ff. NM II 338.8–9: अपि चानिमेषदृष्टेरत्रुटितसत्ताकस्तम्भादिपदार्थग्राहि प्रत्यक्षमुपपद्यते। तत् कथं क्षणिकग्राहि कथ्यते? 371 ff. NM II 496.11–14: यद्यपि ज्ञानमिदमयमर्थ इत्येवमाकारद्वयप्रतिभासो नास्ति तथाप्ययमेको ऽप्याकारः प्रतिभासमानः प्रकाश्य एव प्रतिभाति न प्रकाशकः। इदं नीलमिति ग्राहकाद्विच्छिन्न एव ग्राह्याकारो ऽवभासते न त्वहं नीलमिति तदैक्येनावभासो ऽस्ति।

---

**351** वण्ण° ] RT (em. ?), वर्ण° PāPu **353** उवज्झाओ ] RT (em. ?), उवस्ताओ (?) Pā, उवज्झाउ Pu **353** एअस्स ] em., एस PāPuRT **353** उट्टमुहस्स ] em. RT, उद्दमुहस्स PāPu **355** स्नातक° ] RT (em. ?), स्नात° PāPu **356** f. °चापलेन। इति ] em. RT, °चापलेति PāPu **359** प्रत्यभिज्ञया ] em. RT, प्रत्यभिज्ञाया PāPu **359** बाधितो ] RT, वाधितो PāPu

ग्राह्यग्राहकयोर्द्वयोरवगतिर्मा भून् ननूद्योततां
ज्ञानात्मा स किमात्मनः प्रकटयत्याकारमन्यस्य वा।
नाहं नीलमिति प्रतीतिरिदमित्येषा तु सङ्गच्छते
विच्छेदावगतिः परत्र तदयं ग्राह्यो ऽस्ति बाह्यो ध्रुवम्॥ ३३॥

॥ भिक्षुः॥

यद्यस्ति किं न संवेद्यते?

॥ स्नात°॥

क एवाह न संवेद्यत इति? ननु संवेद्यत एव नीलमिदमिति।

॥ भिक्षुः॥

साधो, ज्ञानावभासो ऽयं ज्ञानस्य प्रकाशात्मकत्वात्, नार्थस्यावभासो ऽयं तस्य जडात्मकत्वात्, उभयावभासश्च नास्तीति त्वयाप्युक्तम्।

॥ स्नात°॥

ज्ञानमपि प्रकाशमानमन्यप्रकाशात्मकमेव प्रकाशते नात्मप्रकाशात्मकम्। प्रकाश्यप्रकाशो ह्यसौ प्रकाशो न प्रकाशप्रकाश एव। अयमेव हि प्रकार उद्योतानाम्। तदुक्तं,

त्रयः प्रकाशाः स्वपरप्रकाशा

---

381 f. NM II 497.5–11 (*bauddhapakṣa*): ननु नैव ग्राह्यग्राहकयोरन्यत्वमिति यो ऽयं ग्राह्याभास इति भवता ऽभ्युपगतस्स एव ग्राहकावभासः। ग्राहकादन्यो हि ग्राह्यो जडात्मा भवेत्, ग्राहकस्तु प्रकाशस्वभावो ग्राहकत्वादेव, द्वयप्रतिभासश्च नास्तीत्युक्तम्, तत्रान्यतरस्य प्रतिभासने जडप्रकाशयोः कतरस्यावभासितुं युक्तमिति चिन्तायां, बलात् प्रकाश एव प्रकाशते न जडः। निराकारश्च न प्रकाशः प्रकाशत इति तस्मिन् साकारे प्रकाश्यमाने कुतो जडात्मा तदतिरिक्तो ऽर्थः स्यात्? 384 ff. NM II 497.17–498.5: चक्षुर्जन्यो हि प्रकाशो नाम ज्ञानमुच्यते, न चागृहीतः प्रकाशः प्रकाश्यं प्रकाशयतीति—सत्यम्—चक्षुर्जन्यः प्रकाशो ज्ञानमिष्यते। स तु प्रकाशो रूपादिविषयप्रकाशः, न प्रकाशप्रकाशः। न हि चक्षुषा प्रकाशः प्रकाश्यते, अपि तु रूपं प्रकाश्यते। तत्र यद् रूपमुच्यते, स विषयो ग्राह्यः, यत् तत् प्रकाशत इत्युच्यते, स प्रकाशो ज्ञानं ग्राहकम्। तदुत्पत्तिमात्रेण च रूपं प्रकाशितं भवतीति न प्रकाशो ग्रहणमपेक्षते। 386 ff. cf. NM II 499.16–500.10: ननु ज्ञानशब्ददीपाः त्रयः स्वपरप्रकाशा इत्याहुः—तदयुक्तम्—शब्ददीपयोः स्वग्रहणे ऽर्थप्रकाशने च सामग्र्यन्तरसव्यपेक्षत्वात्। शब्दो ऽर्थप्रकाशने समयग्रहणमपेक्षते, स्वप्रकाशने तु श्रोत्रम्। दीपो ऽपि चक्षुराद्यपेक्ष एव गृह्यते ग्राहयति चार्थम्। इयांस्तु विशेषः—घटादिग्रहण आलोकसापेक्षं चक्षुः प्रवर्तते, आलोकग्रहणे तु निरपेक्षमिति। नैतावता दीपस्य स्वप्रकाशता स्यात्। इत्थं च मार्जारादिनक्तंचरचक्षुरपेक्षया सर्व एव घटादयः स्वप्रकाशाः स्युः। ज्ञानस्य परप्रकाशकत्वमेव दृश्यते, न स्वप्रकाशत्वम्, अर्थप्रकाशकाले तदप्रकाशस्य दर्शितत्वात्। मुधैव तस्माद् भणितस्त एते त्रयः प्रकाशाः स्वपरप्रकाशाः।

---

**372** ननूद्योततां ] em. Isaacson, ननु द्योततां PāPuRT **374** °त्येषा ] PāRT, °त्येषां Pu
**379** ननु ] RT (em. ?), न तु PāPu **386** उद्योतानाम् ] RT (em. ?), उद्योतानां PāPu

इति। न तु तदानीं तत्त्वतो ज्ञानं प्रकाशते। नीलाद्याकारो हि प्रकाशते, न तु ज्ञानं नीलाद्याकारम्, अन्वयव्यतिरेकाभ्यां तस्य गोत्वादिवद् बोधरूपत्वानवधारणादिति।

॥ भिक्षुस्तूष्णीमधोमुखो महीमालिखति॥

॥ स्नात॰ ॥

भो अत्रभवन्तः प्राश्निकाः, कथयत कतरः पक्षो विराजते?

॥ प्राश्नि॰ ॥

किमस्मान् पृच्छसि? भिक्षुणैव मौनमवलम्बमानेन समर्थितो भवत्पक्षः।

॥ स्नात॰ ॥

तद् वयमिदानीं स्नानाय गच्छामः। अनुज्ञातुमर्हथ। भवद्भिरपि दृष्टं प्रेक्षणकम्। इदानीं यथाभिमतमनुष्ठीयताम्।

॥ भिक्षुमुद्दिश्य॥

यद्येष परलोकाय भिक्षवो भवतां श्रमः।
स्थीयतां कृतमेतेन तद्विपर्ययकारिणा॥ ३४ ॥
अथ कौरुकुचीकूर्चडम्बरालम्बनात्मकः।
जीविकार्थः प्रयत्नो ऽयं तद्यथेष्टं विधीयताम्॥ ३५ ॥

॥ इति निष्क्रान्ताः सर्वे॥

॥ प्रथमो ऽङ्कः॥

---

388 ff. NM II 508.11–12: न च ज्ञानत्वं नाम सामान्यं ग्राह्यग्राहकयोरनुगतं। गोत्वमिव शाबलेयादौ विभाति।

---

**388** न तु तदा॰ ] RT (em. ?), ननु तदा॰ Pā$^{pc}$Pu, तदा॰ Pā$^{ac}$ **389** ज्ञानं ] PāRT, शानं Pu **389** अन्वय॰ ] PāRT, अत्वय॰ Pu **389** गोत्वादि॰ ] em. RT, गोत्रादि॰ PāPu **389** ॰द्बोध॰ ] PāRT, ॰द्वोध॰ Pu **390** ॰त्वानवधारणादिति ] conj., ॰त्वावधारणादिति PāPuRT **397** अर्हथ ] RT (em. ?), अर्हत PāPu **399** ॰मुद्दिश्य ] PāRT, ॰मुद्वीश्य Pu **400** श्रमः ] em. RT, प्रेमः PāPu **402** कौरुकुचीकूर्चडम्बरालम्बनात्मकः ] em., कोभक्तचीकूर्चडंबरालंबनात्मकः PāPu, कौरुकुचीकूर्चडम्बरालम्बनाशया em. RT

॥ ततः प्रविशति चेटः। चेटः॥

ण पिवीयदि शीयला शुला
ण अ दाशीइ शमं लमीअदि।
शुलहं च ण मंशभोयणं
विशमे बम्हणवाशए इदो॥ १॥

ता किं कलीअदि? णस्ति य्येव णियभट्टके पलिहलिअ अप्पणा गब्भदाशाण गदी। आणं पि तारिशं भट्टके अवेष्कदि येशु ण खज्जदि ण पिज्यदि। जदो अज्य आणत्ते भट्टकेण हगे—अले कज्जलआ, गश्च पेक्ख खवणयवशदीए किं जिणरष्किदभिक्खू अस्ति ण व त्ति। ण अ जाणामि कहिं शा खवणअवशदी।

॥ परिक्रम्य वीथीमवलोकयन् सवितर्कम्॥

एशु विस्तिण्णलुंचिदलोमकिंशालुविशलशवलिदा एदे पंशुकणा लष्कीअंति। ता एशु य्येव लुष्कगहणे खवणअवशदीए होदव्वं।

॥ कतिचित् पदानि गत्वाग्रतो विलोक्य सहर्षम्॥

---

2 ff. न पीयते शीतला सुरा न च दास्या समं रम्यते। सुलभं च न मांसभोजनं विषमे ब्राह्मणवासक इतः॥ 6 ff. तत् किं क्रियते? नास्त्येव निजभट्टकान् परिहृत्यात्मना गर्भदासानां गतिः। आज्ञामपि तादृशीं भट्टको ऽपेक्षते (ऽवेक्षते?) यत्र न खाद्यते न पीयते। यतो ऽद्याज्ञप्तो भट्टकेनाहम्—अरे कज्जलक, गच्छ पश्य क्षपणकवसतौ किं जिनरक्षितभिक्षुरस्ति न वेति। न च जानामि कुत्र सा क्षपणकवसतिः। 11 ff. अत्र विस्तीर्णलुञ्चितलोमकिंशारुविसरशबलिता एते पांशुकणा लक्ष्यन्ते। तदत्रैव वृक्षगहने क्षपणकवसत्या भवितव्यम्।

---

**1 चेटः। चेटः** ] PāPu, चेटः RT (eyeskip) **3 शमं** ] em. RT, शेमीं Pā$^{ac}$, शमीं Pā$^{pc}$, शमीं Pu **5 विशमे** ] conj., विशंचते PāPuRT$^{ac}$(unmetrical), विशंचये RT$^{pc}$ (unmetrical) **5 बम्हणवाशए** ] conj. RT, वंम्हणवाशीइ PāPu **6 णस्ति** ] PāPu, णत्थि RT (em. ?) **6 य्येव णिय॰** ] Pā$^{pc}$Pu, य्येवा णिय॰ Pā$^{ac}$, य्येव वणिअ॰ RT (dittography) **6 अप्पणा** ] em. Isaacson, अप्पणो conj. Bhat, प्पण्णा Pā, प्पणा PuRT **6 ॰दाशाण** ] RT (em. ?), ॰दासाण PāPu **7 आणं** ] PāPu, अण्णं RT (em. ?) **7 अवेष्कदि येशु** ] conj., आविष्कदियसु PāPu, आविक्खदियसु RT (em. ?) **7 पिज्यदि** ] Pu, पिज्य*दि Pā, पिज्जदि RT **7 जदो** ] em., जदे PāPu, जाउ em. RT **8 अज्य** ] Pu, अज्य* Pā, अज्ज RT **8 आणत्ते** ] PāRT, आणत्वे Pu **8 गश्च** ] em., गच्च PāPu, गच्छ RT (em. ?) **9 जिणरष्किदभिक्खू** ] Pā, जिणरष्किदभिक्खु Pu, जिणरक्खिदभिक्खू RT (em. ?) **9 अस्ति** ] em., अत्ति PāPu, अत्थि RT (em. ?) **9 ण अ** ] em., णे अ PāPuRT **9 कहिं** ] PāRT, कहि Pu **9 शा** ] em., सा PāPuRT **11 विस्तिण्ण॰** ] conj., विस्तीए PāPuRT **11 ॰लोम॰** ] conj. RT$^{pc}$, ॰भोम॰ PāPuRT$^{ac}$ **11 ॰शवलिदा** ] em. RT, ॰सवलदा PāPu **11 लष्कीअंति** ] PāPu, लक्खीअंति RT (em. ?) **12 लुष्क॰** ] PāPu, लुक्ख॰ RT (em. ?) **12 खवणअ॰** ] PuRT, खवण्णअ॰ Pā **12 ॰वशदीए** ] em., ॰वशईप PāPu, ॰वशईए RT (em. ?) **13 सहर्षम्** ] PāRT, सहर्षीं Pu

इअं य्येव शा खवणअवशदी, जदो एशु णिलंतललदापंजलंधयाले लुष्कमूले कुविदं खवणिअं पशादेंते एशे खवणए दीशदि।

॥ क्षणं निरूप्य॥

अदिकोवणा खु एशा दुट्ठा खवणिआ या चलणपडिदं पि एदं खवणययुआणं पलिहलिअ दूलं गदा। एशे वि तवश्शी पलुशवअणे खवणए दीशदि।

॥ ततः प्रविशति पिच्छिकाहस्तः क्षपणकः। क्षपणकः, सास्रम्॥

हद्धी, परलोए दुरासाए पढमं खवणत्तणं मए गहिअं। खलिदस्स तत्थ इण्हिं दिट्ठादिट्ठा खु मे णट्ठा, जदो एसा वि दुट्ठा तावसी चलणपडिदस्स वि मे ण पसीददि।

॥ अक्षिणी प्रमृज्य॥

अइ दुट्ठा बंधइ गच्छ तुवं। किं तए विसरिसं कं वि खवणिअं ण पाविस्सं?

॥ चेटः, विचिन्त्य॥

जाव एशे खवणए मं ण पेक्खदि ताव हगे खवणिआवेशं कदुय एदं खवणअं उवहशिश्शं।

॥ आत्मानं निरूप्य॥

---

14 f. इयमेव सा क्षपणकवसतिः, यतो ऽत्र निरन्तरलतापञ्जरान्धकारे वृक्षमूले कुपितां क्षपणिकां प्रसादयन् एष क्षपणको दृश्यते। 17 f. अतिकोपना खल्वेषा दुष्टा क्षपणिका या चरणपतितमप्येतं क्षपणकयुवानं परिहृत्य दूरं गता। एषो ऽपि तपस्वी परुषवदनः क्षपणको दृश्यते। 20 ff. हा धिक्, परलोके दुराशया प्रथमं क्षपणत्वं मया गृहीतम्। स्खलितस्य तत्रेदानीं दृष्टादृष्टाः खलु मे नष्टाः, यत एषापि दुष्टा तापसी चरणपतितस्यापि मे न प्रसीदति। 24 अयि दुष्टे बन्धकि, गच्छ त्वम्। किं त्वया विसदृशीं कामपि क्षपणिकां न प्राप्स्यामि? 26 f. यावदेष क्षपणको मां न प्रेक्षते, तावदहं क्षपणिकावेषं कृत्वैतं क्षपणकमुपहसिष्यामि।

---

**14** **इअं** ] em., **इअ** PāPuRT **14** **शा** ] em., **सा** PāPu, **शे** conj. RT **14** **°वशदी** ] RT (em. ?), **°वसदी** PāPu **14** **णिलंतल°** ] em., **णिलंभल°** PāPu, **निलंतले** RT (em. ?) **14** **°धयाले** ] em. RT, **°धयाते** PāPu **14** **लुष्क°** ] PāPu, **लुक्ख°** RT (em. ?) **15** **कुविदं** ] em. RT, **कुविदंठ** PāPu **15** **पशादेंते** ] em., **एसादेंतो** PāPu, **पशादेंतो** RT (em. ?) **17** **अदि°** ] em. RT, **अधि°** PāPu **17** **एशा** ] em., **एसा** PāPuRT **18** **पलि°** ] PāPu$^{pc}$RT, **पहेलि°** Pu$^{ac}$ **18** **पलुश°** ] RT (em. ?), **पलुसे** PāPu **19** **क्षपणकः। क्षपणकः** ] PāPu, **क्षपणकः** RT (eyeskip) **19** **सास्रम्** ] PāPu, **साश्रम्** RT (typo) **20** **हद्धी** ] RT (em. ?), **हड्ढी** (?) PāPu **20** **खवणत्तणं** ] PāPu, **खवणअत्तणं** RT (em. ?) **20** **खलिदस्स** ] RT (em. ?), **खलिदस्सं** PāPu **21** **तावसी** ] RT (em. ?), **भावसी** PāPu **24** **बंधइ** ] PāRT, **वंधई** Pu **24** **तए** ] PāPu, **तुए** RT (em. ?) **24** **कं** ] em., **का** PāPu, **कां** RT (em. ?) **24** **खवणिअं** ] PāPuRT$^{pc}$, **णवणिअं** RT$^{ac}$ **26** **जाव** ] em. RT, **जाद** PāPu **26** **एशे** ] RT (em. ?), **एसे** PāPu **26** **°वेशं** ] em. RT, **°वेसं** PāPu **27** **उवहशि°** ] RT (em. ?), **उवहसि°** PāPu **28** **निरूप्य** ] Pā$^{pc}$PuRT, **निरूप्यं** Pā$^{ac}$

लंबकण्णे खु हगे। ण आणणे मश्शुलोमा मे उब्भिण्णा। ण य खवणियाण वेणिबंधे शीशे शंभावीयदि। ता शुअले मे खवणिआवेशे।

॥ तथा करोति। निरूप्य॥

पिच्छिआमेत्तशुण्णे शंपदं मे खवणिआलूए वट्टदि।

॥ अग्रतो ऽवलोक्य सहर्षम्॥

शाहु, खवणिआए शंधालिदपलिच्चइअं पिच्छिअं गेण्हिअ उवशप्पिश्शं।

॥ तथा कृत्वा॥

अय्य, पणमामि। पलिश्शंत म्हि शंपदं। ता आचक्खशु मं अज्ज कहिं भष्टके जिणरक्खिदभिक्खू वट्टदि।

॥ क्षप॰, साश्वासमात्मगतम्॥

ण एस अत्तपरंमुहो व्व मे देव्वो लक्खीयदि। अण्णा खु एसा तरुणखवणिआ उवणदा।

॥ प्रकाशम्॥

अइ बालतवस्सिणि किं तुज्झ जिणरक्खिदभिक्खुणा? परिस्संता खु दीससि। ता इह य्येव णिज्जणे सिसिरलदागहणे उवविसिअ वीसम मुहुत्तअं।

---

29 f. लम्बकर्णः खल्वहम्। नानने श्मश्रुलोमानि म उद्भिन्नानि। न च क्षपणिकाणां वेणीबन्धः शीर्षे सम्भाव्यते। तत्सुकरो मे क्षपणिकावेषः। 32 पिच्छिकामात्रशून्यं साम्प्रतं मे क्षपणिकारूपं वर्तते। 34 साधु, क्षपणिकायाः सन्धारितपरित्यक्तां (?) पिच्छिकां गृहीत्वोपसर्पिष्यामि। 36 f. आर्य, प्रणमामि। परिश्रान्तास्मि साम्प्रतम्। तदाचक्ष्व मामद्य कुत्र भट्टको जिणरक्षितभिक्षुर्वर्तते। 39 f. नैतदात्मपराङ्मुखमिव मे दैवं लक्ष्यते। अन्या खल्वेषा तरुणक्षपणिकोपनता। 42 f. अयि बालतपस्विनि, किं तव जिनरक्षितभिक्षुणा? परिश्रान्ता खलु दृश्यसे। तदिहैव निर्जने शिशिरलतागहने उपविश्य विश्राम्य मुहूर्तकम्।

---

**29 लंबकण्णे** ] em., लंबकण्णो PāRT, लंवकणो Pu **29 आणणे मश्शु॰** ] conj., आणसमस्सु॥ PāPu, आणणे शमश्शु॰ em. RT **29 उब्भिण्णा** ] RT (em. ?), उब्भिणा PāPu **29 खवणियाण** ] PāPu, खवणिआणं RT (em. ?) **30 ॰बंधे** ] em., ॰बंधो PāPuRT **30 शुअले** ] em., शुअलो PāPuRT **32 ॰शुण्णे** ] RT (em. ?), सुण्णे Pā, सुणे Pu **32 शंपदं** ] em., संपअं PāPuRT **32 वट्टदि** ] em. RT$^{pc}$, वट्ठदि PāPuRT$^{ac}$ **34 शाहु** ] em. RT, शाणु PāPu **34 ॰आए** ] RT (em. ?), ॰आले PāPu **34 शंधालिदपलिच्चइअं** ] RT (conj. ?), शंधयालिदापलिच्चइअ PāPu **34 ॰शप्पिश्शं** ] em. RT, ॰शंपिस्सं PāPu **36 अय्य** ] PāPu, अज्ज RT (em. ?) **36 पलि॰** ] RT (em. ?), पेलि॰ PāPu **36 शंपदं** ] em., संघदं PāPu, संपदं em. RT **36 अज्ज** ] conj., अज्जो* Pā, अज्जो PuRT **36 कहिं** ] PāRT, कहि Pu **37 जिणरक्खिदभिक्खू** ] PāRT$^{pc}$, जिणरक्खिदभिक्खु PuRT$^{ac}$ **37 वट्टदि** ] em. RT$^{pc}$, वट्ठदि PāPuRT$^{ac}$ **39 देव्वो** ] PāPu, दइवो RT (em. ?) **39 लक्खीयदि** ] PāPu, लक्खियदि RT (typo ?) **39 एसा** ] RT (em. ?), एशा PāPu **42 बालतवस्सिणि** ] em. RT, वालतरम्मिणि PāPu **42 दीससि** ] em., दीसदि PāPuRT **43 णिज्जणे** ] RT (em. ?), णिज्जिणे PāPu **43 वीसम** ] em. RT, वीस PāPu

॥ चेटः ॥

कुदो मे णिच्चदुक्खिदाए मंदभग्गाए वीशामे ?

॥ क्षप॰, सस्नेहम् ॥

किं इमस्सिं बालभावे वि ते दुक्खकारणं ?

॥ चेटः, निःश्वस्य ॥

अय्य, चिट्ठदु एशे मह डड्ढवुत्तंते। जिणरक्खिदभिक्खुपउत्तिं मे आचक्खदु भवं।

॥ क्षप॰ ॥

बालिए,एसो खु जिणरक्खिदभिक्खू अब्भंतरे अत्तसिस्साण मज्झे वक्खाणअं करेंतो णिअग्गोहरुक्खमूले चिट्ठदि। तुवं पुण खणं उवविसिअ वण्णेहि दाव अत्तणो णिव्वेअकारणं।

॥ चेटः, उपविश्य निःश्वस्य ॥

अय्य, किं एशु शंशालहदाए लज्जाणिहाणे वण्णीयदि ?

॥ रोदिति ॥

॥ क्षप॰, अक्षिणी चेटस्योत्पुंसयन् ॥

बालिए,वण्णेहि। हिअअणिव्विसेसो खु एसो जणो बालिआए।

॥ चेटः ॥

बालकुमालिक य्येव पव्वजिद म्हि मंदभाइणी।

॥ क्षप॰ ॥

---

45 कुतो मे नित्यदुःखिताया मन्दभाग्याया विश्रामः ? 47 किमस्मिन् बालभावे ऽपि ते दुःखकारणम् ? 49 आर्य, तिष्ठत्वेष मम दग्धवृत्तान्तः। जिनरक्षितभिक्षुप्रवृत्तिं मे आचष्टां भवान्। 52 बालिके, एष खलु जिनरक्षितभिक्षुरभ्यन्तर आत्मशिष्याणां मध्ये व्याख्यानकं कुर्वन् न्यग्रोधवृक्षमूले तिष्ठति। त्वं पुनः क्षणमुपविश्य वर्णय तावदात्मनो निर्वेदकारणम्। 56 आर्य, किमत्र संसारहताया लज्जानिधानं वर्ण्यते ? 59 बालिके, वर्णय। हृदयनिर्विशेषः खलु एष जनो बालिकायाः। 61 बालकुमारिकैव प्रव्रजितास्मि मन्दभागिनी।

---

**45** °**दुक्खि**° ] PāPu, °**दुःखि**° RT (em. ?) **45** °**भग्गाए** ] PāRT, °**भगाए** Pu **45 वीशामे** ] em., **वीशामो** PāPuRT **48 निःश्वस्य** ] RT (em. ?), **निःस्वस्य** PāPu **49 अय्य** ] PāPu, **अज्ज** RT (em. ?) **49 डड्ढवु**° ] conj., **डड्ढद्दु**° Pā (?) Pu, **दुट्टवु**° em. RT$^{ac}$, **दुक्खवु**° em. RT$^{pc}$ **49** °**रक्खिदभिक्खु**° ] PāRT, °**रक्खेदभिक्खु**° Pu **52** °**भिक्खू** ] PāPuRT$^{pc}$, °**भिक्खु** RT$^{ac}$ **52 मज्झे** ] em. RT, **मस्ते** PāPu **53 णिअग्गोह**° ] PāRT, **णिअग्गेहे** Pu **53 वण्णेहि** ] PāRT, **वणेहि** Pu **54 अत्तणो** ] PāRT, **अन्नणो** Pu **54 णिव्वेअ**° ] PāRT, **णिच्चेअ**° Pu **56 अय्य** ] PāPu, **अज्ज** RT (em. ?) **56 एशु** ] PāPu, **एशे** em. RT **56** °**हदाए** ] em. RT, °**हदए** PāPu **56** °**णिहाणे** ] PāPuRT$^{ac}$, °**णिआणे** conj. RT$^{pc}$ **57 रोदिति** ] PāPu, om. RT **59 वण्णेहि** ] Pā$^{pc}$RT, **वण्णोहि** Pā$^{ac}$, **वणेहि** Pu

तदो उण?

॥ चेटः॥

तदो ईशीशिउब्भिज्यंतविललजुव्वणलक्खणाए अणिच्छंतीए य्येव मे अशिक्खिदमअणलशाए केण वि तलुणखवणएण शीलखंडणा कदा।

॥ क्षप॰, सहर्षमात्मगतम्॥

अमअणइ य्येव मे उवणदा।

॥ प्रकाशम्॥

बालिए, ईरिस य्येव संसारट्ठिदी। तदो उण?

॥ चेटः॥

अय्य, तदो कालंतले शणिअं शणिअं मुणिअमअणलशं मं पलिहलिअ शे खवणए अण्णश्शिं डड्ढमुट्ठीए वुड्ढखवणिआए पशत्ते।

॥ क्षप॰॥

तेण हि संमुहादो †शीओ†। पंगुलअंधणाअं करेम्ह।

॥ इति चेटं कण्ठे गृहीत्वा बलाच्चुम्बति॥

॥ चेटः कृतकलज्जमधोमुखमास्ते॥

॥ क्षप॰॥

---

63 ततः पुनः? 65 f. ततः ईषदीषदुद्भिद्यमानविरलयौवनलक्षणाया अनिच्छन्त्या एव मे ऽशिक्षितमदनरसायाः केनापि तरुणक्षपणकेन शीलखण्डना कृता। 68 अमृतनद्येव मे उपनता। 70 बालिके, ईदृश्येव संसारस्थितिः। ततः पुनः? 72 आर्य, ततः कालान्तरे शनैः शनैर्ज्ञातमदनरसां मां परिहृत्य स क्षपणको ऽन्यस्यां दृढमुष्ट्यां वृद्धक्षपणिकायां प्रसक्तः। 75 तेन हि सम्मुखतः (?) †…†। पङ्गुलान्धन्यायं करवाव।

---

75 cf. NM II 390.5–6 (quoting *Sāṅkhyakārikā* 21): पुरुषस्य दर्शनार्थः कैवल्यार्थः तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगः तत्कृतः सर्गः॥

---

**63** तदो ] em. RT, ततो Pā, ततौ Pu **65** उब्भिज्यंत॰ ] em., उब्भिज्य*न्न॰ Pā, उब्भिज्यन्न॰ Pu, उब्भिज्जंत॰ em. RT **65** ॰विलल॰ ] em., ॰विरल॰ em. RT, ॰मविरल॰ PāPu **65** अणिच्छंतीए ] RT (em. ?), अणिच्छन्नीए PāPu **66** अशिक्खिदमअणलशाए ] em., असिक्खिदमअणलसाए PāPuRT **66** तलुण॰ ] em., तरुण॰ PāPuRT **68** अमअणइ ] PāPuRT$^{pc}$, ॰णई RT$^{ac}$ **70** ईरिस य्येव ] PāRT, ईरिसा य्यव Pu **70** ॰ट्ठिदी ] PāPuRT$^{pc}$, ॰ट्ठिदि RT$^{ac}$ **72** अय्य ] PāPu, अज्ज RT (em. ?) **72** कालंतले ] em., कालंतए em. RT, कोलंतए PāPu **72** शणिअं शणिअं ] em. RT$^{pc}$, सणिअं सणिअं PāRT$^{ac}$, सणिअं स॰ Pu **72** मुणिअमअणलशं ] em. RT$^{pc}$, मुणिअमअणलसं PāPuRT$^{ac}$ **72** पलिहलिअ ] RT (em. ?), पलिहे ⊔ लिअ Pā, पलिहेलिअ Pu **73** शे खवणए ] em., शेशवनए RT (em. ?), शेषवणए PāPu **73** अण्णश्शिं ] em., अण्णशिं Pā, अणशिं Pu, अण्णस्सिं RT (em. ?) **73** पशत्ते ] em., पशंते PāPuRT **75** संमुहादो ] conj., समुहादो RT (em. ?), शमुहादो PāPu

बालिए, किं मं ण पेक्खसि?

॥ चेटः॥

कहं णु पेक्खिश्शं? तए वि मं पलिहलिअ अण्णदो गंतव्वं।

॥ क्षप॰॥

बालिए, मा एवं भण। दासवत्तणिअं ते करइस्सं।

॥ चेटस्य वक्षसि हस्तं निक्षिप्य॥

किं अज्ज वि ते थणआ ण उब्भिण्णा?

॥ चेटः, सलज्जम्॥

किं हदाशा कलिश्शं?

॥ क्षप॰,
नाभिमूले चेटस्य हस्तं निवेश्य पुरुषलक्षणमस्योपलक्ष्य
सविलक्षं सकोपं च॥

हद्धी हदास, दढं तए खलीकदो म्हि।

॥ प्रहर्तुमिच्छति॥

॥ चेटः॥

अले ले तावशकामुआ, जदि किं पि आचष्कशि ता जिणरक्खिदभिक्खुणो फुङ्कलइश्शं।

॥ क्षप॰, क्षणं विमृश्य चेटस्य पादयोः पतित्वा॥

ण तए एसो परिहासो कस्स वि पगासिदव्वो।

॥ चेटः॥

---

79 बालिके, किं मां न प्रेक्षसे? 81 कथं नु प्रेक्षिष्ये? त्वयापि मां परिहृत्य अन्यतो गन्तव्यम्। 83 बालिके, मैवं भण। दासवर्तनिकं ते करिष्यामि। 85 किं अद्यापि ते स्तनकौ नोद्भिन्नौ? 87 किं हताशा करिष्यामि? 91 हा धिक्, हताश, दृढं त्वया खलीकृतो ऽस्मि। 94 अरे रे तापसकामुक, यदि किमपि आचक्षे तदा जिनरक्षितभिक्षोः फुत्करिष्यामि। 97 न त्वयैष परिहासः कस्यापि प्रकाशितव्यः।

---

**81 पेक्खिश्शं** ] em. RT$^{pc}$, पेक्खिस्सं PāPuRT$^{ac}$ **81 मं** ] RT (em. ?), म PāPu **81 अण्णदो** ] RT (em. ?), अण्णतो Pā, अणतो Pu **83 दासवत्तणिअं** ] em. Bhat, दासवत्तिणिअं PāPuRT **83 करइस्सं** ] em., कलइस्सं PāPu, कलयिस्सं RT (em. ?) **85 थणआ** ] PāRT, घणआ Pu **85 उब्भिण्णा** ] PāRT, उब्भिणा Pu **90 सविलक्षं** ] em. RT, सविलक्ष्यं PāPu **91 हद्धी** ] RT (em. ?), हद्वी PāPu **91 हदास** ] em., हदाश PāPuRT **94 तावश॰** ] em., तावस॰ PāPu, तापश॰ RT (em. ?) **94 आचष्कशि** ] em., आचष्कसि PāPu, आचक्खशि RT (em. ?) **95 फुङ्कलइश्शं** ] conj., पुत्कलइस्सं PāPu, पुङ्कलयिश्शं conj. RT, पकलयिश्शं conj. RT **96 पादयोः** ] PāRT, पादयो Pu **97 पगासिदव्वो** ] RT (em. ?), पगासिदषो PāPu

किं मे उक्कोचअं?

॥ क्षप॰ पिंछिकामूलादुद्धृत्य किमपि ददाति।

॥ चेटः॥

कदे पलिहाशे। पाविदे कहावणए। अधिगया भिष्कुणो पउत्ती। ता शंपदं गदुअ भट्टके विण्णवेमि।

॥ परिक्रम्याग्रतो ऽवलोक्य च॥

अज्य दिट्ठिआ वड्ढशि। आगदा दे हिअअवल्लहा।

॥ ततः प्रविशति यथार्थक्षपणिका।
क्षपणिकावेषं चेटं निरीक्ष्य सेर्ष्याकोपम्॥

अइ दुट्ठतावसि, एदं पारक्कं पिंछिअं गेण्हिअ कहिं गमीअदि?

॥ चेटः॥

अय्ये, गेण्ह एदं पिंछियं। हगे उण अणिच्छंति य्येव एदश्शिं लदागहणे एदिणा खवणएण खलीकदा। ण मे दोशे।

॥ इति निष्क्रान्तः॥

॥ क्षपणिका, क्षपणकनिकटमुपसृत्य॥

अरे रे दुट्ठकामुअ तावसीलंपट, पिंछिआ मे विसुमरिद त्ति जाव पडिणि-

---

99 को म उत्कोचकः? 102 f. कृतः परिहासः। प्राप्तः कार्षापणकः। अधिगता भिक्षोः प्रवृत्तिः। तत् साम्प्रतं गत्वा भट्टकं विज्ञापयामि। 105 अद्य दिष्ट्या वर्धसे। आगता ते हृदयवल्लभा। 108 अयि दुष्टतापसि, एतां पारक्यां पिच्छिकां गृहीत्वा कुत्र गम्यते? 110 f. आर्ये, गृहाणैतां पिच्छिकाम्। अहं पुनरनिच्छन्त्येवैतस्मिन् लतागहन एतेन क्षपणकेन खलीकृता। न मे दोषः। 114 ff. अरे रे दुष्टकामुक तापसीलम्पट, पिच्छिका मे विस्मृतेति यावत् प्रतिनिवृत्यागतास्मि, तावदेतस्मिन्नन्तरे क्षणमात्रकेणैवैतस्मिन् लतागहने ऽन्या क्षपणिकालिङ्गिता। तत् साम्प्रतमनुभवात्मनो विनयस्य फलम्।

---

**99 उक्को॰** ] em. RT, उत्को॰ PāPu **100 पिंछिका॰** ] Pā, पिच्छिका॰ Pu, पिच्छिका॰ em. RT **102 पलिहाशे** ] PuRT, पलिहाशो Pu **102 कहावणए** ] conj., कशेवणए RT (em. ?), कसेवतए PāPu **102 भिष्कुणो** ] PāPu, भिक्खुणो RT (em. ?) **102 शंपदं** ] PāPu, शांपदं RT (em. ?) **104 ॰ग्रतो** ] PāRT, ॰ग्रतौ Pu **104 च** ] PāPu, om. RT **105 अज्य** ] Pu, अज्य* Pā, अज्ज RT (em. ?) **105 वड्ढशि** ] em., वड्ढसि PāPuRT **106 ॰णिका** ] em. RT, ॰णिकाः PāPu **107 ॰वेषं** ] PāPu, ॰वेशं RT (em. ?) **107 सेर्ष्या॰** ] RT$^{pc}$ (em. ?), सेर्ष्य॰ PāPuRT$^{ac}$ **108 दुट्ठ॰** ] PāRT, दुट्ठं Pu **108 पारक्कं** ] em., पारक्कअं PāPuRT **108 गमीअदि** ] em., गम्मेअदि PāPu, गम्मिअदि RT **110 अय्ये** ] RT (em. ?), अय्य PāPu **110 एदश्शिं** ] PāRT, एदश्शि Pu **111 f. दोशे। इति** ] em., दोसो त्ति PāPu, दोशो। इति em. RT **113 क्षपणिका** ] RT (em. ?), क्षप॰ PāPu **114 अरे रे** ] PāPu, अरे RT (eyeskip)

वडिअ आगद म्हि ताव एदस्सिं अंतरे खणमेत्तएण य्येव एदस्सिं लदागहणे ⟨अण्णा खवणिआ आ⟩लिंगिदा। ता संपदं अणुहवसु अत्तणो विणअस्स फलं।

॥ इति पिंछिकादण्डेन प्रहरति॥

॥ क्षप॰ ॥

मा एवं संभावेदु भोदी। चेडओ खु एसो इत्थिआवेसं कदुअ मं उवहसिदुं आगदो। तेण हदासेण कोविदा भोदी। जंसच्चं, कोसं ते पिवामि।

॥ इति क्षपणिकायाः पादयोः पतति॥

॥ क्षपणिका॥

कुदो दे मुहे सच्चं, जस्स एसो उवसमो?

॥ क्षप॰ ॥

अण्णं पि खेड्डुअं दुट्ठचेडओ एसो करेदि। ता एदु भोदी अण्णतो गच्छम्ह।

॥ ससम्भ्रमम्॥

एसो खु बम्हणो को वि इदो आगच्छंतो दीसदि। ता तुवरदु भोदी।

॥ निष्क्रान्तौ॥

॥ ततः प्रविशति स्नातको बटुश्च॥

⟨॥ स्नात॰ ॥ ⟩

कृता तावद् गोष्ठी सपदि निपुणम्मन्यमनसां
मदोष्माणं तेषामरुणवसनानां शमयितुम्।
इदानीमिच्छामः कृपणमतिभिः क्रीडितुमिमे
कृपापात्रप्रायैरपि हि सह नग्नक्षपणकैः॥ २॥

---

119 f. मैवं सम्भावयतु भवती। चेटकः खल्वेष स्त्रीवेषं कृत्वा मामुपहसितुमागतः। तेन हताशेन कोपिता भवती। यत्सत्यम्, कोशं ते पिबामि। 123 कुतः ते मुखे सत्यं यस्यैष उपशमः? 125 अन्यामपि क्रीडां दुष्टचेटक एष करोति। तदेतु भवती, अन्यतो गच्छाव। 127 एष खलु ब्राह्मणः को ऽपीत आगच्छन् दृश्यते। तत् त्वरतां भवती।

---

**115** **॰णिवडिअ** ] RT (em. ?), **॰णिचडिअ** PāPu **115** **म्हि** ] RT (em. ?), **ह्मि** PāPu **115** **अंतरे** ] PāRT, **अतरे** Pu **115** **य्येव** ] em. RT, **य्येवए** PāPu **116** **⟨अण्णा खवणिआ आ॰⟩** ] conj., om. PāPu, **⟨खवणिआ आ॰⟩** em. RT **116** **विणअस्स** ] PāPu, **अविणअस्स** RT (em. ?) **117** **पिंछिका॰** ] Pā, **पिछिका॰** Pu, **पिच्छिका॰** RT (em. ?) **119** **मा** ] em. RT, **मो** PāPu **122** **क्षपणिका** ] RT (em. ?), **क्षप॰** PāPu **125** **पि** ] PāPu, **वि** RT (em. ?) **125** **करेदि** ] PāPu, **करोदि** RT (em. ?) **125** **अण्णतो** ] Pā, **अण्णदो** RT (em. ?), **अणतो** Pu **127** **बम्हणो** ] PāPu, **बम ⊔ णो** RT(typo) **128** **॥ निष्क्रान्तौ॥** ] PāPu, **॥ निष्क्रान्तौ॥ ⟨प्रवेशकः⟩** em. RT **130** **⟨स्नात॰⟩** ] em. RT, om. PāPu **131** **गोष्ठी** ] RT (em. ?), **गोष्टी** PāPu **131** **सपदि** ] em. RT, **सपसि** PāPu, **सदसि** conj. Goodall **132** **मदो॰** ] RT (em. ?), **मदौ॰** PāPu **132** **तेषाम॰** ] PāRT, **तेषां म॰** Pu

॥ बटुः ॥

अय्यस्स सा कीडा। ताण उण तवस्सीण सव्वस्सणासो।

॥ स्नात°, सस्मितम्॥

यथाह भवान्। गावः पुत्रदारं गृहं क्षेत्रं कृषिवणिज्ये सर्वमेषां विनश्यति। किं हि दिगम्बराणां भिक्षाभुजां वृक्षमूलवासिनां सर्वस्वम्?

॥ बटुः ॥

णं भणेमि। परलोयस्स कदे दारुणं दुक्खपब्भारं ते तवस्सिणो अणुहवंति। ता अय्यस्स सरस्सईपवाहे णिवडंति। ता अस्सिं आगमरुक्खए णिप्फलो य्येव एदाणं सो पआसो।

॥ स्नात° ॥

अहो कारुणिको भवान्। भवतु, भवदनुरोधान् मृदु तेषु प्रभविष्यामः। तदेहि। प्राप्ता वयमेषामाश्रमपदम्। प्रविशामस्तावत्।

॥ परिक्रामतः। स्नात°, अग्रतो ऽवलोक्य॥

अयं स न्यग्रोधतरुच्छायायामनेकशिष्यगणोपास्यमानः किमपि व्याचक्षाण इव जिनरक्षितभिक्षुरास्ते।

॥ ततः प्रविशति यथानिर्दिष्टः क्षपणकभिक्षुः। ⟨भिक्षुः⟩, स्वगतम्॥

अहो दुरतिक्रमः संसारचक्रपरिवृत्तिक्रमः।

निषिद्धं यत्नेनाप्यनुसरति तानेव विषया-
न्न तेषां वैषम्यं विमृशति विपाके बहुविधम्।
न विद्मः किं कुर्मो विशति न शिवे वर्त्मनि मनो
न शाम्यत्येवैषा निरवधिरविद्या भगवती॥ ३॥

॥ विचिन्त्य॥

---

136 आर्यस्य सा क्रीडा। तेषां पुनः तपस्विनां सर्वस्वनाशः। 141 ff. ननु भणामि। परलोकस्य कृते दारुणं दुःखप्राग्भारं ते तपस्विनो ऽनुभवन्ति। तदार्यस्य सरस्वतीप्रवाहे निपतन्ति। तदस्मिन्नागमवृक्षके निष्फल एवैतेषां स प्रयासः।

---

**136 अय्यस्स** ] PāPu, अज्जस्स RT (em. ?) **138 °दारं** ] em., °दारा PāPuRT **141 तवस्सिणो** ] PāRT, तबस्सिणे Pu **141 अणु°** ] $Pā^{pc}$PuRT, आणु° $Pā^{ac}$ **142 अय्यस्स** ] PāPu, अज्जस्स RT (em. ?) **142 सरस्सई°** ] PāRT, सरस्सइ° Pu **142 ता अस्सिं** ] conj., तस्सिं PāRT, तस्सि Pu **142 णिप्फलो** ] em. RT, णिष्फलो $Pā^{pc}$ (?), णिष्फल्ये $Pā^{ac}$ (?) Pu **143 सो** ] PāRT, से Pu **143 पआसो** ] PāRT, पेआसो Pu **145 कारु°** ] RT (em. ?), कास° PāPu **147 परिक्रा°** ] PuRT, परिका° Pā **150 क्षपणकभिक्षुः। ⟨भिक्षुः⟩, स्वगतम्** ] conj., क्षपणकभिक्षुः। स्वगतम् PāPu, क्षपणकभिक्षुः ⟨सशिष्यः⟩। भिक्षुः। आत्मगतम्। em. RT **153 °न्न** ] em. RT, °नु PāPu **153 वैषम्यं** ] em. RT, वैशद्यं PāPu **155 निरवधि°** ] $PāPuRT^{pc}$, निरवघि° $RT^{ac}$

तथापि यथाशक्ति तपस्विनो दिवानिशमनुशास्या एवामी भिक्षवः।

॥ प्रकाशम्॥

भो भिक्खवा,

पहरइ कयंतवाहो विसमा संसारवाउरापासा।
कह तरउ जीअहरिणो पज्जलियं दुक्खरण्णमिणं॥ ४॥

अहवा,

जिणचरणसुमरणोग्गयणिसग्गसुइपुण्णपुग्गलबलाणं।
कुविदो वि किं करिस्सिदि असरणसूरो हयकयंतो॥ ५॥

ता संपदं

झाइज्जदि जिणवअणं तवणियमेहिं खविज्जइ सरीरं।
इत्तियमेत्तं गिण्हह उवएसरहस्ससव्वस्सं॥ ६॥

॥ शिष्याः॥

जं भट्टके आणवेदि।

॥ स्नात°, उपसृत्य सविनयम्॥

अपि कुशलिनः शिष्यपरिषदा सह भवन्तः?

॥ भिक्षुः, सवितर्कं स्वगतम्॥

अयमसौ स्नातकः सङ्कर्षणः सौगतानभिभूय साम्प्रतमस्मान् परिबुभूषुरिहागतः। तदपसरणमेवात्र श्रेयः। दुर्विषहमस्य पौरुषम्, अपूर्वैषा वक्तृशक्तिः प्रज्ञा च।

---

159 ff भो भिक्षवः, प्रहरति कृतान्तव्याधो विषमाः संसारवागुरापाशाः। कथं तरतु जीवहरिणः प्रज्वलितं दुःखारण्यमिदम्॥ 162 ff. अथवा, जिनचरणस्मरणोद्गतनिसर्गशुचिपूर्ण (पुण्य?) पुद्गलबलानाम्। कुपितो ऽपि किं करिष्यत्यशरणशूरो हतकृतान्तः॥ 165 ff. तत् साम्प्रतम्, ध्यायते जिनवचनं तपोनियमैः क्षप्यते शरीरम्। एतावन्मात्रं गृह्णीतोपदेशरहस्यसर्वस्वम्॥ 169 यद् भट्टक आज्ञापयति।

---

**157** **°शास्या** ] RT (em. ?), °शाम्या PāPu **160** **°वाउरा°** ] em. RT, °चाउरा° PāPu **161** **पज्जलियं** ] PuRT, पज्ज*लियं Pā **161** **°रण्ण°** ] PāRT, °रण° Pu **163** **जिण°** ] PāPu, जिन° RT (typo) **163** **°सुम°** ] Pā^pc PuRT, °सुह° Pā^ac **163** **°णिसग्ग°** ] PāPuRT^pc, °निसग्ग° RT^ac **163** **°पुण्णपुग्गलबलाणं** ] conj., °पुण्णपु[[व]]लवलाणं Pā, °पुण्णपुन्नवन्नाणं Pu, °पुण्णबलाणं em. RT^ac, °पुण्णपुण्णबलाणं em. RT^pc **164** **करिस्सिदि** ] PāPu, करिस्सदि RT (em. ?) **166** **झाइज्जदि** ] RT (em. ?), झाइज्ज*दि Pā, – – – इज्जदि Pu (The lacuna is marked by one dash in the manuscript.) **166** **°मेहिं** ] PāRT, °मेहि Pu **166** **खविज्जइ** ] PuRT, खविज्ज*इ Pā **166** **सरीरं** ] PāPuRT^pc, सरीरम् RT^ac **167** **रहस्ससव्व°** ] PāRT, रहस्सव्व° Pu **172** **स्वगतम्** ] RT (em. ?), स्वग। PāPu **173** **स्नातकः सङ्कर्षणः** ] RT (em. ?), स्नातकसङ्कर्षण PāPu **173** **सौग°** ] PāRT, सोग° Pu **173** **°मस्मान्** ] em. RT, °मस्मात् PāPu **174** **वक्तृ°** ] RT (em. ?), चक्तृ° PāPu

॥ प्रकाशम् ॥

स्वागतमार्यस्य। इत उपविश्यताम्। कुशलम्।

॥ स्नात॰ ॥

किमत्र प्रस्तुतम्?

॥ भिक्षुः ॥

किमत्र संसारगहने प्रस्तूयते? यदि सन्तरणोपायः कोऽपि प्राप्यते।

॥ स्नात॰ ॥

ननु गृहीत एवात्रभवद्भिरुपायः। तथा हि,

न हिंसा नासत्यं न गृहधनवासव्यसनिता
न सक्तिर्व्यापारे क्वचिदपि भवानन्तरफले।
तपश्चेदं तीव्रं व्रतनियमसम्बाधमनघं
ग्रहीतव्या कान्या सरणिरिह संसारतरणे॥ ७॥

॥ भिक्षुः ॥

अनुकूलालापपेशलैव भवादृशां निर्मिता प्रजापतिना रसना।

॥ स्नात॰ ॥

भिक्षो, तथाप्युच्यतां कः प्रदेशो व्याख्यातुमुपक्रान्त इति।

॥ भिक्षुः ॥

महदत्र कौतुकम्? आर्हतानामनेकान्तवाद एव गृहकृत्यम्। स एव चेह प्रस्तुतः।

॥ स्नात॰ ॥

भिक्षो, यदुच्यते,

एको भावः सर्वभावस्वभावः
सर्वे भावा एकभावस्वभावाः।
एको भावस्तत्त्वतो येन दृष्टः
सर्वे भावास्तत्त्वतस्तेन दृष्टाः॥ ८॥

इति, तत्रेदमिह भवन्तं पृच्छामः,

---

**183** ॰भव॰ ] PāPu$^{pc}$RT, ॰वव॰ Pu$^{ac}$ **184** हिंसा नासत्यं ] PuRT, हिंसानामसत्यं Pā **184** ॰धन॰ ] conj., ॰वन॰ PāPuRT **185** सक्ति॰ ] conj. Isaacson, शक्ति॰ PāPuRT **185** क्वचिदपि ] Pā$^{pc}$PuRT, क्वदाचिदपि Pā$^{ac}$ **185** भवान॰ ] PuRT, भवने॰ Pā **187** कान्या ] RT (em. ?), कात्या PāPu **189** अनुकूलालापपेशलैव ] em. RT, अनुकूललापपेशले च Pā$^{pc}$Pu, अनुकूललापे पेशले च Pā$^{ac}$ **189** भवादृशां ] PāRT, भवादशां Pu **193** कौतुकम् ] PāRT, कोतुकम् Pu **194** प्रस्तुतः ] PāRT, प्रस्नुतः Pu **196** यदुच्यते ] em. RT, यमुच्यते PāPu **199** दृष्टः ] PāRT, दष्टः Pu

एको भावश्चेत् सर्वभावस्वभावो
लोकः कार्यार्थी कुत्र कं वा नियुङ्काम्।
स्वे स्वे कार्ये चेदस्ति भावव्यवस्था
नैको भावः स्यात् सर्वभावस्वभावः॥ ९॥
रूपं यद्यपि भावानां तुल्यं किमपि दृश्यते।
तथाप्यनन्यगाम्येषामस्ति प्रातिस्विकं वपुः॥ १०॥
एवं त्वनिष्यमाणे ऽस्मिन् पदार्थनियमे जनः।
नादृष्टार्थां न दृष्टार्थामारभेत क्वचित् क्रियाम्॥ ११॥

॥ भिक्षुः संज्ञया शिष्यं निर्दिशति॥

॥ शिष्यः, साकूतम्॥

भट्टका, भिक्खवा विण्णवंति चिलायदि भट्टके, ता संपदं अम्ह पत्थुदकज्ज-वेला अदिक्कमदि त्ति।

॥ भिक्षुः, स्नातकं प्रति॥

आर्य, भिक्षुकार्यमवसीदति। तद्भवन्तः प्रमाणम्।

॥ स्नात॰ ॥

भिक्षो, यथामतमनुष्ठीयताम्।

॥ भिक्षुः, शिष्यानुद्दिश्य॥

अरे रे तुरिदतुरिदं गडुय भिक्खूणं भण, जहा अप्पमत्ता खणं तत्थ य्येव विलंबध, एस आगदो म्हि त्ति।

॥ निष्क्रान्तः सशिष्यो भिक्षुः॥

॥ स्नात॰ ॥

---

212 f. भट्टक, भिक्षवो विज्ञापयन्ति, चिरायते भट्टकः। तत् साम्प्रतमस्माकं प्रस्तुतकार्यवेलातिक्रामतीति। 219 f. अरे रे त्वरितत्वरितं गत्वा भिक्षूणां भण यथाप्रमत्ताः क्षणं तत्रैव विलम्बध्वम्, एष आगतो ऽस्मीति।

---

**203** नियुङ्काम् ] em. RT, नियुंक्तात् PāPu **205** ॰भावस्वभावः ] RT (em. ?), ॰भावः स्वभावः PāPu **207** ॰न्यगा॰ ] Pā$^{pc}$PuRT, ॰न्यया Pā$^{ac}$ **207** प्राति॰ ] em. RT, प्रति॰ PāPu **208** त्वनिष्यमाणे ] PāPu, त्वन्विष्यमाणे RT (em. ?) **208** ॰नियमे ] em. RT, ॰नियमो PāPu **209** नादृष्टार्थां न ] conj. Isaacson, न दृष्टार्थेन PāRT, न दष्टार्थेन Pu **211** साकूतम् ] PāRT, साकुतम् Pu **212** विण्णवंति ] PuRT, विष्णवंति (?) Pā **212** चिलायदि ] em. RT, विलायदि PāPu **212** संपदं ] PāPu, सपदं RT (typo ?) **212** अम्ह ] PāPu, अम्हे RT (em. ?) **213** ॰कज्ज॰ ] ॰कज्ज॰ PuRT, ॰कज्ज * ॰ Pā **213** अदिक्कमदि ] RT (em. ?), अदिष्कमदि PāPu **213** त्ति ] RT (em. ?), त्ति। न PāPu **215** भिक्षुकार्यम॰ ] em. RT, भिक्षुः। कार्यम॰ PāPu$^{pc}$, भिक्षुः। कार्यभ॰ Pu$^{ac}$ **219** य्येव ] PāPu, य्यैव RT (em. ?) **220** आगदो म्हि ] RT (em. ?), आगदु म्हि PāPu

बटो, दृष्टमस्य भवता दिगम्बरस्य वैदग्ध्यम्।

॥ बटुः॥

अय्य, को तुज्झ वादसमरे संमुहो ट्ठादुं सक्कुणोदि? ता इमिणा ववएसपलायणेण रक्खिदो णेण अप्पा।

॥ स्नात॰॥

किमस्माभिरस्य लगुडैः प्रहर्तव्यम्? वस्तु ज्ञातव्यम्। तच्च ज्ञातमेव। अस्माभिस्तु त्वदनुरोधादेव नात्र कार्कश्येन व्यवहृतम्।

॥ बटुः॥

मउओ वि हडइ हिअअं वादब्भिडिआण अय्यवाहारो।
मीणाण थलगयाण †ए भावो सिसिरे विस्तरस्स†॥ १२॥

॥ स्नात॰॥

बटो, तत् क्वेदानीं गम्यताम्?

॥ बटुः॥

णं ण्हादुं कीस ण गमीयदि?

॥ स्नात॰। सस्मितम्॥

किं बुभुक्षितो वर्तसे?

॥ ऊर्ध्वमवलोक्य॥

कः खल्वधुनैव स्नानस्य कालः? तद् वरमिहैवार्हतवसतिवनगहने मुहुर्विहरामः।

॥ बटुः॥

एवं करीयदु।

॥ उत्थाय परिक्रामतः।

॥ स्नात॰। अग्रतो ऽवलोक्य सविस्मयम्॥

---

225 f. आर्य, कस्तव वादसमरे सम्मुखः स्थातुं शक्नोति? तदनेन व्यपदेशपलायनेन रक्षितो ऽनेनात्मा। 231 f. मृदुको ऽपि घट्टते हृदयं वादनियुक्तानाम्(?) आर्यव्याहारः। मीनानां स्थलगतानां †...† 236 ननु स्नातुं कस्मान् न गम्यते? 243 एवं क्रियताम्।

---

**223** **॰मस्य भवता** ] Pā, **॰मस्यभवतां** Pu, **॰मत्रभवतो**em. RT **225** **तुज्झ** ] PāRT, **तुम्ह** Pu **225** **इमिणा** ] PāPuRT$^{pc}$, **इमिना** RT$^{ac}$ **225** **ववएस॰** ] em. RT, **धवएस॰** PāPu **226** **णेण** ] em. RT, **णे** PāPu **229** **अस्माभिस्तु** ] em., **अस्माभिस्त्व** PāPu, **अस्माभिः। तत्** em. RT **229** **कार्क॰** ] em. RT, **काकी॰** PāPu **232** **मीणाण** ] RT (em. ?), **मीणेण** PāPu **232** **॰गयाण** ] RT (em. ?), **॰गायाण** PāPu **236** **कीस ण** ] conj., **ण कीस** PāPuRT **236** **गमीयदि** ] em., **गम्मीयदि** PāPuRT **237** **स्नात॰। सस्मितम्** ] RT (em. ?), **स्नात। सस्नात। सस्मितं** PāPu

अहो रम्यः प्रशमसमुचितो ऽयमुद्देशः। तथा हि,

घनस्निग्धच्छायं वनमिदमिमाः शाद्वलभुवः
पयश्चेदं पुष्पोत्करसुरभयो वायव इमे।
मृगाणामत्रामी विहरणविलासा बहुविधाः
खगानां चानेकस्वरविसरभिन्ना विरुतयः॥ १३॥

॥ विचिन्त्य॥

इहारण्ये पुण्ये यदि भवति वेदान्तनिरतो
निवृत्ताशीरात्मा नियमितमनोवृत्तिनिवहः।
दिनैरल्पैरेव व्यपगतभवाध्वश्रमजवं
ध्रुवं नित्यानन्दं किमपि परमं धाम लभते॥ १४॥

॥ नेपथ्ये॥

वेयंता दुत्तरंता तइकहियकहावित्थरा संकुलत्था
अय्येहिं तत्थ चिंतीयदि गहणगदी अत्थि णत्थित्ति अप्पा।
दूरे चिट्ठंतु ते मे परिहरिदुमिदं घोरसंसारदुक्खं
संक्खित्तं णिम्मलत्थं जिणमुणिभणिदं आगमं आहरम्हा॥ १५॥

॥ बटुः॥

अय्य, एसो खु कासाअवसणो तावसो ईरिसं किं पि मंतंतो तुरिदतुरिदं परिक्कामदि।

॥ ततः प्रविशति तापसः॥

॥ तापसो वेअन्ता इति पठन् परिक्रामति॥

॥ बटुः॥

अज्ज वि जिणसासणे य्येव एयाण अहिणिवेसो?

॥ स्नात॰॥

---

257 ff. वेदान्ता दुस्तरान्ताः, त्रयीकथितकथाविस्तराः संकुलार्थाः, आर्यैः तत्र चिन्त्यते गहनगतिरस्ति नास्तीत्यात्मा। दूरे तिष्ठन्तु ते मे। परिहर्तुमिदं घोरसंसारदुःखं संक्षिप्तं निर्मलार्थं जिनमुनिभणितमागममाधराम। 262 f. आर्य, एष खलु काषायवसनः तापस ईदृक् किमपि मन्त्रयन् त्वरितत्वरितं परिक्रामति। 267 अद्यापि जिनशासन एवैतेषामभिनिवेशः?

---

**248** पुष्पो॰ ] RT (em. ?), पुष्पा॰ PāPu **252** भवति ] भवति PuRT, सवंति Pā **254** ॰भवाध्व॰ ] PāRT, ॰भभाध्व॰ Pu **257** तइ॰ ] em. RT, दुइ॰ PāPu **258** गहण॰ ] RT (em. ?), गहन॰ PāPu **259** परिहरि॰ ] RT (em. ?), परिहर॰ PāPu **260** आहरम्हा ] RT (em. ?), आहरंम्हा PāPu **262** ईरिसं ] PāRT, इरिसं Pu **264** f. तापसः। तापसो ] PāPu, तापसः। RT **267** जिणसासणे ] RT (em. ?), जिणसासण PāPu **267** अहिणिवेसो ] em. RT, अहिणिविसो PāPu

बटो, तिष्ठत्वेतत्। किमनेन? अन्यदेवैनं पृच्छामः।

॥ तापसमुद्दिश्य॥

भोस्तपोधन, क्वेदमाकुलाकुलमिव गम्यते भवता?

॥ ताप॰ ॥

बम्हणो खु तुवं। ता किं अत्तणो भुक्खावेअणं ण आणासि?

॥ स्नात॰ ॥

किं भवान् भोक्तुं प्रस्थितः?

॥ ताप॰ ॥

अध इं?

॥ स्नात॰ ॥

क उद्देशो गन्तव्यः?

॥ ताप॰ ॥

णं इह य्येव जिणरक्खिदभिक्खुतवोवणे अज्ज महाभोअणं वट्टदि।

॥ स्नात॰ ॥

महाभोजने को हेतुः?

॥ ताप॰ ॥

केण वि भयवदो जिणगुरुणो सासणगदेण ठक्कुरेण अज्ज तहिं महाभोअणं उववादिदं, जत्थ पव्वइयसहस्साइं संघडिदाइं। ताण अ सत्तूण रासीओ, तेल्लघडिआ, कंचिअकुंभीओ, गुडकूडया, तेल्लपक्काण भक्खाण पव्वया उवणीआ।

॥ स्नात॰ ॥

भोस्तपोधन, अथात्र मध्ये दधिक्षीरघृतादि नाम न किञ्चिद् गृह्णासि?

---

273 ब्राह्मणः खलु त्वम्। तत् किमात्मनो बुभुक्षावेदनं न जानासि? 277 अथ किम्? 281 नन्विहैव जिनरक्षितभिक्षुतपोवने ऽद्य महाभोजनं वर्तते। 285 ff. केनापि भगवतो जिनगुरोः शासनगतेन ठक्कुरेणाद्य तत्र महाभोजनमुपपादितम्, यत्र प्रव्रजितसहस्राणि संघटितानि। तेषां च सक्तूनां राशयः, तैलघटिकाः, काञ्जिककुम्भयः, गुडकूटकाः, तैलपक्वानां भक्ष्याणां पर्वताः उपनीताः।

---

**269** अन्यदेवैनं ] em. RT, अन्यदैवेनं PāPu **271** क्वे॰ ] PuRT, क्षे॰ Pā **273** बम्हणो ] PāRT, वम्हाणो Pu **273** तुवं ] em. RT, तवं PāPu **281** महाभो॰ ] PāRT, महभौ॰ Pu **281** वट्टदि ] em., वट्ठदि PāPuRT **285** सासण॰ ] PāPuRT$^{pc}$, सासन॰ RT$^{ac}$ **285** ॰गदेण ] Pā$^{pc}$RT, ॰गदेन Pā$^{ac}$, ॰गदेगे Pu **286** उववादिदं ] em. RT, उदवादिदं PāPu **286** रासीओ ] Pā, रासीउ Pu, रासीअ RT (typo?) **287** तेल्लपक्काण ] em. RT, तैलपक्षणे PāPu **288** उवणीआ ] RT (em. ?), ओवणीआ PāPu **290** मध्ये ] PāPuRT$^{pc}$, मघ्ये RT$^{ac}$ (typo) **290** ॰घृतादि ] RT (em. ?), ॰ष्टतादि PāPu **290** किञ्चिद् ] PuRT, किञ्चि Pā

॥ ताप॰ ॥

अहह, तुम्हाणं बम्हणाण एदे समाआरा। अम्ह उण तवोहणा पाणिसंभवं किं पि ण असणे ण पाणे ण वसणे ण सअणे ण आसणे ण अण्णत्थ कत्थ वि सरीरोवअरणे विणिवेसेम्ह। णं मम य्येव इमे रुक्खविदलणिम्मिदे उवाणहिए किं ण पेक्खसि? ता भोदु इमिणा कहावित्थरेण। भोअणसमओ मे अदिक्कमदि।

॥ स्नात॰ ॥

ममाप्यादेशय पन्थानम्। वयमपि तपोधनविभूतिं पश्यामः।

॥ ताप॰ ॥

एवं करीअदु, एवं करीअदु। ता एदु भवं।

॥ सर्वे परिक्रामन्ति॥

॥ स्नात॰ ॥

भोस्तपोधन, जिनशासनं प्रतिपन्नो भवान् कथं काषायवासाः? अपि सुगत एव जिनो भवताम्?

॥ ताप॰ । सस्मितम्॥

अम्हाणं अ सुगदो भअवं जिणगुरू। किं च जिणगुरू सुगदो होदि। अहो भद्दा अम्हे आरहदा, के वि दियंबरा, के वि रुक्खविदलमेत्तवसणा, के वि रत्तवासा, के वि सेअवडा। पेक्ख दाव। इदो इमे णिद्दयलुंचणप-

---

292 अहह, युष्माकं ब्राह्मणानामेते समाचाराः। वयं पुनः तपोधनाः प्राणिसम्भवं किमपि नाशने, न पाने, न वसने, न शयने, नासने, नान्यत्र कुत्रापि शरीरोपकरणे विनिवेशयामः। ननु ममैवेमौ वृक्षविदलनिर्मितावुपानहिकौ किं न प्रेक्षसे? तद् भवत्वनेन कथाविस्तरेण। भोजनसमयो मे ऽतिक्रामति। 299 एवं क्रियताम्, एवं क्रियताम्। तदेतु भवान्। 305 ff. अस्माकं च सुगतो भगवान् जिनगुरुः। किं च जिनगुरुः सुगतो भवति। अहो भद्रा वयमार्हताः, के ऽपि दिगम्बराः, के ऽपि वृक्षविदलमात्रवसनाः, के ऽपि रक्तवाससः, के ऽपि श्वेतपटाः। प्रेक्षस्व तावत्। इत इमे निर्दयलुञ्चनप्रसङ्गलक्ष्यमाणलोममूलविगलत्प्रविरलतनुकशोणितकणाः दिगम्बराः। इतः खल्विमे †...†चर्च्यमानकोमलवल्कलाञ्चलाः चीरवसनाः। इत इमे तत्क्षणपक्वकन्दूद्धृतशरावसदृशवर्णवसनाश्च ब्रह्मचारिणः तपोधनाः। इत इमे हंसपक्षपाण्डुरपवनलुलितपटपल्लवाः श्वेतपटाः। तदहो पुण्यभाजनं स ठक्कुरः यस्येमे ऽद्यानुग्रहं करिष्यन्ति।

---

**292** तुम्हाणं ] PāPu, तुम्हाण RT (typo?) **292** समाआरा ] PāRT, समाआण Pu **292** अम्ह ] RT$^{ac}$ (em. ?), अम्हे RT$^{pc}$, अह्म PāPu **293** अण्णत्थ ] PāRT, अणत्थ Pu **294** रुक्ख॰ ] PāRT, कुरक॰ Pu **297** ममाप्या॰ ] em. RT, समाप्या॰ PāPu **302** भोस्तपो॰ ] PuRT, भोस्त्वपो॰ (?) Pā **305** अम्हाणं ] RT (em. ?), अह्माणं PāPu **305** सुगदो ] RT (em. ?), मुगदो Pā$^{pc}$Pu, मुदो Pā$^{ac}$ **305** सुगदो ] em. RT, मुग्गदो PāPu **306** भद्दा अम्हे आरहदा ] conj., भद्दा आरहदा भावअम्हो आरहदा PāPuRT **306** के वि ] RT (em. ?), के चि PāPu **307** सेअवडा ] em. RT, सेअवटा PāPu **307** णिद्दय॰ ] PāPuRT$^{pc}$, निद्दय RT$^{ac}$

संगलक्खिज्जंतलोममूलवियलंतपविरलतणुअसोणिअकणा दियंबरा। इदो खु इमे †चत्तुलवसूर†चच्चिज्जंतकोमलवक्कलंचला चीरवसणा। इदो इमे तक्खण-पक्ककंदुउद्धरिअसरावसरिसवण्णवसणा अ बम्हआरिणो तवोहणा। इदो इमे हंसपक्खपंडुरपवणलुलिदपडपल्लवा सेअवडा। ता अहो पुण्णभाअणो सो ठक्कु-रो जस्स इमे अज्ज अणुग्गहं करिस्संति।

॥ स्नात॰। सस्मितमात्मगतम्॥

पुण्यभाजनमुच्यते, नानर्थकारीति।

न चिन्तयति दन्तिनं न तुरगं न कौक्षेयकं
न वर्त्म न करग्रहं न कटकाङ्गमुष्ट्यादि वा।
इह क्षपितवित्तसारमवलुप्तसेवाविधिं
विधास्यति नराधिपो ध्रुवमिमं विभूतिच्युतम्॥ १६॥

॥ प्रकाशम्॥

अहो तपोवनस्य प्रशान्तरमणीयता!

शममयमिव दृश्यते जग-
न्नियममयीव चकास्ति मेदिनी।
इह खलु भवपाशपङ्क्तयो
विशकलिता इव भान्ति देहिनाम्॥ १७॥

॥ बटुः॥

दिट्ठा दिअंबरा चीरवसणा कासायवासा सेअवडा। ता संपदं इदो इमे णीलंबरा दीसंतु।

॥ स्नात॰। अग्रतो ऽवलोक्य सविस्मयम्॥

अहो बतापूर्वमिदं तपः। एकनीलवसनावृताविमौ स्त्रीपुंसौ किमप्यतिपेशलं

---

326 f. दृष्टा दिगम्बराः चीरवसनाः काषायवाससः श्वेतपटाः। तत् साम्प्रतमित इमे नीलाम्बरा दृश्यन्ताम्।

---

**308** ॰लक्खिज्जंत॰ ] PāRT, ॰लखिज्जंत॰ Pu **308** इदो ] PāPu$^{pc}$RT, ज्ज Pu$^{ac}$ **309** चत्तुल॰ ] PāPu, वत्तुल॰ RT (em. ?) **309** ॰ज्जंत॰ ] PuRT, ॰ज्ज*त॰ Pā **309** ॰व-क्कलं॰ ] RT (em. ?), ॰वत्कूलं॰ (?) Pā, ॰वत्कूजं Pu **309** इदो इमे ] PāPu, इदो खु इमे RT (em. ?) **310** ॰पक्क॰ ] em. RT, ॰पक्ष॰ PāPu **310** बम्ह॰ ] PāPu, बह्म॰ RT (ty-po ?) **310 f.** इदो इमे... सेअवडा। ] PāPu, om. RT **311** ॰पंडुर॰ ] em., ॰पंदुर॰ PāPu **311** ॰लुलिद॰ ] em., ॰लुलित॰ PāPu **311** पुण्ण॰ ] PāRT, पुण॰ Pu **312** ठक्कुरो ] RT (em. ?), ठक्करो PāPu **314** ॰कारीति ] em. RT, ॰कानीति PāPu **315** चिन्तयति ] RT (em. ?), चिंतयंति PāPu **320** तपोवनस्य ] em. RT, तपोधनस्य PāPu **326** चीर॰ ] Pā$^{pc}$PuRT, चीरा॰ Pā$^{ac}$ **326** णीलंबरा ] PāPu, णीलंबला RT (em. ?) **329** ॰नावृ-ता॰ ] RT (em. ?), ॰नाधृता॰ PāPu

गायन्तौ सह विहरतः।

॥ निपुणं निर्वर्ण्य॥

कथम्? अनेकसङ्ख्यान्येतानि दृश्यन्ते। भवतु, अतिविप्लुता पृथिवी, उत्सन्ना त्रयी।

॥ तापसमुद्दिश्य॥

भोस्तपोधन, विदितो ऽयं तव नवः को ऽपि तपसां प्रकारः?

॥ ताप॰ ॥

अहं एदं ण आणामि को एसो चउरणियममग्गो। एदं खु तक्केमि इध महाभोअणकिंवअंतिं सुणिअ भोयणमेत्तलालसा के वि एदे परिब्भमंति। ता भोदु एदाणं वुत्तंतेण। समाणचरिआणं य्येव मज्झं वच्चामि।

॥ इति निष्क्रान्तः॥

॥ ततः प्रविशत एकनीलपटप्रावृतौ गायन्तौ स्त्रीपुंसौ,
विभवानुसारेण वा बहूनि तथाविधानि मिथुनानि गायन्ति॥

जयइ मुणी णीलंबरणाहो जेण समिओ भवसंवरगाहो।
जसु भअवं तुह सासण णोक्खं पिज्जइ किं पि रसाअणसोक्खं।
भवे भुंजिज्जइ इत्थिअसुक्खं परलोए पाविज्जइ मोक्खं।
सो सिज्झइ सरीरडा लंघिज्जइ संसारडा।
तो अण्णे जे पुण आसमा ताण णिबंधहु आस मा।

---

337 ff. अहमेतन्न जानामि क एष चतुरनियममार्गः। एतत् खलु तर्कयामि, इह महाभोजनकिंवदन्तीं श्रुत्वा भोजनमात्रलालसाः के ऽप्येते परिभ्रमन्ति। तद् भवत्वेतेषां वृत्तान्तेन, समानचर्याणामेव मध्यं व्रजामि। 343 जयति मुनिर्नीलम्बरनाथो येन शमितो भवसंवरग्राहः। 344 यस्य भगवन् तव शासनमपूर्वम्, पीयते किमपि रसायनसौख्यम्। 345 भवे भुज्यते स्त्रीसौख्यं परलोके प्राप्यते मोक्षः। 346 तत् सिध्यति शरीरं लङ्घ्यते संसारः। 347 अतो ऽन्ये ये पुनराश्रमास्तेषां निबन्धताशां मा।

---

**330** ॰पेशलं गा॰ ] PuRT, ॰पेशलगा॰ Pu **332** ॰सङ्ख्यान्येतानि ] em. RT, ॰संख्यान्यस्तनि Pā, ॰संख्यन्येस्तनि Pu **337** आणामि ] em. RT, याणामि PāPu **337** चउर॰ ] em. RT, चउ॰ PāPu **337** ॰मग्गो ] PāRT, ॰मग्गे Pu **337** इध ] em. RT, इव PāPu **338** ॰किंवअंतिं ] RT (em. ?), ॰किंचअत्तिं PāPu **338** सुणिअ ] RT (em. ?), मुणिअ PāPu **338** भोदु ] em. RT, भोपु PāPu **339** वुत्तंतेण ] RT (em. ?), वुत्तन्नेण PāPu **339 f.** वच्चामि। इति ] em. RT, वच्चामि त्ति PāPu **343** समिओ ] PāPu, समिउ RT (em. ?) **344** पिज्जइ ] PuRT, पिज्ज*इ Pā **344** ॰सोक्खं ] em. RT, ॰मोक्खं PāPu **345** भवे ] em. RT, भव PāPu **345** भुंजिज्जइ ] PuRT, भुंजिज्ज*इ Pā **345** इत्थिअ॰ ] RT (em. ?), इत्तिअ॰ PāPu **345** पाविज्जइ ] PuRT, पाविज्ज*इ Pā **345** मोक्खं ] conj. RT, मड – – – PāPu (The lacuna is marked by two dashes in the manuscripts.) **346** सो सिज्झइ ] RT (em. ?), सोसिज्ज*इ Pā, सोसिज्जइ Pu **346** लंघिज्जइ ] PuRT, लंघिज्ज*इ Pā **346** संसारडा ] PāPu[pc]RT, संसाराडा Pu[ac]

परिसोसिज्जइ देहडा मोक्खहि पुण संदेहडा।
सिक्खाजोए काइ विढप्पइ पुरुसु परव्वसु परिसम्मप्पइ।
गुण परिअज्जिअ जइ विसर सो वि उ पुरुसह भोअहर।
पमढिउ संगमु जेण इ एसो †तांहसोणिव्वलुसहजसहाउणिर ⁻⁻⁻†
इदि जइ जुअ जुअ विजाणि ⁻⁻⁻
पुणु भोअ।
सरीरेहि कं पएस भमंता कं पअं अज्जंति अणिट्ठिअजम्मा।
जइ परमप्पविवत्तु इंउ जइ वा सद्दविवत्तु इंउ।
तो वि अविज्जापसमे विणु कह इंउ सअलु ⁻⁻⁻ ।
†सतत्तु† एम जे अण्णे वि आगम विहला सअल मुणेवि।
एत्थ परत्थ वि सुहु लहहु मुणिणीलंबर लेवि ⁻⁻⁻ ॥

---

348 परिशोष्यते देहो मोक्षे पुनः सन्देहः। 349 शिक्षायोगे किं विधाप्यते (= अर्ज्यते), पुरुषः परवशः परिसमाप्यते। 350 गुणानां पर्यर्जितो यदि विसरः, सो ऽपि च पुरुषाणां भोगहरः। 351 परिवेष्टितः संगमो येन हि एषः, †...†। 352 इति यदि युगं युगं विजानाति (?) ⁻⁻⁻ 353 पुनर्भोगं (?) 354 शरीरे कं प्रदेशं भ्रमन्तः किं पदमर्जन्ति अनिष्ठितजन्मानः। (?) 355 यदि परमात्मविवर्त इदं, यदि वा शब्दविवर्त इदं। 356 तदाप्यविद्यापशमेन विना कथमिदं सकलं ⁻⁻⁻ 357 f. †...† एवं ये अन्ये ऽप्यागमा विफलान् सकलान् ज्ञात्वा। अत्र परत्रापि सुखं लभध्वं मुनिनीलाम्बरं लात्वा ⁻⁻⁻ ॥

---

**348** परिसोसिज्जइ ] PuRT, परिसोसिज्ज*इ Pā **348** पुण ] em. RT, पुरो PāPu **349** सिक्खाजोए ] PāRT, सिक्खाजोइंए Pu **349** काइ ] PāPu, काइं em. RT **349** विढप्पइ ] em. RT, विडप्पइ PāPu **349** परिसम्मप्पइ ] em. RT, परसमप्पइ PāPu **350** गुण ] PāRT, गुणं Pu **350** परिअज्जिअ ] em. RT, परिआजिअ PāPu **350** सो ] conj., तो PāPuRT **350** वि उ ] RT (em. ?), चिउ PāPu **351** पमढिउ ] conj. Sanderson, पढमं उ PāPu, पढमउ em. RT **351** संगमु ] conj., संगंत PāPu, संगउ em. RT **351** इ एसो ] PāPu, एइसो em. RT **351** तां ... णिर ⁻⁻⁻ ] PāPu (The lacuna is marked by a dash in the manuscripts.), ता हंसो णिव्वलु सहजसहाउ निरेइसो conj. Sanderson, ता हंसो णिव्वलु सहजसहाउ निरासो em. RT **352** इदि ] Pu, इदी PāRT **352** जुअ जुअ ] PāRT, जुअ जु Pu **352** विजाणि ⁻⁻⁻ The lacuna is marked by nine lines of dashes in Pā and by nine lines of empty space in Pu. **354** पएस ] conj., पएम PāPu, पाएम RT (em. ?) **354** पअं ] conj., पम PāPuRT **354** अज्जंति ] conj., अजंति PāPuRT **354** °जम्मा ] conj., °जम्म PāPu **355** जइ ] conj., जेइ PāPuRT **355** जइ ] em. RT, जाइ PāPu **355** °वत्तु इंउ ] conj., °वत्तु इं PāPuRT **356** तो वि ] conj., भोवि PāPu, भोदि em. RT **356** °पसमे ] PāPu$^{pc}$, °पसमेइ Pu$^{ac}$, °पसमेइं RT (em. ?) **356** कह इंउ ] PāRT, कदइंउ Pu **356** ⁻⁻⁻ ] conj. **357** अण्णे ] RT (em. ?), अण्ण Pā, अण Pu **357** मुणेवि ] em. RT, मुणवि PāPu **358** परत्थ ] RT (em. ?), परत्त PāPu **358** वि ] PāPu$^{pc}$RT, विवि Pu$^{ac}$ **358** °णीलंबर लेवि ⁻⁻⁻ ] conj., °णीलंबलेवि PāPu, °नीलंबरवरे वि conj. RT

॥ स्नात° । चिरं गीतमाकर्ण्य ॥

बटो, गीतव्यपदेशमशेषदर्शनाक्षेपकं केनापि कल्पितं वादस्थानकमिदम् । अहं तु प्रायश्चित्तभीरुर्न शक्नोम्येव कश्मलैरेभिर्वाचं मिश्रयितुम् ।

॥ स्त्रीपुंसौ पुनस्तदेव गायतः ॥

॥ स्नात° ॥

बटो, पश्य,

वाचः काचन नास्ति शुद्धिरवमः कायो ऽपि शौचोज्झित-
श्चेतो निर्विचिकित्सकुत्सिततरव्यापारनित्योत्सवम् ।
नो जाने परलोकनिर्भयधियः कस्यावदातं तप-
श्चर्याश्चर्यमिदं ⟨न⟩ कश्चिदथ वा पुंसामवद्यो विधिः ॥ १८ ॥

अपि च,

स्वच्छन्दं चर्च्यमानोच्चरति चिरमियं चर्चरीगीतगोष्ठी
पीयन्ते कान्तवक्त्रासवशवलरसान्यस्तशङ्कं मधूनि ।
तन्यन्ते तन्त्रवस्तुव्यवहितनियतप्रस्तुतान्योन्यशृङ्गै-
रङ्गैश्चेष्टा यथेष्टा व्रतमतिसुभगं सेव्यते केन नैतत् ॥ १९ ॥

⟨॥ बटुः ॥⟩

एवं णेदं जधा अय्यो मंतेदि ।

॥ स्नात° ॥

मम चेयं सम्भावना ⟨यन्⟩ नूतनमद्यप्रवृत्तमिदं महाव्रतम् । अतिप्रसृते गायमाने ऽस्मिन्नतिमात्रं विप्लवते वर्णाश्रमसमाचारः । भवतु, भग्नमिव त्रयीवर्त्म पश्यामि ।

इदं तपस्तरुणमनोभिनन्दनं

---

375 एवं न्वेतद् यथार्यो मन्त्रयते ।

---

**360** °क्षेपकं ] em. RT, °क्षेप° PāPu **360** कल्पितं ] em. RT, कल्पित° PāPu **361** वाचं मिश्र° ] Pā$^{pc}$RT, वाचं श्रिश्र° Pā$^{ac}$, वाचमिश्र° Pu **365** °वमः ] RT (em. ?), °चमः PāPu **365** शौचोज्झित° ] RT (em. ?), शोचोज्झित° PāPu **367** नो जाने ] conj., राजानो PāPu, रे जन्तोः conj. RT **367** °निर्भय° ] conj., °निर्दय° PāPuRT **367** कस्यावदातं ] PuRT, कस्यावदांतं Pā **368** ⟨न⟩ ] conj., om. PāPu, ⟨हि⟩ conj. RT **368** °वद्यो ] em. RT, °वद्या PāPu **370** चर्च्यमानोच्चरति ] em., चर्व्यमानोश्चरति Pā, चर्च्यमानोश्चरति Pu, चर्च्यमाना चरति RT (em. ?) **372** तन्त्र° ] conj., तत्त्व° PāPuRT **372** °शृङ्गै° ] PāPu, °सङ्गै° em. RT **373** °सुभगं ] RT (em. ?), °शुभगं PāPu **374** ⟨बटुः⟩ ] RT (em. ?), om. PāPu **377** चेयं सम्भावना ⟨यन्⟩ नूतनमद्य° ] conj. RT, वेदां संभावना । त्तेतममद्य° PāPu **378** विप्लवते ] PāRT, विप्लवात Pu

विलोक्य हि व्यपगतसर्वयन्त्रणम्।
पतिव्रता अपि कुलयोषितश्चिरं
स्थिरं पदं दधति न भर्तृवेश्मसु॥ २०॥

॥ बटुः। सस्मितम्॥

अय्यस्स किं जादं? ण हु अय्येण अज्ज वि दारसंगहो कदो। अम्हे उण दूरे दाव एसा कधा।

॥ स्नात॰ ॥

नन्वार्या जनयित्री ते जीवत्येव।

॥ बटुः॥

सा खु संपदं अदो अणत्थादो उत्तिण्णा जा जीवंतमुदिआ वुड्ढिका वट्टदि।

॥ स्नात॰ ॥

कृतं परिहासेन। महानेष विप्लव उपस्थितः। तद् बटो, चिन्तय किमत्र प्रतिसमाधानम्।

⟨॥ बटुः॥ ⟩

अय्य, ण मे पडिभादि। तुमं य्येव जाणासि। इण्हिं पुण पवड्ढंतो एसो कलिजुओ। ता कुदो इत्थ ईदिसाण अणत्थाण पडीआरो?

॥ स्नात॰ ॥

तथापि नानध्यवसायस्तिमितमासितुं युक्तम्।

॥ विचिन्त्य॥

भवतु, लब्धो ऽवकाशः।

॥ बटुः॥

---

385 f. आर्यस्य किं जातम्? न खल्वार्येणाद्यापि दारसंग्रहः कृतः। अस्माकं पुनर्दूरे तावदेषा कथा। 390 f. सा खलु साम्प्रतमतो ऽनर्थादुत्तीर्णा या जीवन्मृतिका वृद्धिका वर्तते। 395 f. आर्य, न मे प्रतिभाति। त्वमेव जानासि। इदानिं पुनः प्रवर्धमान एष कलियुगः। तत् कुतो ऽत्रेदृशानामनर्थानां प्रतीकारः?

---

**381** विलोक्य ] PāRT, विजोक्य Pu **381** ॰यन्त्रणम् ] em. RT, ॰यन्त्रणां PāPu **382** अ-पि कुल॰ ] conj. RT, अपि खलु conj. RT, पि[[ले]]खेल Pā, पि खेल Pu **383** न ] PāRT, om. Pu **385** अय्येण अज्ज वि ] RT (em. ?), अय्येण अय्य वि PāPu$^{pc}$, अय्ये-अणय्यवि Pu$^{ac}$ **386** दाव ] RT (em. ?), भाव PāPu **388** जनयित्री ] em. RT, जनित्री PāPu **390** अदो ] em. RT$^{pc}$, अतो RT$^{ac}$, अचो PāPu **390** वुड्ढिका ] RT (em. ?), वुड्ढिका PāPu **390** वट्टदि ] em. RT$^{pc}$, वट्ठदि PāPuRT$^{ac}$ **393** ॰समाधानम् ] em. RT, ॰समाधाने PāPu **394** ⟨बटुः⟩ ] RT (em. ?), om. PāPu **395** पडिभादि ] em., पडि-भाअदि PāPuRT **395** जाणासि ] PāPuRT$^{pc}$, जानासि RT$^{ac}$ **395** एसो ] PāRT, ण सा Pu **396** पडीआरो ] em. RT$^{pc}$, पदीआरो RT$^{ac}$, पदीआणु PāPu **400** ऽवकाशः ] RT (em. ?), वकाशा PāPu

को उण एसो भविस्सदि ?

॥ स्नात° ॥

नन्वसौ राजा श्रीशङ्करदेवः। स हि वर्णाश्रमधर्ममर्यादाचार्यस्त्रिभुवनरक्षादीक्षितो देवः स्वत एव प्रतिक्रियामत्र जानाति, विशेषतो ऽशेषभवागमपारगे पार्श्ववर्तिनि तत्रभवति भट्टजयन्ते। भवतु, तमेव श्रावयामः। न कालपरिपालनयोग्यो ह्यनर्थः। बटो, तदा त्वमप्येतौ भोजनाजिरोद्देशं प्रस्थापय गायन्तौ स्त्रीपुंसौ।

॥ बटुः ॥

भो तवस्सिणो, णं एत्थ तवोवणे भोअणकालो तुम्हाणं वट्टदि। ता कीस अतिक्कमीयदि ?

॥ इति निष्क्रान्ताः सर्वे ॥

॥ द्वितीयो ऽङ्कः ॥

---

402 कः पुनरेष भविष्यति ? 410 f. भोस्तपस्विनः, नन्वत्र तपोवने भोजनकालो युष्माकं वर्तते। तत् कस्मादतिक्रम्यते ?

---

**404** राजा ] RT (em. ?), राज PāPu **406** °भवति ] em. RT, °भयाति PāPu **407** °परिपालनयोग्यो ह्यनर्थः ] em. RT, °परिवासयाग्याघनर्थ PāPu **407** तदा ] em. RT, त्वदो PāPu **409** बटुः ] RT (em. ?), रेबटुः PāPu **410** तवस्सिणो ] PāPuRT$^{pc}$, तवस्सिनो RT$^{ac}$ **410** णं ] em. RT, णे PāPu **410** °कालो ] RT (em. ?), °काला PāPu **410** वट्टदि ] RT$^{pc}$, वट्ठदि PāPuRT$^{ac}$

॥ ततः प्रविशति साधकः । साधकः, सोद्वेगं दिशो ऽवलोक्य ॥

अस्तंगदे खु इण्हिं शमए महेशलाणणं णवशशंके । शुण्णे अंधआले गअणे हिअए व्व अम्हाणं । शंपदं भोदि एशे पलाअणावशले । ता कहिं मे पिअवअश्शे मशाणभूदी गदे जेण शमं पलाइश्शं ?

॥ परिक्रम्याग्रतो ऽवलोक्य च ॥

एशे मशाणभूदी इध य्येव आगश्चंते लक्खीयदि ।

॥ ततः प्रविशति द्वितीयः साधकः । द्वितीयः साधकः ॥

एशे शे वअश्शकंकालकेदुणो मढिआ । मए शे इमश्शिं अंधयाले वि ईशीशि दीशदि । ता उप्पेक्खिअ उप्पेक्खिअ पदाइ गमिश्शं ।

॥ परिक्रामति । कर्णं दत्त्वा ॥

पदशद्दे विअ । भअवं, मण्णामि णअललष्कआ इदो हिंडंति, ये शंपाविअ चोल्लं ति शंकाए बंधणाआलं णेंति, शूले वा णिष्किवंति, लुष्के वा पाशेन उल्लंबेंति । भोदु, भयवं भइलवणाधे शलणं ।

---

2 ff. अस्तंगतः खल्वस्मिन् समये महेशलाञ्छनं नवशशाङ्कः । शून्यमन्धकारं गगनं हृदयमिवास्माकम् । साम्प्रतं भवत्येष पलायनावसरः । तत् कुत्र मे प्रियवयस्यः श्मशानभूतिर्गतो येन समं पलायिष्ये? 6 एष श्मशानभूतिरित एवागच्छन् लक्ष्यते । 8 एषा सा वयस्यकङ्कालकेतोर्मठिका । मया सैतस्मिन्नन्धकारे ऽपीषदीषद् दृश्यते । तद् उत्प्रेक्ष्योत्प्रेक्ष्य पदानि गमिष्यामि । 11 ff. पदशब्द इव । भगवन्, मन्ये नगररक्षका इतो हिण्डन्ति, ये सम्प्राप्य चौर्यमिति शङ्कया बन्धनागारं नयन्ति, शूले वा निक्षिपन्ति, वृक्षे वा पाशेन उल्लम्बयन्ति । भवतु, भगवान् भैरवनाथः शरणम् ।

---

**1 साधकः । साधकः** ] PāPu, साधकः । RT (em. ?) **2 °णणं ण°** ] conj. Isaacson, °णणण° conj. RT, °णण° PāPu **2 शुण्णे** ] PāRT, शुणे Pu **2 अंधआले** ] em. RT, णंधआले PāPu **3 हिअए व्व** ] conj., हिअअ व्व PāPuRT **3 शंपदं** ] RT (em. ?), संपदं PāPu **3 पलाअणावशले** ] em. RT, धलाअलेवशले PāPu **3 पिअवअश्शे** ] RT (em. ?), विअवअंग PāPu **4 °भूदी** ] RT (em. ?), °भूमी PāPu **4 जेण** ] PāPu, येण RT (em. ?) **6 °भूदी** ] RT (em. ?), °भूमी PāPu **6 इध** ] RT (em. ?), इव PāPu **6 आगश्चंते** ] em. RT, आगच्चंते PāPu **6 लक्खीयदि** ] PāPu, लस्किअदि RT (em. ?) **8 मढिआ** ] em. RT$^{pc}$, मठिआ PāPuRT$^{ac}$ **8 मए शे** ] PāPu, मए एशे em. RT **9 उप्पेक्खिअ उप्पेक्खिअ** ] em., उप्पेक्खिअं २ PāPuRT **9 पदाइ** ] PāPu, पदाइं RT (em. ?) **11 पदशद्दे** ] PāRT, पदशाद्द Pu **11 मण्णामि णअललष्कआ** ] conj., माणमणअभालष्कआ Pā, माणमणअ। भालष्कआ Pu, मण्णे णअललस्कआ conj. RT **11 ये** ] em. RT, य PāPu **11 शंपाविअ** ] RT (em. ?), संपाविअ PāPu **12 चोल्लं ति** ] PāPuRT$^{ac}$, चोल्लं त्ति RT$^{pc}$ **12 बंधणाआलं** ] conj., वंधणप्पलं Pā, वंधणप्पलां Pu, वंधणस्तलं em. RT **12 णेंति** ] PāRT, णंति Pu **12 शूले वा** ] RT$^{pc}$, शुले वा PāRT$^{ac}$, शुले व Pu **12 णिष्किवंति** ] em., निष्किवंति Pā, निशुष्किवंति Pu, निशुस्किवंति RT$^{ac}$, णिशुस्किवंति RT$^{pc}$ **12 लुष्के** ] PāPu, लुस्के RT (em. ?) **13 उल्लंबेंति** ] conj., उल्लअवेत्ति PāPu, उल्लअंवेंति RT (em. ?) **13 भइलवणाधे शलणं** ] conj., भइलवणाथे शलणं conj. RT$^{pc}$, भेइलवणाके शरणं PāPu, भोइलवणाथे शलणं conj. RT$^{ac}$

॥ निपुणं निरूप्य॥

वअश्शकंकालकेदुणो व्व वाहाले शुणीअदि।

॥ समाश्वस्योपसृत्य॥

वअश्श कंकालकेदू, तव य्येव शयाशं उपशंपत्ते। णअललष्कआण शंकिदे म्हि।

॥ प्रथमः॥

अले मशाणभूदी तुमं? शोहणं तए कदं यं एशु तुवं आगदे। ता तुलिदं हिंडाम। इमे अंधआले ण विलमदि याव, शमं य्येव पलाअम्ह।

॥ द्वितीयः॥

किं चोलशंकाए णअललष्कआ मं मालेंति त्ति शंभावेशि?

॥ प्रथमः॥

ण एशा मे शंका। होंती अवि उवशमदि। अण्णे उण अणस्ते उवस्तिदे।

॥ द्वितीयः, ससम्भ्रमम्॥

कीश?

॥ प्रथमः॥

---

15 वयस्यकङ्कालकेतोरिव व्याहारः श्रूयते। 17 वयस्य कङ्कालकेतो, तवैव सकाशमुपसम्प्राप्तः। नगररक्षकाणां शङ्कितो ऽस्मि। 20 f. अरे श्मशानभूतिस्त्वम्? शोभनं त्वया कृतं यदत्र त्वमागतः। तत् त्वरितं हिण्डावः। अयमन्धकारो न विरमति यावत्, सममेव पलायावहै। 23 किं चोरशङ्कया नगररक्षका मां मारयन्तीति संभावयसि? 25 न एषा मे शङ्का। भवत्यप्युपशाम्यति। अन्यः पुनरनर्थ उपस्थितः। 27 कस्मात्?

---

**14** निपुणं ] PāPuRT$^{pc}$, निपूणं RT$^{ac}$ **15** वाहाले ] em., वाहालो PāPuRT **15** शुणीअदि ] RT (em. ?), शुणाअदि PāPu **17** तव ] em., तुह RT (em. ?), तध PāPu **17** णअललष्कआण ] conj., णअलाभष्कआण PāPu, णअलभस्टआण RT (conj. ?) **18** शंकिदे म्हि ] conj., शंकिद म्हि PāPuRT **20** मशा° ] RT (em. ?), मेशा° PāPu **20** तुमं ] conj., भुम्ब PāPu, तुम्ह em. RT **20** यं ] em., य PāPuRT **20** तुलिदं ] em. RT, तुलिंदं PāPu **21** हिंडाम ] RT$^{pc}$, हिंडाव PāPuRT$^{ac}$ **21** याव ] conj. Isaacson, भाव PāPuRT **21** शमं ] RT (em. ?), समं PāPu **21** पलाअम्ह ] Pā$^{pc}$PuRT, पलाअह्म Pā$^{ac}$ **23** चोल° ] RT (em. ?), णाल° PāPu **23** णअललष्कआ ] conj., णअललस्कआ ] conj. RT, णअणालष्का PāPu **23** मं मालेंति त्ति ] conj., म॥ मालेत्ति PāPu, मालेदि त्ति conj. RT **23** शंभावेशि ] RT (em. ?), संभावेसि PāPu **25** एशा ] RT (em. ?), एसा PāPu **25** होंती ] conj. Isaacson, होन्ति Pā, होन्नि Pu, होदि RT (em. ?) **25** अवि ] em. RT$^{pc}$, आवि PāPuRT$^{ac}$ **25** अण्णे ] PāRT, अणे Pu **27** कीश ] em. RT, कोश PāPu

अयि, अस्ति दाव, किं तए ण शुदा एशा किंवदंती? अण्णे य्येव शंपदं एशे दुष्टलष्टे वट्टदि।

॥ द्वितीयः॥

उत्तम्मदि मे हिअअं। ता तुलिदं आविष्कलेदु वअश्शे।

॥ प्रथमः॥

दालुणे खु लाए शंकलवम्मे। तदो ⟨वि⟩ विशमे शे बम्हणे तश्श अमच्चे दुलाआलजयंते, जेहिं ते तवश्शिणो णीलम्बला वडिअ पिट्टिय वेदवाहिल त्ति लट्ठादो णिव्वाशिदा। अण्णे य जे वेदवाहिले तवश्शी लब्भदि, शे पिट्टीयदि मालीअदि बंधीअदि घल्लीअदि। ता अम्हे वि ताण य्येव मज्झे गणणीअ म्ह। शुलं पियम्ह, मंशं भक्खम्ह इत्थियं गश्चम्ह। णं अम्हे वि शव्वम्हयालिणो णीलंबलाणं। ता शंपदं एदं शाधकवेशं आच्छादिअ तुलिदहिंडणेण इमश्शिं अंधयाले अलष्किदा गश्चम्ह।

---

29 f. अयि, अस्ति तावत्, किं त्वया न श्रुतैषा किंवदन्ती? अन्यदेव साम्प्रतमेतद् दुष्टराष्ट्रं वर्तते। 32 उत्ताम्यति मे हृदयम्। तत् त्वरितमाविष्करोतु वयस्यः। 34 ff. दारुणः खलु राजा शङ्करवर्मा, ततो ऽपि विषम एष ब्राह्मणस्तस्यामात्यो दुराचारजयन्तः, याभ्यां ते तपस्विनो नीलाम्बरा गृहीत्वा पिट्टवा वेदबाह्या इति राष्ट्रान् निर्वासिताः। अन्यश्च यो वेदबाह्यस्तपस्वी लभ्यते, स पिट्यते, मार्यते, बध्यते, क्षिप्यते। तद् वयमपि तेषामेव मध्ये गणनीयाः स्मः। सुरां पिबामः, मांसं भक्ष्यामः, स्त्रियं गच्छामः। ननु वयमपि सब्रह्मचारिणो नीलाम्बराणाम्। तत् साम्प्रतमेतं साधकवेशमाच्छाद्य त्वरितहिण्डनेनास्मिन्नन्धकारे ऽलक्षितौ गच्छाव।

---

**29** अस्ति ] PāPuRT$^{ac}$, अत्थि RT$^{pc}$ **29** दाव ] conj. RT, दा PāPu **29** शुदा ] RT (em. ?), सुदा PāPu **29** किंवदंती ] PāRT, किंवहंती Pu **29** अण्णे ] em., अण्ण PāRT, अण Pu **29** शंपदं ] RT (em. ?), संपदं PāPu **30** दुष्टलष्टे ] Pā, दुष्टजष्टे Pu, दुस्टलस्टे RT (em. ?) **30** वट्टदि ] em. RT$^{pc}$, वट्टदि PāPuRT$^{ac}$ **32** हिअअं ] conj., हिदअं PāPu, हिदयं RT$^{ac}$, हिययं RT$^{pc}$ **32** आविष्कलेदु ] conj., शुविष्कदु PāPu, आविस्कदु conj. RT **34** दालुणे ] Pā (?) RT, सलुणे Pu **34** ⟨वि⟩ ] em. RT, om. PāPu **34** तश्श अमच्चे ] em. RT, उश्शयमच्चे PāPu **35** जेहिं ] PāPu, येहिं RT (em. ?) **35** तवश्शिणो ] RT (em. ?), नवश्शिणो Pā, नवश्शिणौ Pu **35** णीलम्बला ] Pā, णालंवला Pu **35** वेदवाहिल त्ति ] em. RT, चेदवाहिलद्वि PāPu **36** लट्ठादो ] PāPu, लस्टादो RT (em. ?) **36** णिव्वाशिदा ] em., णिव्वाशिदे PāPuRT$^{pc}$, निव्वाशिदे RT$^{ac}$ **36** अण्णे ] PāRT, अणे Pu **36** जे ] PāPu, ये RT (em. ?) **36** लब्भदि ] em. RT, लव्वदि PāPu **37** बंधीअदि ] conj., वंधअदि PāRT, बंधअदि Pu **37** घल्लीअदि ] PāRT$^{pc}$, थल्लीअदि Pu, छल्लीअदि RT$^{ac}$ **37** गणणीअ ] conj., गणीअ PāPu, गहीअ RT (em. ?) **38** शुलं ] em. RT, षुलं PāPu **38** पियम्ह ] PāPu, पिअम्ह RT (em. ?) **38** इत्थियं ] RT (em. ?), इत्तियं PāPu **38** गश्चम्ह ] RT (em. ?), गच्चम्ह PāPu **38** शव्व° ] RT (em. ?), सव्व° PāPu **39** आच्छादिअ ] em., अच्छादिअ PāPu, अश्चादिअ RT (em. ?) **39** तुलिदहिंडणेण° ] em. RT, तुलि। देहिंडजेण Pā, तुलिदे। हिंडजेण Pu **40** अलष्किदा ] em., अलस्किदा em. RT, अलिष्किदा PāPu **40** गश्चम्ह ] em., गच्चम्ह PāPu, गच्छम्ह RT

॥ द्वितीयः। सभयम्॥

एवं कलेम्ह!

॥ परिक्रामतः। द्वितीयः॥

वअश्श कंकालकेदू, कहं पुण एशे अणस्ते उवणदे?

॥ प्रथमः॥

शुण अस्ति दाव शे शणादकबम्हणे शंकलिशणणामे जेण जिणलक्खिदभिक्खुवशदिकाणणे विहलंता गाअंता अशंखा णीलंबलमिहुणा दिष्टा।

॥ द्वितीयः॥

तदो?

॥ प्रथमः॥

तदो तेण शे जअंते जाणाविदे। तेण अ लाए पवोहिदे।

॥ द्वितीयः॥

तदो?

॥ प्रथमः॥

तदो लाएण शे शणादकबम्हणे शंकलिशणे आणाविअ विवाहाविअ माणेहि पट्टवंधेण शिलिशद्देण अ शक्कलिअ शअलाए य्येव वशुंधलाए धम्मलष्काधि-

---

42 एवं करवाव! 44 वयस्य कङ्कालकेतो, कथं पुनरेषो ऽनर्थ उपनतः? 46 ff. शृणु, अस्ति तावत् स स्नातकब्राह्मणः सङ्कर्षणनामा, येन जिनरक्षितभिक्षुवसतिकानने विरहन्ति गायन्त्यसंख्यानि नीलाम्बरमिथुनानि दृष्टानि। 49 ततः? 51 ततः तेन स जयन्तो ज्ञापितः। तेन च राजा प्रबोधितः। 53 ततः? 55 ff. ततो राज्ञा स स्नातकब्राह्मणः सङ्कर्षण आनाय्य विवाह्य मानैः पट्टबन्धेन श्रीशब्देन च संस्कार्य सकलाया एव वसुन्धराया धर्मरक्षाधिकारे नियुक्तः। तेनैष प्रज्वालितो ऽग्निः।

---

**41 सभयम्** ] $Pā^{pc}$PuRT, **ससंभ्रम** $Pā^{ac}$ **44 °लकेदू** ] PāRT, **°ल। कदू** Pu **46 शुण** ] em. RT, **सुण** PāPu **46 अस्ति** ] em. RT, **शुस्ति** PāPu **46 दाव** ] conj. Isaacson, **दा जो** PāPu, **दाव यो** em. RT **46 शणादकबम्हणे** ] RT (em. ?), **षणादकवम्हणे** PāPu **46 शंकलिशणणामे** ] em. RT, **शंकलिशणामे** PāPu **46 जेण** ] conj., **येण** RT (em. ?), **भेज** $Pā^{ac}$, **भेण** $Pā^{pc}$Pu **47 जिणलक्खिदभिक्खुवशदि°** ] conj., **जिणरक्खिदभिक्खु** (-**खु**- Pu) **वसदि°** PāPu, **जिणलस्किदभिस्कुवशदि°** RT (em. ?), **47 विहलंता** ] RT (em. ?), **विहलत्ता** PāPu **47 दिष्टा** ] conj., **दिष्का** PāPu, **दिस्टा** em. RT **51 तेण** ] em. RT, **ता एण** PāPu **51 जअंते** ] RT (em. ?), **षअंते** PāPu **51 जाणाविदे** ] RT (em. ?), **जाणाविदो** PāPu **55 लाएण** ] em. RT, **लोएण** PāPu **55 शणादकबम्हणे** ] RT (em. ?), **षणादकवम्हणे** PāPu **55 शंकलिशणे** ] RT (em. ?), **शंकलिअणे** PāPu **55 माणेहि** ] conj. RT, **मामेहि** PāPu **56 पट्टवंधेण** ] conj. RT, **षट्टवंधिण** PāPu **56 शक्कलिअ** ] RT (em. ?), **शत्कलिअ** Pā, **शक्कलिअ** Pu **56 शअलाए** ] em. RT, **शअलशद्द** PāPu **56 वशुंधलाए** ] em., **वसुंधलाए** em. RT, **वसुंधलए** PāPu

आले णिउत्ते। तेण एशे पज्जालिदे अग्गी।

॥ द्वितीयः॥

णं दुलाआलजयंतेण पज्जालिदे त्ति आचष्क।

॥ प्रथमः॥

अस्ति य्येव एदं। ता शंपदं कहिं गश्चम्ह?

॥ द्वितीयः॥

णं योगेशलीए कालग्गिशिहाए अग्गदो वच्चम्ह। तेशु एशे उवशग्गे कदा वि ण बाधदि।

॥ प्रथमः॥

शा वि एशु काले पालीयदि?

॥ द्वितीयः॥

एवं शंकामि लाअश्श पलमवल्लभाए शअलशुद्धंतशामिणीए शा इस्तिअ त्ति कदा वि लञ्जीए शुयंधादेवीए लष्कीयदि।

॥ प्रथमः॥

शा वि लष्किज्जंती किं अम्ह लष्किदुं पालेदि? भोदु, कश्शिं पि गब्भलपेलंते दूले दिअंतले गश्चम्ह।

---

59 ननु दुराचारजयन्तेन प्रज्वालित इत्याचक्ष्व। 61 अस्त्येवैतद्। तत् साम्प्रतं कुत्र गच्छाव? 63 f. ननु योगेश्वर्याः कालाग्निशिखाया अग्रतो व्रजाव। तत्रैष उपसर्गः कदापि न बाधते। 66 साप्यस्मिन् काले पाल्यते? 68 f. एवं शङ्के राज्ञः परमवल्लभया सकल-शुद्धान्तस्वामिन्या सा स्त्रीति कदापि राज्या सुगन्धादेव्या रक्ष्यते। 71 f. सापि रक्ष्यमाणा किमावां रक्षितुं पारयति? भवतु, कस्मिन्नपि गह्वरपर्यन्ते दूरे दिगन्तरे गच्छाव।

---

**57** धम्मलष्काधिआले ] em., धम्ममलष्कविआले PāPu, धम्मलस्कधिआले em. RT **57** पज्जालिदे ] PāPu, पज्जलिदे RT (typo?) **59** णं ] PāPu, om. RT **59** पज्जालि-दे ] conj., पज्जालिद PāPu, पज्जलिद RT (typo?) **59** आचष्क ] PāPu, आचस्क RT (em. ?) **61** ता शंपदं ] conj., भागंपदं PāPu, भागपदं em. RT **61** कहिं ] PāRT, कहि Pu **61** गश्चम्ह ] RT (em. ?), गच्छम्ह PāPu **63** योगेशलीए ] em., योगेशलए PāPuRT **63** कालग्गि° ] Pā, कालग्गी° PuRT **63** अग्गदो ] conj., अग्गमं PāPu, अश्शमं RT (em. ?) **63** तेशु ] conj., तसू PāPu, तशू RT **64** ण बाधदि ] conj., णिवाधदि PāPu, ण वाधेदि em. RT **66** शा वि ] conj., शा किं em. RT, शाधि PāPu **68** शंकामि ] conj., शंकेमि PāPuRT **68** लाअश्श ] em. RT, लोअश्श PāPu **68** पल-मवल्लभाए ] RT (em. ?), परमवल्लभाए PāPu **68** इस्तिअ त्ति ] em., इस्तिअं ति PāPu, इस्तियं त्ति RT (em. ?) **69** लञ्जीए ] conj., लंचीए PāPuRT **69** लष्कीयदि ] PāPu, लस्कियदि RT (em. ?) **71** लष्किज्जंती ] PāPu, लस्किज्जंती RT (em. ?) **71** लष्कि-दुं ] em., लस्किदुं RT (em. ?), लष्किंतु PāPu **71** भोदु ] em., भो भोदु PāPuRT **71** °पेलंते ] PāPu, °पेत्तंते RT (em. ?) **72** दिअंतले ] RT (em. ?), दिअत्तले PāPu **72** गश्चम्ह ] RT (em. ?), गच्चम्ह PāPu

॥ द्वितीयः ॥

यं आचष्कदि वअश्शे। ता याव पभादे ण पयट्टदि ताव तुलिदं हिंडम्ह।

॥ तथा कुरुतः। प्रथमः ॥

अले मशाणभूदी, यधा मंतेशि। पभादे उण हिंडिदुं य्येव एशु कुलष्टे ण पालीअदि।

॥ द्वितीयः ॥

कीश?

॥ प्रथमः ॥

विशए विशए णअले णअले गामे गामे थले थले वेदज्झयणशद्देण तुट्टंति कण्णा, अज्जगंधेण तुट्टदि घाणे, जण्णधूमेण गलंति अष्कीइ। ता एशे कुलष्टे लअणीहिं य्येव लंघीयदु। दिअशा उण केशुचि वणगहणेशु अदिवाहीअंतु।

॥ द्वितीयः ॥

एवं णेदं। शंकलिशणभएण वि लअणीशु य्येव अम्हेहिं हिंडिदव्वं। दिअशा उण अलण्णेशु अलष्किदेहिं णेदव्वा।

॥ परिक्रामतः। प्रथमः ॥

---

74 यदाचष्टे वयस्यः। तद् यावत् प्रभातं न प्रवर्तते तावत् त्वरितं हिण्डाव। 76 अरे श्मशानभूते, यथा मन्त्रयसि। प्रभाते पुनर् हिण्डितुमेवात्र कुराष्ट्रे न पार्यते। 79 कस्मात्? 81 ff. विषये विषये नगरे नगरे ग्रामे ग्रामे स्थले स्थले वेदाध्ययनशब्देन त्रुट्यतः कर्णौ, आज्यगन्धेन त्रुट्यति घ्राणम्, यज्ञधूमेन गलतो ऽक्षिणी। तदेतत् कुराष्ट्रं रजनीभिरेव लङ्घ्यताम्। दिवसाः पुनः केषुचिद् वनगहनेष्वतिवाह्यन्ताम्। 85 f. एवं न्वेतत्। सङ्कर्षणभयेनापि रजनीष्वेवावाभ्यां हिण्डितव्यम्। दिवसाः पुनररण्येष्वलक्षिताभ्यां नेतव्याः।

---

**74 आचष्कदि** ] PāPu, आचस्कदि RT (em. ?) **74 पभादे** ] Pā$^{pc}$ (?) RT, पाभादे Pā$^{ac}$ (?), प। भादे Pu **74 तुलिदं** ] PāPu, तुलदं RT (typo) **74 हिंडम्ह** ] PāRT, हिडम्ह Pu **76 °भूदी** ] RT (em. ?), °भुदी PāPu **76 यधा** ] RT (em. ?), यथा PāPu **76 मंतेशि** ] RT (em. ?), मंतेसि PāPu **76 हिंडिदुं य्येव** ] em., हिंडदु य्येव PāPuRT **76 कुलष्टे** ] PāPu, कुलस्टे RT (em. ?) **81 °शद्देण** ] RT (em. ?), °सद्देण PāPu **82 कण्णा** ] em. RT, कम्मो PāPu **82 घाणे** ] em., घाणो PāPuRT **82 अष्कीइ** ] em., इष्कीइ PāPu, अस्कीइ em. RT **82 कुलष्टे** ] PāPu, कुलस्टे RT (em. ?) **83 लअणीहिं** ] em., भेअणीहिं PāPu, लअणीम्हि em. RT **83 उण** ] RT (em. ?), ओण PāPu **83 °अंतु** ] PāRT, °अतु Pu **85 एवं** ] RT (em. ?), एव PāPu **85 णेदं** ] Pu, ण्णेदं PāRT **85 शंकलिशण°** ] conj. RT, संविलषण° PāPu **85 लअणीशु** ] RT (em. ?), लअणीसु PāPu **85 अम्हेहिं** ] em., अ अम्हेहिं PāPuRT **85 हिंडिदव्वं** ] PāRT, हिडिदव्वं Pu **85 उण** ] RT (em. ?), ओण PāPu **86 अलण्णेशु** ] RT (em. ?), अरण्णेशु Pā, अरणेशु Pu **86 अलष्किदेहिं** ] em., अलष्किंदेहि PāPu, अलस्किदेहि RT (em. ?)

अले मशाणभूदी पविभत्त व्व दिशाओ शअला। शणिअं गलंति णष्कत्ता। ताव ओणदे पभादे। अम्हाणं किं णु कादव्वं?

॥ नेपथ्ये पटहशब्दानन्तरम्॥

भो भोः पौरजानपदाः, एष खलु महाराजशङ्करवर्मदेवराजाज्ञया भट्टश्रीसंकर्षणः सर्वानेव युष्मान् बोधयति—

ये ऽत्रानादिजगत्प्रवाहपतिता नानागमाः साधव-
स्ते तिष्ठन्तु यथास्थिताः स्वसमयादिष्टाश्चरन्तः क्रियाः।
ये तु प्रस्तुतधर्मविप्लवकृतः पापास्तपोपायिन-
स्ते चेदाशु न यान्ति घातयति तान् दस्यूनिव क्ष्मापतिः॥ १॥

॥ उभौ श्रुत्वा सभयम्॥

आगदे य्येव शंकलिशणववदेशेण जंगमे अम्हाण मच्चू। ता अण्णदो तुलिदतुलिदं गच्छम्ह।

॥ निष्क्रान्तौ॥

॥ ततः प्रविशति परित्यक्तस्नातकवेशो गृहीतगृहस्थराजपुरुषोचितवेशः श्रीसङ्कर्षणो बटुर्विभवतश्च परिवारः॥

॥ स्नात॰ ॥

बटो, अपि नीलाम्बरोत्सारणेन परिवदत्यस्मान् जनः?

॥ बटुः॥

अय्य, मा एवं संकदु भवं। दुराआरेहि अलीयतावसेहि अभिभविज्जंतो पणट्ठो य्येव पुणो अय्येण पइट्ठिदो तईधम्मो।

---

88 f. अरे श्मशानभूते, प्रविभक्ता इव दिशः सकलाः। शनैर्गलन्ति नक्षत्राणि। तावदुपनतं प्रभातम्। आवयोः किं नु कर्तव्यम्? 98 f. आगत एव सङ्कर्षणव्यपदेशेन जङ्गम आवयोर्मृत्युः। तद् अन्यतस्त्वरितत्वरितं गच्छाव। 106 f. आर्य, मैवं शङ्कतां भवान्। दुराचारैरलीकतापसैरभिभूयमानः प्रणष्ट एव पुनरार्येण प्रतिष्ठितः त्रयीधर्मः।

---

**88** मशाण॰ ] em. RT, असाण॰ PāPu **88** दिशाओ ] RT (em. ?), दिसाओ PāPu **88** शअला ] PāRT, शअ। ला Pu **88** णष्कत्ता ] conj., ण्णष्कंता Pā, णष्कंता Pu, णस्कंता RT (em. ?) **89** ओणदे ] RT (em. ?), ओणदो PāPu **89** अम्हाणं ] RT (em. ?), अह्माणं PāPu **89** णु ] PuRT, ण्णु Pā **91** भट्ट॰ ] PāRT, भद॰ Pu **93** ये ] em. RT, यो PāPu **94** ॰दिष्टा॰ ] conj. Isaacson, ॰विष्टा॰ PāPuRT **96** दस्यूनिव ] em. RT, दस्यनिव Pā, दृस्यनिव (?) Pu **98** य्येव ] PāRT, प्पेव Pu **98** शंकलिशण॰ ] em. RT, शंकसिघण॰ PāPu **98** मच्चू ] em., मश्चू PāPuRT **98** ता ] em., दा PāPuRT **98** अण्णदो ] PāRT, अणदो Pu **99** गच्छम्ह ] PāPu, गश्चम्ह RT (em. ?) **101** ॰वेशः ] PāRT, ॰वेश॰ Pu **106** मा ] RT (em. ?), भा PāPu **106** अलीयतावसेहि ] conj. RT, यभावसेहि PāPu **106** अभिभविज्जंतो ] conj., अभिभवज्जंतौ PāPu, अभिभवज्जंतो RT (em. ?) **107** पणट्ठो ] em. RT, पणंचे PāPu

॥ स्नात° ॥

ननु देवेन श्रीशङ्करवर्मणा प्रतिष्ठापित इति ब्रूहि। तत् किमन्ये न नीलाम्बर-च्छायानुकारिण उत्सारणयोग्याः प्रचरन्ति पृथिव्यामलीकतापसाः?

॥ बटुः ॥

अय्य, सेववववएसेण जं किं पि आयरंता इत्तिअकालं दिट्ठा दुट्ठा तावसा। संपदं पुण अगणिदा अय्यपदावेण ते वि पविरला होंति।

॥ सङ्क° ॥

साधूक्तम्। मयापि ते न न दृष्टाः। पात्रं ते निर्वासनस्य। तथा हि—

अपेयं किं तेषां ननु विरहितं यद् द्रवतया
अभक्ष्यं यत् तिक्तं दलयितुमशक्यं च दशनैः।
अजाता प्रेता वा यदि परमगम्या स्तनवती
तपःस्थानं योग्यं किमिव यदि वा शौण्डिकगृहम्॥ २॥

॥ बटुः ॥

जधा अय्यो मंतेदि।

॥ सङ्क° ॥

बटो, सो ऽपि नाल्पो विप्लवो वर्णाश्रमाणाम्।

॥ बटुः ॥

ताणं पि सो कलंको य्येव माहेसराणं जाण ववएसेण ते ववहरंति।

॥ सङ्क° ॥

बटो, सम्यगभिहितम्। तदुद्वासने ऽपि देवस्य युक्त एवावधानपरिग्रहः। तथा च—

---

112 f. आर्य, शैवव्यपदेशेन यत् किमप्याचरन्त एतावत्कालं दृष्टा दुष्टास्तापसाः। साम्प्रतं पुनरगणिता आर्यप्रतापेन (°प्रभावेन?) ते ऽपि प्रविरला भवन्ति। 121 यथार्यो मन्त्रयते। 125 तेषामपि स कलङ्क एव माहेश्वराणां येषां व्यपदेशेन ते व्यवहरन्ति।

---

**112** °ववएसेण ] RT (em. ?), °चवएसेण PāPu **112** इत्तिअकालं ] em., इत्तिअं कालं PāPuRT **112** तावसा ] RT (em. ?), तापसा PāPu **113** अगणिदा ] conj., अगणिद अगणिद PāPu, अगणिदगणिदा RT **113** °पदावेण ] conj., °पआवेण PāPu, °पहावेण em. RT **113** पविरला ] em. RT, पविरल PāPu **114** सङ्क° ] PāPu, स्नात° RT (em. ?) **116** ननु ] Pā, न तु PuRT **116** यद् द्रवतया ] RT (em. ?), यद्द्रवतया PāPu **118** प्रेता वा ] em. RT, प्रोताया Pā, प्रेताया Pu **121** जधा ] PāPu, यधा RT (em. ?) **121** अय्यो ] PāRT, आय्या Pu **122** सङ्क° ] PāPu, स्नात° RT **125** ताणं ] em. RT, त्राणं PāPu **125** सो ] PāPu, om. RT **126** सङ्क° ] PāPu, स्नात° RT **127** एवावधान° ] Pā[pc]RT, एवाधा° Pā[ac], एएवावधान° Pu

शैवं शासनमाश्रिता वयमिति प्रख्याप्य नाम प्रभोः
शुद्धार्थेषु तदागमेषु कुधियः कुर्वन्ति ते विप्लवम्।
तान् देवो विनियम्य सम्यगमले ⟨मार्गे⟩ यदि स्थापयेत्
तद् वन्द्ये क्षितिपालने यशसि वा का नाम तस्य क्षतिः॥ ३॥

॥ बटुः॥

जुत्तं णिमं।

॥ सङ्क॰॥

ननु गृहीत एवात्र मया राजादेशः। तन् नियुज्यन्तामेते मार्गपालास्तदन्वेषणाय।

॥ बटुः॥

जं अय्यो आणवेदि।

॥ इति निष्क्रम्य पुनः प्रविश्य च॥

अय्य, पणट्ठा रट्ठादो। अण्णो पुण को वि पणिही संभंतो अय्यं अण्णेसंतो आगदो। ता एत्थ अय्यो पमाणं।

॥ सङ्क॰॥

आनीयतामसौ।

॥ बटुः संज्ञया तमाह्वयति। प्रविश्य संभ्रान्तः पुरुषः॥

जयदु भष्टके। जे णाम महेशला मंशशीधुदाशीववहालशीला णीलंबलकिंवदंतीं य्येव ⟨शुणिअ ते⟩ शअला लष्टादो पणष्टा। अण्णे उण शुद्धतवश्शिणो पि

---

134 युक्तं न्विदम्। 139 यदार्य आज्ञापयति। 141 f. आर्य, प्रणष्टा राष्ट्रात्। अन्यः पुनः को ऽपि प्रणिधिः संभ्रान्त आर्यमन्विष्यन्नागतः। तदत्रार्यः प्रमाणम्। 146 ff. जयतु भट्टकः। ये नाम माहेश्वरा मांसशीधुदासीव्यवहारशीला नीलाम्बरकिंवदन्तीमेव श्रुत्वा ते सकला राष्ट्रात् प्रणष्टाः। अन्ये पुनः शुद्धतपस्विनो ऽपि शङ्किताश्चलितुं प्रवृत्ताः। अत्र भट्टकः प्रमाणम्।

---

**129 शैवं** ] PāPu$^{pc}$RT, शौवं Pu$^{ac}$ **129 ॰श्रिता** ] PāPu$^{pc}$RT, ॰श्रीता Pu$^{ac}$ (?) **131 ⟨मार्गे⟩** ] conj. RT, om. PāPu (unmetrical) **132 वन्द्ये** ] em. RT, वंदे PāPu **135 सङ्क॰** ] PāPu, स्नात॰ RT **136 ॰स्तद॰** ] PāRT, ॰सद॰ Pu **139 f. आणवेदि। इति** ] em. RT, आणवेदि त्ति PāPu **141 पणट्ठा** ] em., पणट्ठाओ PāPuRT **141 अण्णो** ] PāRT, अणो Pu **141 पुण** ] PāPu$^{pc}$RT, पुणो Pu$^{ac}$ **142 ता** ] RT (em. ?), त PāPu **143 सङ्क॰** ] PāPu, स्नात॰ RT **145 संभ्रान्तः** ] PuRT, संभ्रातः Pā **146 भष्टके** ] PāPu, भस्टकेRT (em. ?) **146 ॰शीधु॰** ] PāRT, ॰शीधुं॰ Pu **146 ॰ववहाल॰** ] RT (em. ?), ॰वचहाल॰ PāPu **147 ॰किंवदंतीं** ] RT (em. ?), ॰किंवदंती PāPu **147 ⟨शुणिअ ते⟩** ] conj. RT, om. PāPu **147 लष्टादो** ] PāPu, लस्टादो RT (em. ?) **147 पणष्टा** ] PāPu, पणस्टा RT (em. ?) **147 अण्णे** ] em., उष्ण PāPu, अण्णओ em. RT **147 शुद्ध॰** ] em. RT, शुद्धं॰ PāPu **147 पि** ] PāPu, वि RT (em. ?)

शंकिदा चलिदुं पउत्ताओ। एशु भष्टके पमाणं।

॥ सङ्क॰ ॥

बटो, साधून् व्यावर्तयितुं शीघ्रं नियुज्यन्तां प्रधानपुरुषाः सत्कारपूर्वम्।

॥ पुरुषं प्रति॥

त्वमपि रे मार्गमादेशयंस्तैरेव सह गच्छ।

⟨॥ पुरुषः॥ ⟩

यं भष्टके आणवेदि।

॥ इति निष्क्रान्तः॥

॥ बटुः॥

अहो अय्यस्स पहावो उच्छलिदो।

॥ सङ्क॰ ॥

बटो, न युक्तमेतद् यदनादिप्रबन्धप्रवृत्तसदागमानुगामिनः शङ्कितमासते। परममाहेश्वरो हि राजा शङ्करवर्मदेवः, सर्वाश्रमेषु च दयालुः। तदेहि वयमपि कुशङ्कोपशमाय श्रीधर्मशिवाश्रममेवाद्य गच्छामः।

॥ बटुः॥

जं अय्यो आणवेदि।

॥ परिक्रामतः॥

॥ नेपथ्ये॥

किं शङ्किताः सभयमाश्रमिणः स्थिताः स्थ
देवो ऽखिलाश्रमगुरुर्न पराङ्मुखो वः।
युष्मासु विप्लवमिवादधतो निरस्ता-
स्ते कृत्रिमव्रतवृताः परमेश्वरेण॥ ४॥

॥ बटुः॥

एदे खु अय्येण णिउत्ता पहाणपुरिसा उग्घोसंता गदा।

---

154 यद् भट्टक आज्ञापयति। 157 अहो, आर्यस्य प्रभाव उच्छलितः 163 यदार्य आज्ञापयति। 171 एते खल्वार्येण नियुक्ता प्रधानपुरुषा उद्घोषयन्तो गताः।

---

**148** भष्टके ] PāPu, भस्टके RT (em. ?) **149** सङ्क॰ ] PāPu, स्नात॰ RT **150** शीघ्रं ] em. RT, मित्रं PāPu **150** प्रधानपुरुषाः सत्कारपूर्वम् ] em. RT, प्रधानपुरुषसत्काराः सत्कारपूर्वम् PāPu **153** ⟨पुरुषः⟩ ] em. RT, om. PāPu **154** भष्टके ] PāPu, भस्टके RT (em. ?) **154 f.** आणवेदि। इति ] em. RT, आणवेदि त्ति PāPu **157** पहावो ] em. RT, आवो PāPu **157** उच्छलिदो ] PāPu, उत्थलिदो RT (em. ?) **158** सङ्क॰ ] PāPu, स्नात॰ RT **159** ॰गामिनः ] RT (em. ?), ॰गामिनो PāPu **160** तदेहि ] em. RT[pc], तदेह PāPuRT[ac] **164** परिक्रामतः ] PāPu, उभौ परिक्रामतः RT (em. ?) **166** ॰श्रमिणः ] em. RT, ॰श्रमिणाः PāPu **166** स्थिताः ] PāRT, स्थिता Pu

॥ सङ्क° ॥

बटो, सम्यगुपलक्षितं भवता। वयमपि सत्वरं व्रजामः।

॥ परिक्रम्य ॥

बटो, ननु प्राप्ता वयं श्रीधर्मशिवाश्रमम्। तथा हि—

एते धूलनभस्मधूसररुचो धूपाग्निसंधुक्षणे
दक्षास्तत्क्षणपीतपुण्यपुरजित्पूजार्थपुष्पासवाः।
धन्याः कं न हरन्ति तापसजटाग्रन्थिश्लथीकारिणः
कन्थामन्थरलास्यदानरसिकाः शैवाश्रमे वायवः॥ ५॥

॥ बटुः ॥

जधा अय्यो मंतेदि। पसंतरमणिज्जं तवोवणं इमं णो दीसदि।

॥ सङ्क° ॥

तदेहि प्रविशावः।

॥ प्रवेशमभिनीय ॥

कथं प्राङ्गन एवाभिवर्तते श्रीधर्मशिवो भट्टारकः। अहो अमुष्य सर्वातिशायिनी तपोलक्ष्मीः। एष हि

भस्मस्मेराननश्रीः शुचिविबुधधुनीनीरनिर्धौतमूर्धा
धावद्भिश्चेटवृत्तैश्चटुलगणनिभैस्तापसैर्वन्द्यमानः।
गौर्याजस्रं सुकीर्त्या शशधरसमया नन्द्यमानामलात्मा
श्रेयः श्रीकण्ठकल्पो जनयति जगतां दर्शनादेव नूनम्॥ ६॥

अपि च,

आत्मानमाश्रमपदे च बहुप्रकार-
कालेयकल्मषविशेषमुषि प्रविष्टम्।
सत्यं शपे शिवपुरस्थमिवाप्यवैमि
स्मेरस्मरारिनयनत्रयतर्प्यमाणम्॥ ७॥

---

181 यथार्यो मन्त्रयति। प्रशान्तरमणीयं तपोवनमिदं नो दृश्यते।

---

**172** सङ्क° ] PāPu, स्नात° RT **176** धूल° ] Pā (?) RT, थूल° Pu **178** हरन्ति ] em. RT, रहन्ति PāPu **181** जधा ] em., जहा PāPuRT **181** पसंतरमणिज्जं ] conj. RT, पसरंतरमज्जं PāPu, पसंततरं अज्ज conj. **181** तवोवणं इमं णो ] conj., तवोवणमिणमो PāPuRT **182** सङ्क° ] PāPu, स्नात° RT **183** प्रविशावः ] em., प्रविशामः PāPuRT **185** एवाभिवर्तते ] em., एवमभिवर्तते PāPuRT **185** °शायिनी ] Pā$^{pc}$ (?) PuRT, °शा-यीनी Pā$^{ac}$ (?) **187** °विबुध° ] em. RT, °विधुव° PāPu **188** °श्चेटवृत्तै° ] conj. Isaacson, °श्चैरवेदै° PāPuRT **192** °नमाश्र° ] Pā$^{pc}$PuRT, °नमैव Pā$^{ac}$ **193** °मुषि ] em. RT, °पुषि PāPu **194** शपे ] conj., शिखे PāPu, शिवे em. RT **195** °तर्प्यमाणम् ] em. RT, °तर्क्ष्यमाणं PāPu

॥ बटुः ॥

अहं पि अत्ताणं उप्पतंतं बम्हभूयं पेक्खामि।

॥ ततः प्रविशत्यासनस्थो यथानिर्दिष्टः श्रीधर्मशिवो विभवतश्च परिवारः॥

॥ भट्टारकः, सवितर्कम्॥

राजासौ भुवनेषु विश्रुतगुणो धर्मैकतानाशयो
मन्त्री शास्त्रमहाटवीविहरणाश्रान्तो जयन्तो ऽप्यसौ।
नाहं कर्म यशोविरुद्धमनयोः शङ्के यथावस्थिता-
स्तिष्ठन्त्वाश्रमिणः किमाकुलतया किं वा भयं मादृशाम्॥ ८॥

॥ अग्रतो ऽवलोक्य॥

कथमयमिहैवायातः स्नातकः? सर्वं व्यक्तमिदानीम्।

॥ सङ्क° ॥

तदेहि बटो, प्रणमामो भट्टारकम्।

॥ उपसृत्य॥

नमो भगवते प्रत्यक्षमहेश्वराय भट्टारकाय।

॥ भट्टारकः॥

स्वागतमार्याय। कुशलिनो भवन्तः? आसनम्।

॥ स्नात° ॥

अलमासनेन, शाद्वलस्थल एवोपविशामः। भगवन्, अप्यविघ्नमुपपद्यते यथाप्रस्तुतस्तपोविधिः? को वात्र विघ्नः? भगवान् महेश्वर एवात्मानमात्मनार्चयति। तदमुना जनप्रवादेन यथा न मनागाकुलतां बिभ्रति तपोधनाः, तथैनानादेष्टुमर्हति भट्टारकः। तपोविघ्ना एव प्रतिहता राज्ञा। राजाप्यनुपदमागमिष्यत्येव भट्टारकं द्रष्टुम्।

---

197 अहमपि आत्मानमुत्पतन्तं ब्रह्मभूयं पश्यामि।

---

**197** बम्हभूयं ] conj., वलह्मभूयं PāPu, बलम्हभूयं RT (em.?) **198** प्रविशत्या° ] Pā$^{pc}$Pu RT, प्रविशत्यि° Pā$^{ac}$ **200** °नाशयो ] conj., °नाश्रयो PāPuRT **201** °विहरणाश्रान्तो ] em. RT, °विहरणश्रान्तो PāPu **202** नाहं ] PāPu, नेदं em. RT **202** शङ्के ] conj., शङ्का PāPuRT **202 f.** °स्थितास्ति° ] PāPu, °स्थिता ति° RT (em.?) **203** किमाकुलतया ] conj., किमाकुल PāPu(unmetrical), किमाकुलमितः conj. RT **205** °यातः स्नातकः ] RT (em.?), °यातः॥ स्नातकः॥ PāPu **206** सङ्क° ] PāPu, स्नात° RT **207** प्रणमामो ] Pā$^{pc}$RT, म्रणमामो Pā$^{ac}$, प्प्रणमामो Pu **213** अप्य° ] em. RT, जोय्य° PāPu **214** °विधिः ] RT (em.?), °विधेः Pā, °विधः Pu **214** को वात्र ] PāPu, [अथ] को वात्र RT **214** एवात्मा° ] RT (em.?), एवात्सा° PāPu **215** °कुलतां ] RT (em.?), °कुलता PāPu **216** तथैनाना° ] RT (em.?), तथैनामा° PāPu **216** °हता राज्ञा ] em. RT, °हतराजा PāPu **217** °पदमाग° ] PāPu, °पदमेवाग° RT (em.?)

॥ भट्टा॰, सस्मितम्॥

कास्माकमाकुलता, तापसानां वा? श्रीशङ्करवर्मणि धर्मेण मेदिनीं समागतां शासति साधूनामेव राज्यम्, तस्य परं भृतिः। नैवाद्यैवम्, चिरात् प्रभृत्येव-मेवानुभवामः।

॥ प्रविश्यापटीक्षेपेण संभ्रान्तस्तापसः॥

जयदु जयदु भट्टारको। एसो खु को वि वुड्ढको पंडिदो स्वगव्वं उव्वहंतो अस्समं इमं उवहसंतो अणेअसिस्सपरिवारिदो †उग्गाहणकअणखंधंव† करेंतो इदो आगदो। ता इत्थ भट्टारको पमाणं।

॥ भट्टा॰, सस्मितम्॥

प्रविशतु तपस्वी। किमस्माकम्?

॥ ततः प्रविशति यथानिर्दिष्टो वृद्धाम्भिः। वृद्धाम्भिः॥

अहो विस्मयः। अहो बत कियाननर्थकारी राजा शङ्करवर्मा यस्येदृशी साम्राज्यलक्ष्मीरग्निहोतृभिर्वनस्थैर्यतिभिर्ब्रह्मचारिभिरेभिश्च शैवपाशुपत-पाञ्चरात्रिकार्हतसाङ्ख्यसौगतप्रभृतिभिरनर्गलं भुज्यते। तत्कथमेष चिरं जीविष्यति? तदद्य तावदयमेकवृक्षे मन्दारक इव दृश्यते। अस्मिन्नेवावसर ईश्वरं पराकृत्य परलोकं निरस्य वेदप्रामाण्यं प्रतिक्षिप्य राजानममुममार्गादतो निवार्य योग्ये वर्त्मनि स्थापयामि, येनायमर्थपरश्चिरं राज्यमनुभवति। अत्र च शैवाश्रमे श्रुतं मया बहवः पण्डितमानिनः सङ्घटिता इति। तेषां समक्षमेनमेव शैवाचार्यं निर्भर्त्सयामि।

---

223 ff. जयतु जयतु भट्टारकः। एष खलु को ऽपि वृद्धः पण्डितः स्वगर्वमुद्वहन्नाश्रममिममुपहसन्ननेकशिष्यपरिवारितः †...† कुर्वन्नित आगतः। तदत्र भट्टारकः प्रमाणम्।

---

**219** कास्माकमाकुलता ] PuRT, कास्माकर्मकुलता Pā **219** ॰वर्मणि ] em. RT, ॰धर्मणि PāPu **220** नैवाद्यैवम् ] Pā$^{pc}$PuRT$^{pc}$, नैवाधैवम् Pā$^{ac}$, नवाद्यवम् RT$^{ac}$ **220** प्रभृत्ये॰ ] em. RT, प्रत्ये॰ PāPu **222** ॰पटीक्षे॰ ] em. RT, ॰पक्षे॰ PāPu **222** संभ्रान्तस्ता॰ ] PāPu, संभ्रान्तरता॰ RT (typo) **223** भट्टारको ] em., भट्टारक PāPuRT **223** पंडिदो ] em., पंडि PāPu, पंडिओ em. RT **224** करेंतो ] conj., कसंतोइ PāPu, करंतो em. RT **225** भट्टारको ] em., भट्ट PāPu, भट्टए em. RT **229** विस्मयः ] em., विस्मयम् PāPuRT **229** शङ्करवर्मा ] em. RT, संकरवर्म PāPu **230** यस्येदृशी ] em. Isaacson, यद्येदृशी PāPu, य ईदृशी em. RT **230** ॰होतृ॰ ] PāRT, ॰होत्र॰ Pu **231** ॰साङ्ख्य॰ ] RT (em. ?), ॰शाङ्ख्य॰ PāPu **232** ॰मेकवृक्षे ] conj., ॰मेकदेशे PāPuRT **232** अस्मि॰ ] RT (em. ?), तस्मि॰ PāPu **232** ॰वावसर ] PāPu$^{pc}$RT, ॰वासर Pu$^{ac}$ **233** वेदप्रामाण्यं ] em. RT, चेदप्रमाण्यं PāPu **234** ॰श्चिरं ] PāPuRT$^{pc}$, ॰श्चिरं RT$^{ac}$ **234** ॰भवति ] em. Isaacson, ॰भवतीति PāPuRT **235** इति ] add. RT, om. PāPu **236** ॰चार्यं ] PāPuRT$^{pc}$, ॰चार्य RT$^{ac}$ **236** निर्भर्त्सयामि ] PuRT, निर्भत्सयामि Pā

॥ परिक्रम्यान्यतो ऽवलोक्य ॥

अयं स शैवाचार्यः कणभक्षाक्षपादादिदर्शन [पारदृश्वा], एष च महामीमांसकः सङ्कर्षणः, इमे चान्ये बहवो नानाशास्त्रविदः। भवतूपसर्पामि।

॥ उपसृत्य ॥

कुशल्यसि तपस्विन्? भद्रं ते ब्राह्मण।

॥ इति वदन् शाद्वल एव शिष्यैरुपविशति ॥

॥ भट्टा°, सस्मितम् ॥

कथमुपक्रम एवाक्षेपः?

॥ सङ्कर्षणस्य मुखं पश्यति ॥

॥ स्नात° ॥

भगवन्नेवमेतत्। पश्यामस्तावत्।

॥ वृद्धा° ॥

किमित्थमनर्थशतदुःस्थमास्यते भवद्भिः?

तपांसि यातनाश्चित्राः संयमो भोगवञ्चनम्।
अग्निहोत्रादिकं कर्म बालक्रीडेव लक्ष्यते॥ ९॥

॥ भट्टा° ॥

किं कुर्मः? ईदृशे कर्मणि भगवतेश्वरेण प्रेरिताः स्मः।

॥ वृद्धा° ॥

कः पुनर्भगवानीश्वरः?

मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः।
एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः॥ १०॥

॥ भट्टा° ॥

अलमपभाषणेन। स हि भगवान्विश्वजगतः स्रष्टा संहर्तानन्तजन्तुग्रामवृत्तेर्विचित्रविपाकस्य कर्मकलापकस्य यथाविषयं विनियोक्ता नित्यानन्दः सर्वज्ञः कृपालुः परमेश्वरः।

---

260 cf. NM I 488.13: नानात्मगतशुभाशुभकर्मकलापापेक्षः स्रष्टा प्रजापतिरिति

---

**237** °म्यान्यतो ] em. RT, °म्यन्नयतो Pā[pc], °म्यान्नयतो Pā[ac], °म्य। न्नयतो Pu, **238** °र्यः कण° ] em. RT, °र्यक्षण° PāPu **238** °भक्षा° ] PāPu[pc]RT, °भभभक्षा° Pu[ac] **238** °पारदृश्वा ] conj. RT, om. PāPu **239** °कः सङ्क° ] Pā, °कसं° PuRT **239** °तूप° ] em. RT, °त्वप° PāPu **241 f.** ब्राह्मण।इति ] em. RT, ब्राह्मणेति PāPu **242** वदन् शा° ] em. RT, वदञ्छा° Pā, वदन्वा° Pu **255** °वानीश्व° ] RT (em. ?), °वानेश्व° PāPu **256** ख° ] PāRT, स्व° Pu **257** °र्धरः ] RT (em. ?), °र्द्वरः (°र्द्धरः?) PāPu **259** स हि ] em. RT, स ह PāPu

॥ वृद्धाम्भिः, मन्दं विहस्य ॥

अहो भौतानां भक्तितिमिरहता न किञ्चित् पश्यति मुग्धा दृष्टिः। कुत एवं भविष्यति? कथमिव हि कर्तृत्वमस्य सम्मंस्यते लोकः? तथा हि,

कृपेयं क्रीडेयं प्रभुरुचुरियं प्रेरणमिदं
स्वभावो ऽयं धर्मार्जनमिदमथाप्यार्जवमिदम्।
न जाने किं कृत्वा मनसि कृतकृत्यो मुनिरसौ
पुराणो नीरागः सृजति जगतीं संहरति च॥ ११॥

करणादिकारणकलापनिःस्पृहः
सहकारिभिश्च रहितः कथं व्रजेत्।
स्वपरप्रयोजन⟨विशेष⟩वर्जितां
जगतां स्थितिप्रलयसर्गहेतुताम्? ॥ १२ ॥

किं च,

एवमेव विधातापि धाता त्रीणि जगन्ति वा।
पुनर्नान्यानि भूयांसि सृजतीत्यत्र को विधिः॥ १३॥

॥ भट्टा॰ ॥

कृतं दूषणोपन्यासायासेन।

प्रमाणशून्ये विफलं हि दूषणं
प्रमाणसिद्धे तदपास्तमेव यत्।
तदुक्तिमौखर्यमपास्य मृग्यता-

---

265 ff. cf. NM I 508.11–509.6: यस्तु प्रयोजनविकल्पः किमर्थं सृजति जगन्ति भगवानिति सो ऽपि न पेशलः। स्वभाव एवैष भगवतः, यत् कदाचित् सृजति कदाचिच्च संहरति विश्वमिति॥ कथं पुनर्नियतकाल एषो ऽस्य स्वभाव इति चेत्, आदित्यं पश्यतु देवानांप्रियः, यो नियतकालमुदेत्यस्तमेति च। प्राणिकर्मसापेक्षमेतद्विवस्वतो रूपमिति चेत्, ईश्वरे ऽपि तुल्यः समाधिः। क्रीडार्थे ऽपि जगत्सर्गे न हीयते कृतार्थता। प्रवर्तमाना दृश्यन्ते न हि क्रीडासु दुःखिताः॥ अथवानुकम्पयैव सर्गसंहारावारभतामीश्वरः। नन्वत्र चोदितम्, न तथाविधाः प्राणिनो ऽनुकम्प्या भवन्ति। केवलसुखस्वभावा वा सृष्टिरनुकम्पावता क्रियेतेति। सत्यं चोदितमनुपपन्नं तु, अनादित्वात् संसारस्य। 278 ff. cf. NM I 267.8–9: प्रमाणसिद्धे हतशक्ति दूषणं प्रमाणशून्ये ऽपि वृथा तदुक्तयः। निरस्य चोद्यव्यसनं तु मृग्यतामतीन्द्रिये वस्तुनि साधनं पुनः॥; also NM II 8.16: दूषणाख्यानमौखर्यमस्माकमपवारितम्।

---

**264** सम्मंस्यते ] em. RT, संस्यते PāPu **269** ॰कारण॰ ] RT (em. ?), ॰कारक॰ PāPu **270** ॰श्च र॰ ] Pā$^{pc}$PuRT, ॰श्चरर॰ Pā$^{ac}$ **271** ॰विशेष॰ ] conj. RT, om. PāPu **275** पुनर्नान्यानि ] PāRT, पुननान्यानि Pu **278** प्रमा॰ ] Pā$^{pc}$PuRT, प्रर्मा॰ Pā$^{ac}$ **278** दूषणं ] RT (em. ?), दूषणां PāPu **279** प्रमाणसिद्धे तदपास्तमेव ] conj. Isaacson, प्रमाणीसिद्धे उदपास्तमेव PāPu, प्रमाणसिद्धावुदयास्तमेव em. RT **279** यत् ] conj. Isaacson, तत् PāPuRT

मतीन्द्रिये वस्तुनि साधनं परैः॥ १४॥

॥ वृद्धा॰, सस्मितम्॥

यद्येवमीश्वरसिद्धावभिधीयतां प्रमाणम्।

॥ भट्टा॰॥

अनुमानमिति ब्रूमः।

॥ वृद्धा॰, सस्मितम्॥

अनुमानं प्रमाणं चेति मनोरथः।

अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा॥ १५॥

किं च,

हस्तस्पर्शादिवान्धेन विषमे पथि धावता।
अनुमानप्रधानेन विनिपातो न दुर्लभः॥ १६॥

अपि च,

यत्नेनानुमितो ऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥ १७॥

॥ भट्टा॰॥

अलं प्रपञ्चेन। प्रसिद्धमेव बार्हस्पत्यानां गृहकृत्यकमिदम्। इदं तु ब्रूहि। किं प्रत्यक्षमेवैकं तेषां प्रमाणम्?

॥ वृद्धा॰॥

ओमित्युच्यते।

॥ भट्टा॰॥

न तर्हि तेषां काचन कल्पते लोकयात्रा।

॥ वृद्धा॰॥

किमिति?

---

288 f. cf. NM I 314.1–4: देशकालदशाभेदविचित्रात्मसु वस्तुषु। अविनाभावनियमो न शक्यो वक्तुमाह च॥ अवस्थादेशकालादिभेदाद्भिन्नासु शक्तिषु। भावानामनुमानेन प्रसिद्धिरतिदुर्लभा॥ (*Vākyapadīya* 1.32) 291 ff. cf. NM I 316.9–15: अत एवानुमानानामपश्यन्तः प्रमाणताम्। तद्विस्रंभनिषेधार्थमिदमाहुर्मनीषिणः॥ हस्तस्पर्शा*दिवान्धेन (em. : ॰दिना॰ ed.) विषमे पथि धावता। अनुमानप्रधानेन विनिपातो न दुर्लभः॥ (*Vākyapadīya* 1.42) अपि च, यत्नेनानुमितो ऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥ (*Vākyapadīya* 1.34) 302 cf. NM I 317.4–5: अनुमानापलापे तु प्रत्यक्षादपि दुर्लभा। लोकयात्रेति लोकाः स्युर्लिखिता इव निश्चलाः॥

---

**288 भेदा॰** ] PāPuRT$^{pc}$, मेदा RT$^{ac}$ **295 ॰पाद्यते** ] RT (em. ?), ॰पद्यते PāPu

॥ भट्टा॰ ॥

क्षुधाकुलत्वाद्दीनौदने प्रवर्तसे, न सिकतायाम्। अम्भांस्यपेक्षसे पिपासितो न विभावसुम्।

॥ वृद्धा॰ ॥

यद्येवं ततः किम्?

॥ भट्टा॰ ॥

सखे, प्रधानता नाम न खल्विन्द्रियगोचरः।
सान्वयव्यतिरेकाभ्यां भावानामवगम्यते॥ १८ ॥
अन्वयव्यतिरेकौ च मुख्यं लिङ्गस्य लक्षणम्।
यत्रस्थं दृश्यते लिङ्गं तस्य सा पक्षधर्मता॥ १९ ॥

एत एव चानुमानस्य प्राणा अन्वयव्यतिरेकौ पक्षधर्मतेति।

॥ वृद्धा॰ ॥

नन्वयं सुखदुःखसाधनतानिश्चयनिमित्तको व्यवहारस्तिरश्चामिव मनुष्याणामपि प्रतिभयैव भविष्यति।

॥ भट्टा॰ ॥

मैवम्। अविदितनियतनिमित्तं हि ज्ञानं प्रतिभेत्युच्यते। इह च विदितमेव निमित्तमन्वयव्यतिरेकादि, न च स्वसंवेद्यस्य निह्नवो युक्तः।

॥ वृद्धा॰ ॥

---

306 f. cf. NM I 317.6–8: प्रत्यक्षदृष्टमपि पदार्थजातं तज्जातीयत्वलिङ्गव्यापारेण सुखसाधनमितरकारणमिति वा निश्चित्य तदुपाददते जहति वा लौकिकाः। 320 f. cf. NM I 318.13–319.4: न च प्रतिभामात्रमानुमानिकी प्रमितिरिति वक्तुं युक्तम्, नियतात् कुतश्चिदेव वस्तुनः क्वचिदेव वस्तुनि (following the reading of *Pāṭhāntarāṇi* at the end of vol. I) प्रतीतिदर्शनादित्युक्तत्वात्, नियमश्च यद्यगृहीत एव प्रतीत्यङ्गं भवेन्नारिकेलद्वीपवासिभिरपि धूमदर्शनात् कृशानुरनुमीयेत। न चैवमस्तीति नियमग्रहणमपेक्षणीयम्। 320 on *pratibhā* see NM I 275.9–276.5: ननु प्रत्यक्षमपि मा भूत् (i.e. प्रतिभा), इन्द्रियानपेक्षत्वात्—मैवम्—मनस एव तत्रेन्द्रियत्वात्। पूर्वोत्पन्नचाक्षुषविज्ञानविशेषणस्य बाह्यस्य वस्तुनो मनो ग्राहकमिति नान्धाद्यभाव इत्युक्तम्। शब्दाद्युपायान्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति, सुरभि केतककुसुमं मधुरा शर्करेति ज्ञानवदित्यप्युक्तम्। अत एव नानियतनिमित्तकं ज्ञानं प्रतिभेति वक्तव्यम्, प्रत्यक्षनिमित्तत्वात्।

---

**306** क्षुधाकुलत्वाद्दीनौदने ] conj., क्षुधाकुशलत्वदीनोदने PāPu, क्षुधाकुलस्त्वं दीनौदने em. RT **307** अम्भांस्यपेक्षसे पिपासितो न विभावसुम् ] em. RT, अंभं पास्य नेक्षसे पिपासितो विभावसुं PāPu **309** किम् ] PāPuRT$^{pc}$, किम RT$^{ac}$ **311** प्रधानता ] PāPu, प्रमाणता em. RT **312** सान्व॰ ] PāPu, सान्य॰ RT(typo?) **317** सुख॰ ] Pā$^{pc}$PuRT, साधन॰ Pā$^{ac}$ **320** मैवम्। अवि॰ ] RT (em. ?), मैवं। मावि॰ Pā$^{pc}$Pu, मैवां। मावि॰ Pā$^{ac}$ **320** ॰निमित्तं ] em. RT, ॰मित्तं PāPu

ननु विदितमपि न विदितमेव निमित्तम्, अविनाभावसम्बन्धस्य ग्रहीतुमशक्यत्वात्। तदयमविचारित एव रमणीयो व्यवहारः, एतदेव च तत्त्वमिति तत्त्वविदः।

॥ भट्टा॰ ॥

आलस्यमिदं पादप्रसारिका वा। विचारयितुं वस्तूनि गृहीतक्षणा इमे विचक्षणाः।

॥ वृद्धा॰ ॥

नन्वशक्यो ऽयं विचार आनन्त्याद् धूमाग्निव्यक्तीनामधूमानग्निव्यक्तीनां च। दुरधिगमौ चासाक्षात्कृतसकलत्रिभुवनोदरवर्तिपदार्थसार्थैरिमावन्वयव्यतिरेकौ। सर्वविदां तु किमनुमानेन?

॥ भट्टा॰ ॥

अन्वयस्तावत्सामान्यमवलम्ब्य ग्रहीष्यते। व्यक्त्यानन्त्यमबाधकं धूमत्वस्यैकत्वादग्नित्वस्य च। भावसामान्यानुगमपुरःसर एव च तदभावयोरप्यनुगमो ग्रहीष्यते। स एव च व्यतिरेकः।

भावयोः साहचर्यं यदन्वयं तं प्रचक्षते।
व्यतिरेकं तु मन्यन्ते साहित्यं तदभावयोः॥ २०॥

---

324 ff. cf. NM I 317.9–14: अथाविचारितरमणीयतैव तत्त्वं न तु लक्षणनियमः शक्यक्रियस्तस्येति लक्षणाक्षेपो ऽयमुच्यते सो ऽप्ययुक्तः। यतः, यं कञ्चिदर्थमालोक्य यः कश्चिन्नावगम्यते। कञ्चिदेवाक्षिपत्यर्थमर्थः कश्चिदिति स्थितिः॥ तत्र वस्तुस्वभावो ऽयमिति पादप्रसारिका। दृश्यते ह्यविनाभूतादर्थादर्थान्तरे मतिः॥ 330 ff. cf. NM I 314.5–10: भवन्नप्यविनाभावः परिच्छेत्तुं न शक्यते। जगत्त्रयगताशेषपदार्थालोचनाद्विना॥ न प्रत्यक्षीकृता यावद् धूमाग्निव्यक्तयो ऽखिलाः। तावत् स्यादपि धूमो ऽसौ यो ऽनग्नेरिति शङ्क्यते॥ ये तु प्रत्यक्षतो विश्वं पश्यन्ति हि भवादृशाः। किं दिव्यचक्षुषामेषामनुमानप्रयोजनम्॥ 334 ff. NM I 319.11–12: न च सकलत्रिभुवनविवरनिरुद्धधूमाग्निव्यक्तिसार्थसाक्षात्करणमुपयुज्यते ज्वलनत्वादिसामान्यपुरस्सरतया व्याप्तिग्रहणात्।; NM I 322.6–323.2: यद्यपि चानग्नित्वाद्यभावसामान्यं नास्ति तथापि प्रतिषेध्याग्नित्वसामान्यानुगमसिद्ध्यैव तदभावानुगमग्रहणं सिद्ध्यति। सकलव्यक्तिविज्ञानमनङ्गं व्याप्तिनिश्चये। भावसामान्ययोर्यद्वत् तथैव तदभावयोः॥ भावयोः साहचर्यं यदन्वयं तत् प्रचक्षते। व्यतिरेकं तु मन्यन्ते साहित्यं तदभावयोः॥

---

**323** ॰भावसम्बन्धस्य ] RT (em. ?), ॰भावासंबन्धस्य PāPu **327** वस्तूनि ] RT (em. ?), वस्तुनि PāPu **330** ॰शक्यो ] em. RT, ॰शब्दो PāPu **330** ॰र आनन्त्याद्॰ ] RT (em. ?), ॰र आनंद्याद्॰ Pā[pc]Pu, ॰रा आनंद्याद्॰ Pā[ac] **330** ॰नामधूमानग्निव्य॰ ] conj. RT, ॰नां धूमानग्निर्व्य॰ PāPu **331** ॰गमौ ] em. RT, ॰गमा PāPu **331** चासाक्षा॰ ] em. RT, चसाक्षा॰ PāPu[pc], चसासक्षा॰ Pu[ac] **332** सर्व॰ ] PāRT, प्सर्व॰ Pu **335** तदभा॰ ] PāRT, तक्षदभा॰ Pu **335** ॰गमो ] conj. Sanderson, ॰ग्रहो PāPuRT **337** भावयोः ] PāRT, भावाया Pu **337** ॰चर्यं ] Pā[pc]RT, ॰चर्यां Pā[ac]Pu **337** तं प्र॰ ] PāPu, तत् प्र॰ RT (em. ?)

पक्षधर्मता तु तपस्विनी सुबोधैव निरधिकरणलिङ्गधर्मानवधारणादिति। तदेवं सुशकतया निमित्तनिश्चयस्य विपश्चितामिव तिरश्चामपि प्रमाणैरेव व्यवहारः। यथाह भाष्यकारः,

तदेवमेभिः प्रमाणैर्देवमनुष्यतिरश्चां व्यवहाराः प्रकल्पन्ते। नातो ऽन्यथेति।

॥ वृद्धा॰ ॥

ननु भवतु लोकसिद्धानामुत्पन्नप्रतीतीनाम्, ⟨उत्पाद्यप्रतीतीनां तु⟩ अतिदुर्घटो ऽयं प्रकारः।

न हीश्वरं पृथिव्यादेः कार्याद् धूमादिवानलम्।
लौकिकाः प्रतिपद्यन्ते तार्किकैरप्रतारिताः॥ २१॥

॥ भट्टा॰ ॥

नारीजनो ऽपि बालो ऽपि गोपालो ऽपि भवानपि।
बुध्यते नियतादर्थादर्थान्तरमसंशयम्॥ २२॥
अविनाभावसामर्थ्याद् धूमेनेव विभावसोः।
अनुमानं स्वकार्येण कर्तुः सिध्यति धीमतः॥ २३॥

॥ वृद्धा॰ ॥

नन्वन्यदेव कुम्भादि कार्यं सम्भावितोदयम्।
अन्यदेव हि शैलादि तयोर्हि महदन्तरम्॥ २४॥

॥ भट्टा॰ ॥

अन्य एव हि धूमो ऽसौ कृशजन्मा महानसे।
अन्य एवायमद्रौ च व्याप्तव्योमदिगन्तरः॥ २५॥

---

342 *Nyāyabhāṣya ad Nyāyasūtra* 1.1.7 344 ff. cf. NM I 326.7–327.2: सुशिक्षिततराः प्राहुः, द्विविधमनुमानम्, किञ्चिदुत्पन्नप्रतीति किञ्चिदुत्पाद्यप्रतीति। ईश्वराद्यनुमानं तूत्पाद्यप्रतीति। तत्र धूमानुमानादेः प्रामाण्यं केन नेष्यते। अतो हि साध्यं बुध्यन्ते तार्किकैरक्षता अपि॥ यत् त्वात्मेश्वरसर्वज्ञपरलोकादिगोचरम्। अनुमानं न तस्येष्टं प्रामाण्यं तत्त्वदर्शिभिः॥ ऋजूनां जायते तस्मान्न तावदनुमेयधीः। यावत् कुटिलितं चेतो न तेषां विटतार्किकैः॥ 349 f. cf. NM I 317.2–3: अबलाबालगोपालहालिकप्रमुखा अपि। बुध्यन्ते नियतादर्थादर्थान्तरमसंशयम्॥ 357 f. cf. NM I 494.1–5: उच्यते। यादृगिति न बुध्यामहे। धूमो हि महानसे कुम्भदासीफूत्कारमारुतसन्धुक्ष्यमाणमन्दज्वलनजन्मा कृशप्रायप्रकृतिरुपलब्धः। स यदि पर्वते प्रबलसमीरणोल्लसितहुतवहप्लुष्यमाणमहामहीरुहस्कन्धेन्धनप्रभवो बहुलबहुलः खमण्डलमखिलमाक्रामन्नुपलभ्यते तत् किमिदानीमनलप्रमितिं मा कार्षीत्।

---

**339** ॰र्मानवधारणा॰ ] PāPu, ॰र्मानधिकरणा॰ RT (em. ?) **342** प्र॰ ] PuRT, प्रा॰ Pā **344** ॰मुत्पन्न॰ ] PāPu, ॰मनुत्पन्न॰ em. RT **344** ⟨उत्पाद्यप्रतीतीनां तु⟩ ] conj., om. PāPuRT **347** ॰रप्र॰ ] em. RT, ॰रप्रति॰ PāPu **349** ॰जनो ] PāPuRT$^{pc}$, ॰जना RT$^{ac}$ **351** ॰द्धूमेनेव ] PāRT, ॰द्धूमोनव Pu **354** नन्व॰ ] em. RT, नत्व॰ PāPu **355** शैलादि ] em. RT, शीलादि PāPu **358** ॰दिगन्तरः ] em. RT, ॰दिगंबरः PāPu

किं चेदं रक्तपटोच्छिष्टं भुज्यते,

सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत्।
सन्निवेशादि तत्तस्माद्युक्तं यदनुमीयते॥ २६॥

इति।

धर्मं नियतमालम्ब्य भवति ह्यनुमाक्रमः।
क्व वा सर्वात्मना साम्यं साध्यदृष्टान्तधर्मिणोः॥ २७॥

॥ वृद्धा॰ ॥

नन्वन्यत्र वास्तवं सामान्यमिह तु शब्दसामान्यमात्रम्, न वस्तुसामान्यम्। शब्दसामान्ये चातिप्रसङ्गः।

॥ भट्टा॰, सस्मितम्॥

कुतो बौद्धगृहे वास्तवं सामान्यम्?

बुद्ध्यारूढं बहिष्ठं वा सत्यं सांवृतमेव वा।
सामान्यमवलम्ब्यैषा लोकयात्रा प्रतीयते॥ २८॥
न परस्परतः साम्यं कार्याणामपि भूयसाम्।
तदिमे यादृगित्यस्य पदस्यार्थं न मन्महे॥ २९॥

॥ वृद्धा॰ ॥

ननु विलक्षणमेवेदं क्षित्यादि कार्यम्।

॥ भट्टा॰ ॥

ननु विलक्षणमेव कर्तारं कल्पयन्तु भवन्तः।

360 cf. NM I 493.10–15: न हि पाण्डुतामात्रसाधारणत्वेन धूमादिवन् (*dhūmādivan:* MSS, *dhūmād iva:* ed.) मक्कोलरजोराशेरपि (*makkola-:* em., *kakkola-:* ed) कृशानुरनुमातुं शक्यत इति। तदुक्तम्, सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत्। सन्निवेशादि तत्तसमाद्युक्तं यदनुमीयते॥ वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिनः। न युक्तानुमितिः पाण्डुद्रव्यादिव हुताशने॥ इति।; cf. *Pramāṇavārtika* (Pandey) *pramāṇasiddhi* 13–14. 363 ff. cf. NM I 494.6–14 अथ विशेषरहितं धूममात्रमग्निमात्रेण व्याप्तमवगतमिति ततस्तदनुमानं इहापि सन्निवेशमात्रं कर्तृमात्रेण व्याप्तमिति ततो ऽपि तदनुमीयताम्॥ ननु सन्निवेशशब्दसाधारणमात्रमत्र (°*sādhāraṇamātram atra:* MSS, °*mātrasādhāraṇyam atra:* ed.) न वस्तुसामान्यं किञ्चिदस्ति। भिक्षो, धूमो (*dhūme:* MSS, *dhūmo* ed.) ऽपि भवद्दर्शने किं वस्तुसामान्यमस्ति। मा भूद्वस्तुसामान्यमाकाशकालादिव्यावृत्तिरूपं तु संव्यवहारकारणमस्त्येव। हन्त तर्हि प्रकृते ऽप्यसन्निवेशव्यावृत्तिरूपं भवतु सामान्यमाकाशकालादिविलक्षणरूपत्वात् पृथिव्यादेः। 377 cf. NM I 503.12–13: यथा चन्दनधूममितरधूमविसदृशमवलोक्य चन्दन एव वह्निरनुमीयते तथा विलक्षणात् कार्याद्विलक्षण एव कर्ता ऽनुमास्यते।

**363** °क्रमः ] em. RT, °कमः PāPu **369** सामान्यम् ] RT (em. ?), सामान्य PāPu **370** °ष्ठं ] RT (em. ?), °स्थं PāPu **371** प्रतीयते ] PāPu, प्रवर्तते RT (em. ?) **373** यादृ° ] PāRT, याद° Pu **377** कर्तारं ] PāRT, कत्तारं Pu

॥ वृद्धा॰ ॥

न कल्पयितुमप्रसिद्धं शक्नुमः।

॥ भट्टा॰ ॥

वयमपि न कार्यमकर्तृकं वक्तुं शक्नुमः।

॥ वृद्धा॰ ॥

किमत्र तर्हि कुर्मः?

॥ भट्टा॰ ॥

कतरमत्र जहामः? किं कर्त्रतिशयो दुःखावहः किं ⟨वा⟩ कार्यमकर्तृकं दुःखावहम्? तत्र दृष्टसिद्धये ह्यदृष्टं कल्प्यते, न तु दृष्टमुत्सृज्यत इति न्यायाद्वरं कर्त्रतिशयः कार्यातिशयात् सह्यताम्, न तु कार्यताया एवोपेक्षणम्।

॥ वृद्धाम्भिः, भूमिमालिखति ॥

॥ भट्टा॰ ॥

अपि च लवनक्रियया दात्रमिव च्छिदिक्रियया परशुरिव रूपोपलब्ध्या यत् करणं लोचनमनुमीयते, तत्र नेत्रस्य दात्रपरश्वधाभ्यां किं साधर्म्यम्?

॥ वृद्धा॰ ॥

तदपि मानुमायि, किं नश्छिन्नम्?

॥ भट्टा ॥

ननु चक्षुषा विना कथं रूपं द्रक्ष्यसि?

॥ वृद्धा॰ ॥

भवतु तर्हि किमपि करणम्।

॥ भट्टा॰ ॥

भवत्वेतर्हि को ऽपि कर्ता।

---

386 cf. NM I 112.6: दृष्टसिद्धये ह्यदृष्टं कल्प्यते न तु दृष्टविघाताय। 390 f. cf. NM I 501.3–7: श्रोत्राद्यनुमाने ऽपि यथोदाहृते शक्यमेवमभिधातुम्। यादृगेव लवनक्रियायां दात्रादिकरणं काठिन्यादिधर्मकमवगतं तादृगेव श्रोत्रादि स्यात्। तद्विलक्षणकरणसाध्यतायां तु साध्यविकलो दृष्टान्तः छेदनादिक्रियाणामतीन्द्रियकरणकार्यत्वादर्शनादिति॥ 397 ff. cf. NM I 501.8–10: अथ क्रियामात्रं करणमात्रेण व्याप्तमवगतमिति तावन्मात्रमनुमापयति, तदिहापि सन्निवेशमात्रमधिष्ठातृमात्रेण व्याप्तमुपलब्धमिति तावन्मात्रमेवानुमापयतु।

---

**381** वक्तुं ] conj., त्यक्तुं PāPuRT **385** कतर॰ ] PāRT, करतर॰ Pu[pc], कररतर॰ Pu[ac] **385** ⟨वा⟩ ] em. RT, om. PāPu **386** ॰सिद्धये ] PāRT, ॰सिद्धाय Pu **386** कल्प्यते ] em., कल्पते PāPuRT **388** ॰लिखति ] RT (em. ?), ॰लिखेति PāPu **391** यत् करणं ] RT (em. ?), यत् कारणं PāPu **391** ॰श्व॰ ] RT (em. ?), ॰स्व॰ PāPu **393** मानुमायि ] em. RT, मात्रमायि PāPu **393** नश्छि॰ ] RT (em. ?), नच्छि॰ PāPu **399** ॰त्वेतर्हि ] RT (em. ?), ॰त्वितर्हि PāPu

॥ वृद्धा॰ ॥

न सह्यते कर्ता। करणं विना कथं क्रिया?

॥ भट्टा॰ ॥

कर्तारं विना कथं कार्यम्? कार्यमिति हि न डित्थादिवदभिधानम्, अपि तु क्रियत इति कार्यम्। क्रियते च कर्त्रा च विना केनेति न विद्मः। तदेवमियमीश्वरानुमानशिरोर्तिरभैषज्या सह्यताम्। किं क्रियते?

॥ वृद्धा॰, भूमिमालिखति॥

॥ भट्टा॰ ॥

अपि च परलोकवेदनामपि कष्टां सोढुमर्हति भवान्।

॥ वृद्धा॰ ॥

न जीवन् सहिष्यते।

॥ भट्टा॰ ॥

ननु क्षिप्रमेव मरिष्यसि।

॥ वृद्धा॰ ॥

कथमिव?

॥ भट्टा॰ ॥

चैतन्यमयावद्द्रव्यभावितया स्वसंवेद्यतया च न भूतधर्मा भवितुमर्हति। न च ज्ञानसन्ततिपक्षे कश्चिदेकमनुसन्धातारमन्तरेण स्मरणेच्छादिव्यवहार उपपद्यते।

॥ वृद्धा॰ ॥

अस्तु तर्हि किमप्येवं प्रमातृतत्त्वम्। तत् पुनरूर्ध्वं देहदाहादस्तीति किमत्र प्रमाणम्?

---

416 ff. cf. NM II 277.14–278.6: ज्ञानेच्छासुखदुःखादि किलेदं लिङ्गमात्मनः। एकाश्रयतया ज्ञातमनुसन्धातृबोधकम्॥ तथात्वेन च तज्ज्ञानमाश्रयज्ञानपूर्वकम्। ज्ञाते तत्राफलं लिङ्गमज्ञाते तु न लिङ्गता॥ तस्मात् प्रत्यक्ष एवात्मा वरमभ्युपगम्यताम्। वृद्धागमानुसारेण संविदालोकनेन च॥ अथ वाभिनिवेशेन किमनेन प्रयोजनम्। अनुमेयत्वमेवास्तु लिङ्गेनेच्छादिनात्मनः॥ तदाह सूत्रकारः, इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् (*Nyāyasūtra* 1.1.10) ।; also NM II 289.4–5: चैतन्यशून्यं शरीरम्, शरीरत्वात्, भूतशरीरवत्। न शरीरधर्मश्चैतन्यम्, अयावद्द्रव्यभावित्वात्।

---

**401** करणं ] PāPuRT$^{pc}$, करण RT$^{ac}$ **405** तदेवमियमी॰ ] PāPu, तदेवमी॰ RT (em. ?) **405** ॰मान॰ ] PāPu, ॰मानं RT (em. ?) **405** ॰शिरोर्तिरभैषज्या ] conj., ॰शिरोर्त्तिभैषज्या PāPuRT **405** क्रियते ] em. RT, क्रियति PāPu **406** ॰लिखति ] RT (em. ?), ॰लिखेति PāPu **412** मरिष्यसि ] PāPuRT$^{pc}$, मरिष्यति RT$^{ac}$ **416** चैतन्यमयावद्द्रव्य॰ ] em. RT, चैतन्यमयाद्द्रव्य॰ PāPu

॥ भट्टा॰ ॥

साधो, न प्रमाणमन्यत्तत्रोपयुज्यते।

॥ वृद्धा॰ ॥

किमिति?

॥ भट्टा॰ ॥

स्वाभाविकविनाशभावो हि निषिद्धभावः। न च प्रमातुरुत्पत्तिर्वा विनाशो वा तत्कारणं वा कदाचिदनुभूयते। न च सावयवत्वादिना पटादेरिव तन्तुव्यतिषङ्गविमोचनादिना नाशः कल्पते। तदस्य प्रमातृतत्त्वस्य स्वरूपमेवोपलभ्यते नोत्पादविनाशावित्यस्ति चेत् प्रमाता नित्य एवासौ। नित्यश्चेत्, स एव परलोकी। किमिदमुच्यते चार्वाकैः,

परलोकिनो ऽभावात्परलोकाभावः

इति? अन्यदपि, बालस्य हर्षभयशोकादि स्तन्याभिलाषादि च न स्वाभाविकं नाकस्मिकं न प्रतिभामात्रकृतमिति वा वक्तुं शक्यमित्यतो ऽपि नित्यतात्मनो ऽनुमीयत एव।

॥ वृद्धा॰ ॥

नन्वीश्वरसिद्धिप्रसङ्गे परलोकचर्चया किमायातम्?

॥ भट्टा॰ ॥

इदमायातम्। परलोके सति नाकर्मनिमित्तो भूतसर्ग उपपद्यते।

॥ वृद्धा॰ ॥

ततः किम्?

॥ भट्टा॰ ॥

कर्मणामपि शरीरादिसर्गे हेतुत्वम्।

॥ वृद्धा॰ ॥

पुनस्ततः किम्?

॥ भट्टा॰ ॥

ननु कर्माण्यचेतनानि।

॥ वृद्धा॰ ॥

ततो ऽपि किम्?

---

**428** कदाचिद॰ ] PāRT, कदाचिंद Pu **429** ॰वोप॰ ] PuRT, ॰वोपप॰ Pā **433** ॰दि च न ] em., ॰दिवन PāPu, ॰दि वा न RT (em. ?) **434** प्रतिभा॰ ] em. RT, पतिता॰ PāPu **437** ॰प्रसङ्गे ] em. RT, ॰प्रसंग॰ Pā, ॰प्रंसग॰ Pu **437** ॰चर्चया ] em. RT, ॰चर्चायाः Pā$^{pc}$Pu, ॰चर्चायीः Pā$^{ac}$

॥ भट्टा॰ ॥

नन्वचेतनं चेतनानधिष्ठितं सन्न कारणतामेति।

॥ वृद्धा॰ ॥

ननु चेतनास्तेषामेव कर्मणां कर्तारो ऽधिष्ठातारो भविष्यन्ति।

॥ भट्टा॰ ॥

न भवितुमर्हन्ति भिन्नाभिप्रायाणां सम्मानानुपपत्तेः।

॥ वृद्धा॰ ॥

कथं तर्हि तक्ष्णाम्?

॥ भट्टा॰ ॥

किं तक्ष्णाम्?

॥ वृद्धा॰ ॥

ननु ते बहवो ऽप्येकं मन्दिरमारभन्ते।

॥ भट्टा॰ ॥

मैवम्, एकस्य स्थपतेराशयानुवर्तिनस्ते।

॥ वृद्धा॰ ॥

कथं तर्हि परिषदि द्विजानां सम्मानम्?

---

453 ff. cf. NM I 488.15–18: अथाचेतनानां चेतनानधिष्ठितानां स्रष्टृत्वमघटमानमिति तेषामधिष्ठाता चेतनः कल्प्यत इति चेत्—न—तदाश्रयाणामात्मनामेव चेतनत्वात् त एवाधिष्ठातारो भविष्यन्ति, किमधिष्ठात्रन्तरेणेश्वरेण?; also NM I 510.7–9: ननु तेषामेव कर्मणां कर्तार आत्मानश्चेतना अधिष्ठातारो भविष्यन्ति। यथाह भट्टः—‘कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनम्।’ (*Ślokavārtika, sambandhākṣepaparihāra* 75) इति। 455 cf. NM I 510.10–11: नैतदेवम्, नैते ऽधिष्ठातारो भवितुमर्हन्ति बहुत्वाद्विरुद्धाभिप्रायत्वाच्च। 457 ff. cf. NM I 510.11–511.4: तथा ह्येक एव कश्चित् स्थावरादिविशेषो राजादिविशेषो वा प्राणिकोटीनामनेकविधसुखदुःखोपभोगस्य हेतुः, स तैर्बहुभिरव्यवस्थिताभिप्रायैः कथमार*भ्येत (ms. *kha* : ॰भेत ed.), तेषामेकत्र सम्मानाभावात्। मठपरिषदो ऽपि क्वचिदेव सकलसाधारणोपकारिणि कार्ये भवत्यैकमत्यम्, न सर्वत्र। महाप्रासादाद्यारम्भे बहूनां तक्षादीनामेकस्थपत्याशयानुवर्तित्वं दृश्यते। पिपीलिकानामपि मृत्कूटकरणे तुल्यः कश्चिदुपकारः प्रवर्तकः, स्थपतिवदेकाशयानुवर्तित्वं वा कल्प्यम्। इह तु तत् स्थावरं शरीरं केषाञ्चिदुपकारकारणम्, इतरेषामपि भूयसामपकारकारणमिति कथं तैः सम्भूय सृज्यते? अनधिष्ठितानां त्वचेतनानामारम्भकत्वमयुक्तमेव। तस्मादवश्यमेकस्तेषां कर्मणामधिष्ठाता कल्पनीयः, यदिच्छामन्तरेण भवन्त्यपि कर्माणि न फलजन्मने प्रभवन्ति।

---

**451** ॰नानधि॰ ] em. RT, ॰नाधि॰ PāPu **451** ॰तं सन्न ] PāRT, ॰तसन्न Pu **451** कारण॰ ] em., करण॰ PāPuRT **453** ननु ] RT (em. ?), नतु PāPu **455** भिन्नाभिप्रा॰ ] RT (em. ?), भिन्नाप्रा॰ PāPu **455** सम्माना॰ ] em., संगना॰ PāPu, सङ्गता॰ em. RT **457** तक्ष्णाम् ] PāRT, तक्ष्णा Pu **463** मैवम्, एकस्य ] RT (em. ?), मैवंमेकस्य PāPu **465** सम्मानम् ] em., संगानां PāPu, सङ्गतानाम् em. RT

॥ भट्टा॰ ॥

तत्रापि कार्यकोविदस्य परिषत्पतेरेकस्याशयमनुरुध्यते परिषत्। इह पुना राजशरीरममात्यशरीरं वैकमेव प्राणिसहस्राणामुपकारापकारद्वारेण सुखदुःख-साधनमिति नूनं तत्कर्मभिः सम्भूय तदारभ्यते। न च येषां तद्राजशरीरं दुःखाय कल्पते ते तदारम्भनमनुमोदन्त इतीश्वर एव भगवांस्तस्य तावतः कर्मराशेरधिष्ठाता नूनमेषितव्य इत्येवं परिसिद्धावीश्वरसिद्धिरप्रत्याख्येया। एवं च तिष्ठतु पृथिवीसागरहिमवदादि महत्कार्यमपरिमितम्, मादृशकृशशरीरा-दिकार्यमात्रकेणाप्यनेन क्रमेण शक्यो ऽनुमातुमीश्वरः। अनेन च नयेनाचेतना-चतुरशरीरादिसंयोजितसरित्पुलिनसैकतकूटादयो ऽप्यकृष्टजाता गिरिकन्दर-वनगहनतृणलतावितानादयो वा जनस्य सुखदुःखकरतया तत्कर्माक्षिप्ता इति कर्माधिष्ठानद्वारेण नाचेतनकर्तृका भविष्यन्ति।

॥ वृद्धा॰, भूमिमालिखति॥

॥ भट्टा॰ ॥

आस्तामन्यत् स्थूलं वा कृशं वा कार्यम्। यो ऽयमस्मदादीनां कृषिसेवावा-णिज्यादिव्यवहारः शयनासनविहरणाहारादिव्यवहारान्तः, एषो ऽपि भूयसां प्राणिनामुपकारापकारकारणमिति सुखदुःखमुपजनयति। ततश्च सो ऽपि पूर्व-नीत्या तत्कर्माक्षिप्ततया कर्मणां चाचेतनतया तत्कर्तॄणां च भूयसां परस्परवि-रोधिनां सम्मानासम्भवेन भगवताधिष्ठितैः कर्मभिरेवारभ्यत इत्याह महात्मा पाराशर्यः,

अज्ञो जन्तुरनीशो ऽयमात्मनः सुखदुःखयोः।

---

485 NM I 511.14–18: तिष्ठतु वा सर्गप्रलयकालः। अद्यत्वे ऽपि यथोक्तनयेन तदिच्छामन्तरे-ण प्राणिनां कर्मविपाकानुपपत्तेरवश्यमीश्वरो ऽभ्युपगन्तव्यः, इतरथा सर्वव्यवहारविप्रलोपः। तदुक्तम्—'अज्ञो जन्तुरनीशो ऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥' (cf. MBh 3.31.27) इति।

---

**468** वैक॰ ] RT (em. ?), चैक॰ PāPu **468** ॰मुपकारापकार॰ ] RT (em. ?), ॰मुपका-रोपकार॰ PāPu **469** ॰भिः ] PāPu, ॰मिः RT(typo) **470** तावतः ] em., वावतः PāPu, यावतः RT (em. ?) **471** ॰ष्ठाता ] em. RT, ॰ष्ठितो PāPu **472** ॰मितम्, मा॰ ] conj. Isaacson, ॰मितमपितु मा॰ PāPuRT **473** नयेना॰ ] em. RT, येना॰ PāPu **474** ॰नाचतुर॰ ] em. RT, ॰नचतुर॰ PāPu **474** ऽप्यकृ॰ ] PāPu, ऽकृ॰ RT (em. ?) **474** ॰जाता ] conj. Isaacson, ॰जात॰ PāPuRT **475** ॰दुःखकरतया ] em. RT, ॰दुःखतया PāPu **476** नाचेतन॰ ] em. RT, नाचेत॰ PāPu **476** भविष्यन्ति ] PuRT, भविष्यति Pā **480** ॰नासन॰ ] em. RT, ॰नासने PāPu **481** प्राणि॰ ] PāPuRT$^{pc}$, प्राणी॰ RT$^{ac}$(typo) **482** चाचेतनतया ] em., वाचेतनया PāPu, वाचेतनतया RT (em. ?) **483** सम्मानास-म्भवेन ] em., संगानासंभवे PāPu, सङ्गतासम्भवे em. RT

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥ ३०॥

॥ वृद्धा॰ ॥

चर्चयिष्याम एतत्। गच्छामस्तावत्।

॥ भट्टारकानुवर्तिनस्तापसा एनमुपहसन्तो बहुप्रकारं परिभवन्ति। भट्टा॰, तान्निवार्य वृद्धाम्भिं प्रति॥

क्वेदानीं गम्यते? अद्याप्युद्वह क्षणं कर्मविषूचीम्। आगमप्रामाण्यादपीश्वरं प्रतिपद्यामहे।

॥ वृद्धा॰ ॥

आगमः प्रमाणमिति साहसम्।

॥ भट्टा॰, स्नातकमुद्दिश्य॥

श्रान्ता वयम्। तद् भवन्त एनं बोधयन्तु।

॥ स्नात॰ ॥

यथा भट्टारक आदिशति। अस्माकं त्वागमप्रामाण्यसमर्थने प्रयास एव नोपयुज्यते, निसर्गसिद्धत्वात्।

॥ वृद्धा॰ ॥

निसर्गसिद्धं प्रामाण्यं किमेतदभिधीयते।
न हि नित्यतया वेदः प्रामाण्यमधिगच्छति॥ ३१॥

किं हि नित्यं प्रमाणं दृष्टमाकाशादि? प्रत्यक्षादि वा यदनित्यं तस्य प्रामाण्ये कस्य विप्रतिपत्तिः?

॥ स्नात॰ ॥

साधो,

न हि नित्यतयास्माभिः प्रामाण्यमभिधीयते।

---

501 ff. cf. NM I 442.11–14: अथ स्वतः प्रामाण्यं भवतीत्येष पक्ष आश्रीयते सो ऽप्ययुक्तः, कार्याणां कारणाधीनजन्मत्वात्, प्रामाण्यस्य च कार्यत्वात्। अस्ति च प्रामाण्यं, वस्तु च तत्, न च नित्यमिति कार्यमेव तत्। कार्यं च कार्यत्वादेव न स्वतो भवितुमर्हति इति।

---

**486** ॰प्रेरितो ] PuRT, ॰प्रेरिता Pā **486** वा…वा ] RT (em. ?), चा…चा PāPu **488** एतत्। ग॰ ] em., एतत्। तद्ग॰ RT (em. ?), एततद्ग॰ Pā, एतद्ग॰ Pu **489** भट्टारका॰ ] conj., भट्टा॥ लोका॰ PāPuRT **489** परिभवन्ति ] conj. Isaacson, परिक्रामन्ति PāPuRT **490** भट्टा॰ ] PāPu, om. RT **490** ॰वार्य ] PāRT$^{pc}$, ॰र्वार्य PuRT$^{ac}$ **491** अद्या॰ ] PāPu, अथा॰ RT (em. ?) **491** कर्मविषूचीम् ] RT (em. ?), कर्मविषूवीं PāPu **496** श्रान्ता ] PāRT, श्राता Pu **496** ॰यन्तु ] PāRT, ॰यंयु Pu **498** ॰ण्यसमर्थने ] em. RT, ण्यासमर्थने PāPu **498** प्रयास ] PāRT, प्रषास Pu **502** वेदः ] RT (em. ?), चेद॰ PāPu **503** नित्यं ] em., नित्य॰ PāPuRT **504** प्रामाण्ये कस्य वि॰ ] em., प्रामाण्यमस्य वि॰ PāPuRT

वेदस्य बोधकत्वात्तु तथाभावं प्रचक्ष्महे॥ ३२॥

॥ वृद्धा॰ ॥

नन्वस्ति बाध्यमाने ऽपि शब्दे बोधकता क्वचित्।
करेणुः करशाखायामिति केनाप्युदीरिते॥ ३३॥

॥ स्नात॰ ॥

नैवान्विताभिधानं हि शाब्दमत्रापि बाधते।
बाध्यते त्वभिधेये ऽर्थे प्रमाणान्तरदर्शनम्॥ ३४॥

॥ वृद्धा॰ ॥

प्रमाणान्तरदृष्टे ऽर्थे ननु शब्दः प्रवर्तते।
अतो विषयबाधेन बाधितः स्यात् स एव ते॥ ३५॥

॥ स्नात॰ ॥

बाध्यतां विषयो यस्य प्रमाणान्तरगोचरः।
चोदनाया नियोगात्मा विषयस्त्वन्यदुर्लभः॥ ३६॥
स च मानान्तराक्रान्तेरभूमित्वान्निसर्गतः।
अनुग्रहोपघाताभ्यां तत्कृताभ्यां न लिप्यते॥ ३७॥

---

510 ff. cf. NM I 418.15–419.10: प्रकाशात्मनस्तु शब्दस्य वक्तृगुणदोषाधीने यथार्थेतरत्वे। अत एवाङ्गुलिशिखराधिकरणकरेणुशतवचसि बाधिते ऽपि पुनः पुनरुच्चार्यमाणे भवति विभ्रमः प्रकाशत्वरूपानपायात्। न त्वेष शब्दस्य दोषः॥ पदार्थानां तु संसर्गमसमीक्ष्य प्रजल्पतः। वक्तुरेव प्रमादो ऽयं न शब्दो ऽत्रापराध्यति॥ तदुक्तम्—प्रमाणान्तरदर्शनमत्र बाध्यते न पुनर्हस्तियूथशतमिति शाब्दो ऽन्वयः। पुरुषो हि स्वदर्शनं शब्देन परेषां प्रकाशयति। तत्र तद्दर्शनं चेद्दुष्टम्, दुष्टः शाब्दप्रत्ययः। अदुष्टं चेत्, अदुष्ट इति गुणवतः पुरुषस्यादुष्टं दर्शनं भवति, दोषवतो दुष्टमिति।; also NM II 211.6–212.3: प्रकाशकत्वं शब्दस्य व्यापारो हि निसर्गतः। पुंसस्तु गुणदोषाभ्यां तस्मिन् सदसदर्थता॥ क्रियाकारकसंसर्गबुद्धिरत्रापि [i.e. करशाखादिवाक्यादौ] शब्दजा। तादृश्येवायथार्था तु नरबुद्धिप्रमादतः॥ तदुक्तं प्रमाणान्तरदर्शनमत्र बाध्यते इति॥ अत एव प्रमाणत्वं शब्दे निष्प्रतिमं स्वतः। शब्दे कर्मणि तत्रापि बाधकानुपसर्पणात्॥ तेनाङ्गुल्यग्रवाक्ये ऽपि शाब्दो ऽस्त्येव समन्वयः। (…) वस्तुतो ऽसंभवो यस्तु तुल्य एव स आवयोः। अयोग्यत्वेन संसर्गप्रतीत्यर्थनिबर्हणात्॥ यदि तु शाब्दो ऽन्वयो न भवेत्, कचतटपादिवर्णनिर्देशमात्रमिदं स्यात्, दशदाडिमादिप्रलापतुल्यं वा स्यात्। अनन्विताभिधानाद्वाक्यत्वमेव न भवेत्। अस्ति तु वाक्यत्वम्। तेन मन्यामहे, अस्ति शाब्दो ऽन्वय इत्यत्राप्यन्विताभिधानं न विरुद्धम्। बाधकस्त्वन्यविषय एव न शब्दसंसर्गविषय इत्युक्तम्। 520 cf. NM I 664.7-8: वाक्यार्थ एव नियोगात्मापूर्वशब्दवाच्यः, धर्मशब्देन च स एवोच्यत इति प्राभाकराः कथयन्ति। 521 f. cf. NM II 212.3–5: अत एव स्वसामर्थ्यसिद्धनिर्निबन्धबोधकत्वव्यापारे शब्दे स्वतो वेदप्रामाण्यमनाकुलं निर्वक्ष्यति, अपौरुषेयतया विप्लवासंभवात्। स्वव्यापारस्य च स्वत एव शुद्धत्वमित्यलमतिप्रसङ्गेन।

---

**510** नन्वस्ति ] PāPu, नत्वस्ति RT (em. ?) **516** ॰दृष्टे ऽर्थे ] PāRT, ॰दृष्टो ऽर्थ Pu **516** शब्दः ] PāRT, शब्द Pu **516** प्रवर्तते ] PāRT, प्रवर्त्तत Pu **517** स्यात् स ] PāRT, सात्स Pu **521** ॰न्तराक्रा॰ ] em. RT, ॰न्तरका॰ PāPu

अनुग्रहे ऽनुवादत्वमुपघाते त्वसत्यता।
द्वयस्यानुपपत्तौ तु कथं स्यादप्रमाणता? ॥ ३८ ॥

॥ वृद्धा॰ ॥

ननु सम्बन्धसापेक्षः शब्दो भवति वाचकः।
स चैव पुरुषाधीनः कथं स्यात्तदगोचरे? ॥ ३९ ॥

॥ स्नात॰ ॥

सम्बन्धो ननु शक्तिरेव वचसः सा चास्य नैसर्गिकी
पुंसा कर्तुमशक्य एव समयः शब्दैर्विना वाचकैः।
व्युत्पत्तिर्व्यवहारतस्तु घटते चेष्टानिमित्ते नृणा-
मात्मन्येव तथा प्रथामुपगते शब्दैकगम्ये विधौ॥ ४०॥

कुर्यादिति पदस्यार्थस्त्रिकालस्पर्शवर्जितः।
न कालविषयैरन्यैः प्रमाणैरवगाह्यते॥ ४१॥

॥ वृद्धा॰ ॥

कथं तर्हि तत्र व्युत्पत्तिः?

॥ स्नात॰ ॥

---

529 ff. cf. NM I 590.15–591.4: यदपि सम्बन्धकरणे पुरुषानपेक्षत्वमुच्यते—चित्रभानोरिव दहनशक्तिः, शब्दस्य नैसर्गिकी वाचकशक्तिः। व्युत्पत्तिस्तु वृद्धेभ्य एव व्यवहरमाणेभ्य उपलभ्यत इति किमत्र पुरुषः करिष्यतीति—तदप्यघटमानम्, पुरुषपरिपाटितसमयसम्बन्धव्यतिरेकेण शब्दादर्थप्रत्ययानुपपत्तेः।; also NM I 691.7–12: अत्र केचिदाहुः—सर्वस्यैव वेदस्य कार्ये ऽर्थे प्रामाण्यम्। तथा हि, गृहीतसम्बन्धः शब्दो ऽर्थमवगमयति। सम्बन्धग्रहणं चास्य वृद्धव्यवहारात्। वृद्धानां च व्यवहारः 'पानीयमानय', 'गां बधान', 'ग्रामं गच्छ' इति कार्यप्रतिपादकैरेव शब्दैः प्रवर्तत इति तत्रैव व्युत्पद्यन्ते बालाः। प्रयोजनोद्देशेन हि वृद्धा वाक्यानि प्रयुञ्जते। 533 f. cf. NM I 270.11–271.8: ननु कर्तव्यतारूपस्त्रिकालस्पर्शवर्जितः। चक्षुर्विषयतामेति धर्म इत्यतिसाहसम्॥ सत्यं साहसमेतत्ते मम वा चर्मचक्षुषः। न त्वेष दुर्गमः पन्था योगिनां सर्वदर्शिनाम्॥ यच्च त्रिकालानवच्छिन्नो यजेतेत्यादिलिङादियुक्तशब्दैकशरणावगमो धर्मः कथं ततो ऽन्येन प्रमाणेन परिच्छिद्यतामित्युच्यते—तदपि प्रक्रियामात्रम्। किमिव हि त्रिकालस्पर्शास्पर्शाभ्यां कृत्यम्? यथा वयं गमनादिक्रियाणां देशान्तरप्राप्त्यादिप्रयोजनतां जानीमः, तथाग्निहोत्रादिक्रियाणां स्वर्गादिफलतां ज्ञास्यन्ति योगिन इति किमत्र साहसम्? 536 cf. NM II 131.2–3: प्रमाणन्तरसंपर्कविकले भवतः कथम्। नियोगात्मनि वाक्यार्थे व्युत्पत्तिर्व्यवहारतः॥

---

**530** समयः ] PuRT, स समयः Pā **532** ॰न्येव तथा ] PuRT, ॰न्येतथा Pā **533** ॰काल॰ ] RT (em. ?), ॰कालः PāPu **534** ॰रन्यैः ] PāRT, ॰रन्यै Pu

ननूक्तमत्र, तन्न गृहीतं भवता। स्वात्मनि हि प्रेरकावगमपूर्विका चेष्टा दृष्टा। परस्यापि लिङ्विभक्तिं श्रुतवतश्चेष्टादर्शनात्ततः प्रेरकावगमो जात इति कल्प्यते। कीदृगसौ प्रेरक इति स्वयमेवात्मवदुपलभ्यते। न त्वसावेवंरूप इति रूपवानिव परस्मै दर्शयितुं शक्यते। परो ऽप्येनमनुभवत्येव, न चान्यस्मै दर्शयितुं शक्नोतीति प्रमाणान्तरागोचरे ऽपि सिद्धा व्युत्पत्तिः। वृद्धस्यापि बालदशायामेषैव गतिरित्यनादिः संसारः।

॥ वृद्धा° ॥

किमियतैव सिद्धं चोदनाप्रामाण्यम्?

॥ स्नात° ॥

किं वा मृगयते भवान्?

॥ वृद्धा° ॥

न प्रमाणान्तरानुग्रहरहितः शब्दः प्रमाणतामश्नुते। अभिधायक एव ह्यसौ नार्थतथात्वसमर्पकः।

॥ स्नात° ॥

---

538 ff. cf. NM II 108.3–16: शब्दैकगोचरस्तु नियोगः, व्युत्पत्तिश्च तत्र सूपपादैव। यो हि ‘यजेत’ ‘दद्यात्’ ‘जुहुयात्’ इति लिङादिभ्यो विधिः प्रतीयते, कथमसौ लिङादीनामगम्य इष्येत? व्युत्पत्तिश्चास्य व्यवहारादवकल्पते। ‘गच्छ’ ‘अधीष्व’ इति शृण्वन् वृद्धश्चेष्टमानो दृश्यते। चेष्टा च स्वात्मनि प्रवर्तिकावगमपूर्विका दृष्टा। प्रत्यक्षदृष्टे चाम्रादौ सुखसाधनतयान्वयव्यतिरेकाभ्यामवगते, तदनुस्मरणात् प्रवर्तमानः कस्मिंश्चिदात्माकूते समुपजाते सति भौतिकं व्यापारमारभते। स चात्मधर्म आत्मेव स्वसंवेद्यः। अहंप्रत्ययगम्यो ह्यात्मा नासौ परस्मै दर्शयितुं शक्यते। न च न चर्चयितुं शक्यते। एतावता नानुभूयत इति न शक्यते वक्तुम्। परो ऽपि ह्येनमहंप्रत्ययेनानुभवत्येव। तथायमपि भौतिकव्यापारहेतुरात्माकूतविषेशो न प्रमाणान्तरवेद्यो भवति। न च न वेद्यते, तत्संवेदने सति चेष्टाया दृष्टत्वात्। तस्मात् परमपि ‘गच्छ’ ‘अधीष्व’ इति शब्दश्रवणे सति चेष्टापन्नं दृष्ट्वा तस्यापि तादृक्प्रेरणावगमो ऽनुमीयते।; also NM II 131.8–10: स्वात्मनि प्रेरणावगमपूर्विकां हि चेष्टामुपलब्धवतस्ते परत्र चेष्टादर्शनात् तदनुमानं सेत्स्यति। 549 ff. cf. NM I 692.3–8: अतश्च कार्ये ऽर्थे शब्दस्य प्रामाण्यम्। यतश्च कार्यरूपो ऽर्थः शब्दस्यैव विषय इति तत्र शब्दः प्रमाणतां लभते। सिद्धो ऽर्थः प्रसिद्धत्वादेव प्रमाणान्तरपरिच्छेदयोग्य इति तत्प्रतिपादने तत्प्रमाणान्तरसव्यपेक्षः शब्दो भवति, ततश्च तद्ग्राहिणः प्रमाणान्तरस्यैव तत्र प्रामाण्यं स्यात्, न शब्दस्य।; also NM I 693.17–694.3: यत् पुनरभ्यधायि—कार्ये ऽर्थे प्रमाणान्तरनिरपेक्षतया प्रमाणं भवति शब्दः, भूतार्थे तु नेति—तदसत्—शब्दस्य प्रमाणान्तरसापेक्षत्वानपायात्। प्रमाणान्तरेणानवगते ह्यर्थे शब्दः प्रवर्तयितुमेव न शक्नोतीत्यवोचाम, वक्ष्यामश्च वाक्यार्थचिन्तायामपि। प्रमाणान्तरसापेक्षत्वं तस्य प्रत्युत प्रामाण्यमावहति न प्रतिहन्ति।

---

**538 ननूक्त°** ] em. RT, **ननक्त°** PāPu  **538 °वगम°** ] em. RT, **°वम°** PāPu  **538 दृष्टा** ] PāRT, **दष्टा** Pu  **539 लिङ्व°** ] RT (em. ?), **लिङ्वि°** PāPu  **539 °गमो** ] PāPu, **°ममो** RT(typo)  **541 °त्येव** ] RT (em. ?), **°त्येवं** PāPu  **542 बाल°** ] RT (em. ?), **चाल°** PāPu  **543 °नादिः** ] RT (em. ?), **°नादि°** PāPu  **545 चोदना°** ] PāPu, **वेद°** RT (em. ?)

अभिधायको ऽपि बोधक एव। प्रमाणं हि सर्वं बोधकमेव भवति, न तु घटमिव कण्ठे रज्ज्वा बद्ध्वा प्रमेयमर्पयति।

प्रमाणान्तरसंवादसापेक्षां च प्रमाणताम्।
वदन्तो नाधिगच्छेयुरन्तं युगशतैरपि॥ ४२॥
बाधः कारणदोषो वा द्वयं मिथ्यात्वकारणम्।
तच्चातिदुर्लभं वेद इति सिद्धा प्रमाणता॥ ४३॥

॥ वृद्धा°, भूमिमालिखति॥

॥ स्नातकानुचरा एनमुपहसन्ति॥

॥ स्नातकस्तान्वारयति॥

॥ भट्टा°॥

येयमार्येण वेदप्रामाण्यवेणी दर्शिता किं सैवापेक्ष्या किं वा तद्वचनादाम्नायप्रामाण्यं मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादित्येष साधीयान्पन्था इति स्वगृहकलहो ऽयमस्माकम्। अलं तेन। वेदद्विषो नास्तिकास्तावदेवंप्राया युष्माभिश्च निराकरणीया एव।

॥ स्नात°॥

यथा भगवानादिशति।

॥ नेपथ्ये कलकलः॥

॥ भट्टा°॥

किमेतत्?

॥ स्नात°॥

राजागमशंसी नन्वयं कलकलः। तद्वयं राज्ञः प्रत्यनन्तरीभवामः। भवन्तो ऽपि स्वागमोचितमर्घ्यादि राज्ञे सज्जीकुर्वन्तु।

॥ भट्टा°॥

यथाह भवान्।

---

562 f. cf. NM I 615.18–616.4: ‘तत् प्रमाणं बादरायणस्यानपेक्षत्वात्’ (*Jaiminisūtra* 1.1.5) इति य एष वेदप्रामाण्याधिगतौ जैमिनिना निरदेशि पन्थाः, यो वाक्षपादेन कणादेन च प्रकटितः ‘तद्वचनादाम्नायप्रामाण्यम्’ (*Vaiśeṣikasūtra* 10.2.9) इति ‘मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्’ (*Nyāyasūtra* 2.1.68) इति स चतुर्ष्वपि वेदेषु तुल्यः।

---

**552** °यको ] Pā$^{pc}$PuRT, °याको Pā$^{ac}$ **552** तु ] PāRT, नु Pu **557** तच्चाति° ] em. RT, ततश्चाति PāPu **562** येयमा° ] em., यो ऽयमा° PāPuRT **562** °वेणी ] em. RT, °वेषी PāPu **562** किं ] PāRT, र्कि Pu **562** सैवापेक्ष्या ] conj. Goodall, सैव क्षेप्या PāPuRT **567** भगवाना° ] em., भवाना° PāPuRT **572** प्रत्यनन्तरी ] PāPu, प्रत्यन्तरी RT(typo) **573** °मर्घ्यादि ] PāRT, °मर्थ्यादि Pu

॥ स्नात॰ ॥

इदं च पुनः पुनर्विज्ञाप्यसे भगवन्,

न हि द्विष्मो देवं शिवमनुपमैश्वर्यविभवं
स एवैको हेतुः स्थितिविलयसर्गेषु जगताम्।
स रुद्रः स ब्रह्मा स हरिरपरो वापि पुरुषः
परस्तेभ्यस्तस्मिन् भुवनमखिलं संश्रितमिदम्॥ ४४॥

तदिमे शैवपाशुपतकालमुखा महाव्रतिनश्च यथासुखमासताम्।

गुरुविद्यापि भवतां भाति मोहापसारिणी।
सा त्वस्तु तावद्विषया यावत्येव व्यवस्थिता॥ ४५॥

॥ भट्टा॰ ॥

यथा भवानाह।

॥ निष्क्रान्ताः सर्वे॥

॥ तृतीयो ऽङ्कः॥

---

**578** ॰मनुपमैश्वर्य॰ ] em.RT, ॰समुपैश्वर्य॰ PāPu **580** ॰परो ] PāPu[pc]RT, ॰पोरो Pu[ac] **582** ॰श्च ] PāRT, ॰श्र Pu **583** भवतां ] RT (em. ?), भवता PāPu **583** मोहापसा॰ ] RT (em. ?), मोहासा॰ PāPu **584** सा त्वस्तु ] em., साध्यस्तु PāPuRT **584** तावद्विषया यावत्येव व्यवस्थिता ] conj., तावद्विषया याचत्येव व्यवस्थिता PāPu, तावद्विषयो याचत्येव व्यवस्थितिम् conj.RT

॥ ततः प्रविशत्यृत्विगुपाध्यायश्च ॥

॥ ऋत्विक्, सोद्वेगम् ॥

कष्टं भोः कष्टम्। अन्यदेव चिन्तितमन्यदेवोपनतम्। वेदबाह्यसकलागम-तिरस्कारेणास्मिन् प्रसङ्गे सर्वमस्मद्भोग्यमेव भुवनं भविष्यतीति चिन्तितम्। यथाव्यासमेवाद्यापि बाह्यागमा वर्तन्त इत्युपनतम्। तथा हि,

शैवपाशुपतपाञ्चरात्रिकाः
  साङ्ख्यसौगतदिगम्बरादयः।
सर्व एव हि यथास्थिता इमे
  स्नातकस्य धिगपार्थकं श्रुतम्॥ १॥

॥ उपा॰ ॥

भो वयस्य, ननु राजपुरुषो ऽसावद्य संवृत्तः। राजा च परममाहेश्वर इति तदाराधनैकतानबुद्धिना तेन भवितव्यम्। यतः,

समीपतो भूमिभृतां हि पूरुषा-
  स्तदुक्तमेवानुवदन्त आसते।
स्ववृद्धिलुब्धास्तु न साध्वसाधु वा
  विवेचयन्ति प्रतिशब्दका इव॥ २॥

॥ ऋत्विक्॥

वयस्य, यथा मन्यसे। कः स्वार्थमवधीर्य मध्यस्थो धर्मैकतानबुद्धिर्भवति? किं तु कथं वेदैकविषययाजनाध्यापनादिवृत्तिभिरस्माभिः कालो नेतव्यः?

॥ उपा॰ ॥

वयस्य, यथैवातिक्रान्तो नीतस्तथैवागाम्यपि ग्रासवसनमात्रसन्तोषिभिर्नेष्यते। यतः,

अदुर्जनगिरो गोष्ठ्यो वीतमानग्रहाः प्रियाः।
पुण्यैर्विना न लभ्यन्ते निःसपत्नाश्च सम्पदः॥ ३॥

॥ ऋत्विक्॥

---

**1** ॰त्यृत्वि॰ ] PāPuRT$^{pc}$, ॰त्यत्वि॰ RT$^{ac}$   **4** ॰णास्मिन् ] em. RT, ॰णास्मि PāPu   **4** ॰स्मद्भो॰ ] em. RT, ॰स्मभो॰ PāPu   **5** ॰व्यास॰ ] PāPu, ॰न्यास॰ em. RT   **7** सा-ङ्ख्य॰ ] PuRT, शाङ्ख्य॰ Pā   **9** स्नातकस्य ] PuRT, स्नातकस्या Pā   **11** राज॰ ] em. RT, राजा॰ PāPu   **11** च ] PāRT, चर Pu   **15** स्ववृद्धिलुब्धास्तु ] em. RT, स्ववृद्धिलब्धास्तु PāPu   **16** विवेचयन्ति ] RT (em. ?), विचेचयन्ति PāPu   **18** वयस्य ] em. RT, वयस्यः PāPu   **18** धर्मै॰ ] PuRT, धर्मे॰ Pā   **19** कथं ] em. RT, यथा PāPu   **23** गोष्ठ्यो ] PāRT, गोष्टयो Pu   **24** ॰सपत्नाश्च ] RT (em. ?), ॰सपन्नाश्च PāPu

एवमेव। किं क्रियते? किं त्विदमधिकं मे कर्णशल्यम्।

॥ उपा॰ ॥

किमिव?

॥ ऋत्विक्॥

यदमी पाञ्चरात्रिका भागवता ब्राह्मणवद् व्यवहरन्ति। ब्राह्मणसमाजमध्यमनुप्रविश्य निर्विशङ्कमभिवादय इति जल्पन्ते। विशिष्टस्वरवर्णानुपूर्वीकतया वेदपाठमनुसरन्त इव पञ्चरात्रग्रन्थमधीयते। ब्राह्मणाः स्म इत्यात्मानं व्यपदिशन्ति व्यपदेशयन्ति च। शैवादयस्तु न चातुर्वर्ण्यमध्यपतिताः श्रुतिस्मृतिविहितमाश्रममवजहतः शासनान्तरपरिग्रहेणान्यथा वर्तन्ते। एते पुनरा जन्मन आ सन्ततेर्ब्राह्मणा एव वयमिति ब्रुवाणास्तथैव चातुराश्रम्यमनुकुर्वन्तीति महद्दुःखम्।

॥ उपा॰ ॥

वयस्य, कियदिदं दुःखम्?

याजने ऽध्यापने यौने सम्बन्धे ऽन्यत्र वा क्वचित्।
दूरात् परिहृता एव श्रोत्रियैः पाञ्चरात्रिकाः॥ ४॥

ब्राह्मणा इति तु व्यपदेशस्तेषां स्वसमयसंव्यवहारमात्रम्।

॥ ऋत्विक्॥

किमेतदल्पं दुःखम्?

॥ उपा॰ ॥

कियद्वैतत्? श्रुतिस्मृती अध्येतुं मीमांसां च, श्रौतं स्मार्तं च कर्मानुष्ठातुमेते क्वचिदपि न लभन्ते। ब्राह्मणीं च काञ्चन शीलाच्च्युतामुपयच्छन्तः प्रातिलौम्योदन्तेन योज्यन्ते। वेदाङ्गानि तु कानिचित् कियद्वाप्यधिगच्छन्तो ऽपि न क्वचिन् निषिध्यन्त इत्यलमुद्वेगेन। तदास्तामेतत्। इदं तु श्रुतं मया।

॥ ऋत्विक्॥

किमिव?

---

**26** एवमेव ] em. Isaacson, एवमेवम् PāPuRT **30** °हरन्ति ] PuRT, °हरति Pā **31** जल्पन्ते ] em. RT, जल्पन्त इति PāPu **33** च ] PāRT, च्च Pu **33** श्रुति° ] PāRT, स्रुति° Pu **35** सन्ततेर्ब्राह्मणा ] em. RT, सन्ततेव्राह्मणा Pā, सन्ततेब्राह्मणा Pu **35** ब्रुवा° ] PuRT, ध्रुवा° Pā **35** चातुराश्रम्य° ] em. RT, चतुराश्रमस्य° Pā (?) Pu **39** याजने ऽध्यापने ] PāRT$^{pc}$, याजनेध्यापान Pu, याजनाध्यापने RT$^{ac}$ **39** ऽन्यत्र ] RT (em. ?), त्यत्र PāPu **41** व्यपदेश° ] RT (em. ?), च्यपदेश Pā (?) Pu **41** °मात्रम् ] PuRT, °मावं Pā **46** शीलाच्च्यु° ] em. RT, शीलाच्यु° PāPu **47** °लौम्यो° ] em. RT, °लौम्ये° PāPu **47** कानिचित् कियद्वाप्य° ] em. RT, कानित्कियस्था अप्य° Pā, कानिचित्कियस्था अप्य° Pu

॥ उपा॰ ॥

अद्य खलु भागवतागमविचारमेव कर्तुं श्रीसङ्कर्षणो वैष्णवायतनं भागवतशतसहस्रसम्बाधं गतः। ब्राह्मणाश्च ब्रह्मद्वीपे विद्वांसः सहस्रसङ्ख्याः सङ्घटिताः। तत्र महत्या गोष्ठ्या भवितव्यम्। तदेहि तत्रैव गच्छामः।

॥ ऋत्विक्॥

दृष्टः सङ्कर्षणप्रतापः, स हि सर्वागमप्रामाण्यवादी। राज्ञी च श्रीसुगन्धादेवी तेष्वेव सानुक्रोशा श्रूयते। राजपुरुषो ऽपि कश्चिदनुग्राहकः सात्वतानामस्तीति वार्त्ता।

॥ उपा॰ ॥

अलमसदाशङ्काभिः। न यथाप्रस्तुताद् व्यवहारादधिकं तृणमपि ते कुब्जीकर्तुमीशते। तदेहि बाह्यागमानां मीमांसकसरस्वतीसागरे निमज्जतामुन्मज्जतां च विह्वलवेपितमनेकविधं द्रष्टुं तत्रैव गच्छावः।

॥ इति ⟨निष्क्रान्तौ⟩ ॥

॥ ततः प्रविशति श्रीसङ्कर्षणो बटुर्विभवतश्च परिवारः॥

॥ स्नात॰, सोद्वेगम्॥

बटो, सङ्कटे निपतिताः स्मः। यतः,

ये विश्वस्थितिसर्गसंहृतिदशापर्यायसम्पादन-
क्रीडासक्तमतेर्मतं भगवतो नारायणस्याश्रिताः।
तद्दृष्टेः कथमन्यथात्वमनया ब्रूमो वयं जिह्वया
शक्ष्यामः कृतिनां त्रयीमयधियां स्थातुं कथं वाग्रतः॥ ५॥

॥ बटुः॥

अय्य, अत्थि य्येव एदं। तह वि चिरादो पहुदि पउत्तो जहट्ठिदो संववहारो

---

72 ff. आर्य, अस्त्येवैतत्। तथापि चिरात् प्रभृति प्रवृत्तो यथास्थितः संव्यवहारो रक्ष्यते। किमत्रार्यो विसंष्ठुलः? तत् साम्प्रतं प्रेक्षतां पाञ्चरात्रिकप्रमुखमहापण्डितशतसहस्रसम्बाधमिमं प्रदेशमार्यः।

---

61 NM II 389.13: कर्तुं शक्नोति पूरुषस्तृणस्यापि न कुब्जताम्।

---

**52** भाग॰ ] em. RT, भग॰ PāPu **54** गोष्ठ्या ] RT (em. ?), गोष्ठ्या Pā, गोष्टया Pu **56** च ] em., व PāPu, तु em. RT **57** ॰क्रोशा ] RT (em. ?), ॰कोशा PāPu **61** तदेहि ] em. RT, तदेति PāPu **61** ॰सरस्वती॰ ] em. RT, ॰सारस्वती॰ PāPu **63** ⟨निष्क्रान्तौ⟩ ] em., ⟨निष्क्रान्तौ॥ विष्कम्भकः॥ ⟩em. RT, om. PāPu **66** निपतिताः ] em. RT, नपतिताः PāPu **69** कथ॰ ] PāPu$^{pc}$RT, कम॰ Pu$^{ac}$ **69** ॰मन्यथा॰ ] PāRT, ॰मन्यया॰ Pu **69** जिह्वया ] PāPu$^{pc}$RT, तिह्वया Pu$^{ac}$ **70** शक्ष्यामः ] RT (em. ?), शेक्ष्यामः Pā, शैक्ष्यामः Pu

रक्खीअदि। किं एत्थ अय्यो विसंठुलो? ता संपदं पेक्खदु पंचरत्तिअप्पमुह-महापंडितसयसहस्ससंबाधं इमं पदेसं अय्यो।

॥ स्नात°, परिक्रम्याग्रतो ऽवलोक्य सविस्मयम्॥

अहो महती परस्परस्पर्धानुबन्धप्रतन्यमानानल्पजल्पविकल्पकोलाहलाकुलितदिगन्तरैषा पण्डितपरिषत्। अस्यां हि

इतो वाक्येष्वालोचितविविधतात्पर्यगतय
 इतो नामाख्यातप्रकृतिकृतयत्नाः पदविदः।
इतो हेतुव्याप्तिग्रहपटुधियस्तर्ककुशला
 इतश्चैते वृद्धाः स्मृतिनयपुराणादिनिपुणाः॥ ६॥

अहो बत पुरहरहृदयस्य स्पृहणीयगुणोदधेर्विबुधगुणाकर्णनकर्णालङ्कारस्य पूरितसकलसाधुजनमनोरथस्य पुण्ययशसः श्रीयशोवर्मदेवस्य ब्रह्मलोकनिर्विशेषमेवेदं दृश्यते राष्ट्रम्।

॥ क्षणं विचिन्त्य स्वगतम्॥

इह खल्वितरेतरविरुद्धाभिधायिबहुविधविबुधप्रबन्धसम्बोधनप्रशासनमनुरुध्यमाने जने कथमिव मया वर्तितव्यम्?

पथि वेदविरोधदारुणे
 निपुणेनापि न शक्यनिर्णये।
किमहं करवाणि हन्त मे
 शरणं शार्ङ्गरथाङ्गशङ्खभृत्॥ ७॥

भवतु, भगवन्तमेव तावत् सम्प्रति शरणं प्रपद्ये।

॥ प्रकाशम्॥

बटो, प्रत्यासन्नमितो भगवदायतनम्। तदत्र प्रविश्य भगवन्तमशेषजनशरणं रणस्वामिनं प्रणिपत्य ततः सभामध्यमध्यासिष्ये।

॥ बटुः॥

---

**73** अय्यो ] em., अय्य PāPuRT **73** विसंठुलो ] em., विसंठुलं PāPuRT **73** संपदं ] PāRT, संपदां Pu **73** पेक्खदु ] RT (em. ?), पेक्खपु Pā, पक्खपु Pu **74** °संबाधं इमं पदेसं अय्यो ] conj., °संवाधमिसंपदेसमय्यो PāPu, °संबाधम्हि संपत्तो समय्यो em. RT **78** °गतय ] RT (em. ?), °गतयः PāPu **79** पदविदः ] em. RT, पदविदिः PāPu **80** हेतुव्याप्तिग्रहपटु° ] em. RT, हेतुर्व्याप्तिग्रहपहु° PāPu **81** °निपुणाः ] em. RT, °निपुणैः PāPu **82** पुरहरहृदयस्य ] conj. RT, पुरहतहृदयः PāPu, पुरुहूतहृदयस्य conj. RT **82** °दधेर्वि° ] RT (em. ?), °दधेवि° PāPu **82** °कर्णन° ] em. RT, °कर्णान° (?) Pā, °कर्णीन° Pu **83** °थस्य ] PāPu, °थस्थ RT (typo) **83** °वर्म° ] PāPu, °धर्म° RT (em. ?) **86** °रेत° ] Pā[pc]PuRT, °रेर° Pā[ac] **87** °रुध्यमाने ] PāRT, °राध्यमाने Pu

जं आणवेदि।

॥ परिक्रामतः॥

॥ स्नात॰, प्रवेशमभिनीय भूमौ जानुनी निधाय॥

नमः क्रमसमाक्रान्तचित्रत्रैलोक्यसद्मने।
कुक्षिकोणैकदेशांशलीनविश्वाय विष्णवे॥ ८ ॥
नमः करतलालम्बिकम्बुचक्राय चक्रिणे।
व्यञ्जते मोक्षसन्मार्गं निर्मलानन्ददीपिने॥ ९ ॥
नमः परमनिर्वाणकारणाय रथाङ्गिने  ‑ ‑ ‑ ॥ १० ॥

॥ ⟨आकर्ण्य⟩ सहर्षम्॥

अमुना शङ्खध्वनिमङ्गलेन तर्कयामि  ‑ ‑ ‑

⟨॥ मञ्जीरः॥ ⟩

‑ ‑ ‑ महानेष वर्णाश्रमविरोधो वर्तते। तदत्रभवतो ब्राह्मणानानेतुं ब्रह्म ‑ ‑ ‑ क्षमन्त्रिप्रवरप्रार्थिता देवी प्रहिताभूत्। तया स आगत्य कथितः — तीर्थान्तराणां त्रयीविदां चात्र विवादे स्थेयतया सर्वेषां सम्मतः प्रतीतगुणो महानैयायिको धैर्यराशिरिति प्रथितापरनामा भट्टसाहटः, तमत्र विवादपदनिर्णेतारं कुर्विति तैर्वयमभ्यर्थितास् †तद्वताथ† ‑ ‑ ‑ पगतं। ततो न भवान् गन्तुमर्हति। अत्रैव विवादे सभावर्तिनमनुद्ग्राहयन्तमत्रभवन्तमिच्छामो वयमिति  ‑ ‑ ‑

---

97 यदाज्ञापयति।

---

**101** ॰कोणैक॰ ] em. RT, ॰कोणेक॰ PāPu **101** ॰लीन॰ ] em. RT, ॰लीला॰ PāPu **101** विष्णवे ] RT (em. ?), विह्नवे PāPu **102** ॰चक्राय ] conj. Sanderson, ॰वक्राय PāPu RT **103** ॰मार्गं ] conj., ॰मार्गे॰ PāPuRT **103** ॰लानन्द॰ ] conj. Sanderson, ॰लावर्त॰ PāPuRT **103** ॰दीपिने ] conj., ॰दीपिके PāPuRT **104** f. रथाङ्गिने ‑ ‑ ‑ ⟨आकर्ण्य⟩ सहर्षम् ] conj., रथाङ्गिने राहुर्षम् Pā, रथाङ्गिने सहर्षम् Pu, रथाङ्गिने॥ ⟨आकर्ण्य⟩ सहर्षम् em. RT **106** तर्कयामि ‑ ‑ ‑ ] RT conjectured a lacuna at this point, which is not indicated in the manuscripts. **107** ⟨मञ्जीरः⟩ ] em. RT, om. PāPu **108** ‑ ‑ ‑ महानेष ] conj., हपहानेष PāPu, अहह महानेष conj. RT **108** ब्राह्मणानानेतुं ] em. RT, ब्राह्मणानेतुं PāPu **108** ब्रह्म ‑ ‑ ‑ ] The lacuna is marked by an empty space in the manuscripts. **109** स आगत्य ] PāPu, समागत्य em. RT **109** कथितः ] conj., कथितम् PāPuRT **110** प्रतीत॰ ] em. RT, प्रतीति॰ PāPu **111** ॰टः, तमत्र ] em. RT, ॰टस्तेयत्र Pā, ॰टस्तेपत्र Pu **111** ॰पद॰ ] RT (em. ?), ॰पदं PāPu **111** कुर्विति ] em. RT, कुर्वति PāPu **112** तद्वताथ ‑ ‑ ‑ ] PāRT, तद्वतथे ‑ ‑ ‑ Pu, the lacuna is marked by six dashes in the manuscripts. **112** गन्तुम॰ ] conj., मन्युम॰ PāPuRT **113** अत्रैव ] em. Sanderson, अत्रैक॰ PāRT, आत्रेक॰ Pu **113** ॰द्ग्राहयन्त॰ ] em., ॰द्ग्राहयत्त॰ PāPu, ॰ग्राहयन्त॰ RT (em. ?) **113** वयमिति ‑ ‑ ‑ ] The lacuna is indicated by seven dashes in the manuscripts.

॥ स्नात° ॥

सखे मञ्जीर तदेहि सहैव सभां प्रविशामः।

॥ परिक्रामन्ति ॥

॥ नेपथ्ये ॥

वंशे क्वापि प्रकटमहिम⟨न्य्⟩ ⁻ ⁻ ⁻
⁻ ⁻ ⁻ को ऽपि धन्यः।
यस्यान्योन्यप्रतिहतदृशां सर्वसन्देहमोक्षात्
तुल्याकारा भवति विदुषां दृष्टिरुत्कृष्टतायाम् ॥ ११ ॥
श्रीसाहटो नाम ललामभूतो
जातो जगत्याः परमेष्ठिकल्पः।
गुणैरनल्पैरधिकीकृतस्य
विरोधितां यस्य गतो न लोकः ॥ १२ ॥

॥ स्नात° ॥

आगच्छतो धैर्यराशेरेष स्तवः। अहो धैर्यराशिपक्षपाती लोकः। न चायमस्थाने लोकस्य पक्षपातः। ईदृश एवासौ। सखे मञ्जीर, भवदनुग्रहान् महतः सङ्कटादुत्तीर्णा वयं यदेवंविधेषु कर्मसूदास्महे।

॥ मञ्जी° ॥

आर्य, कुतस्तव यावज्जीवं जनानुग्रहमहाव्यापारस्य सङ्कटावतरणमजरामरे परमेश्वरे?

॥ बटुः ॥

अज्ज इदं सभामज्झे अय्यस्स उववेसणट्ठाणं चिट्ठदि। ता पविसदु भवं।

॥ स्नात° ॥

सखे मञ्जीर, प्रथमं प्रविश्य देवस्याज्ञां श्रावय सदस्यान्।

॥ मञ्जी° ॥

---

134 अद्येदं सभामध्य आर्यस्योपवेशनस्थानं तिष्ठति। तत् प्रविशतु भवान्।

---

**114** स्नात° ] em., ⁻ ⁻ ⁻ वः। PāPu, ⁻ ⁻ ⁻ वः ⟨स्नात°⟩ em. RT **115** तदेहि ] em. RT, तद्देह PāPu **118** प्रकटमहिम⟨न्य्⟩ ⁻ ⁻ ⁻ ] conj. Sanderson, प्रकटसहित ⁻ ⁻ ⁻ The lacuna is marked by three dashes in the manuscripts. **120** °शां सर्व° ] conj., °शामप्य° PāPu, °शामन्य° em. RT **123** जगत्याः ] PāPu, जगत्यां em. RT **124** °कृतस्य ] PāRT, °कृतास्य Pu **128** भव° ] conj., Sanderson, भगव° PāPuRT **129** °सूदास्महे ] PuRT, °स्तदास्महे Pā **131** °मजरा° ] em. RT, °मंजरा° PāPu **134** अज्ज ] PāPu, अय्य RT (em. ?) **136** देवस्याज्ञां ] conj., देवं PāPuRT **136** सदस्यान् ] em. RT, सदद्यात् PāPu

एवं करोमि।

॥ परिक्रम्य॥

यथासन्निहिता विद्वांसः, श्रूयताम्।

वक्ता तीक्ष्णमतिः सतां बहुमतो विद्यापगासागरो
विद्वत्संसदि पण्डितोत्तमतया प्राप्तः प्रतीतिं पराम्।
तीर्थप्रार्थनया गतो ऽद्य स नृपादेशादिह स्थेयतां
स्वस्थाः सन्तु समुत्सृजन्तु विमतिं नन्दन्तु सर्वाः प्रजाः॥ १३॥

॥ ततः प्रविशति यथानिर्दिष्टो धैर्यराशिर्विभवतश्च वादिसमाजः॥

॥ धैर्य°, सविस्मयम्॥

अहो विद्यासमागमः। चित्रम्, इहैव जम्बुद्वीपे भरतवर्षे च परमेष्ठिपुरं पश्यामः। तथा हि,

इह विनिहितं विद्यास्थानैश्चतुर्दशभिः पदं
स्थितमिह समाचारैश्चित्रैरितो विविधैर्व्रतैः।
प्रकृतिविशदान्यत्र स्वैरं तपांसि च शेरते
नरपतिरपि ब्रह्मा साक्षाद् ध्रुवं किमतः परम्॥ १४॥

॥ अग्रतो ऽवलोक्य॥

कथमिहैव महर्षिनिर्विशेषः श्रीसङ्कर्षणः। भवत्वेनमभिवादये।

॥ तथा ⟨करोति⟩। स्नात°, गाढमेनं परिष्वज्य॥

अयमप्रयाससुलभो ऽनुभूयते सकलतीर्थसलिलाभिषेकः।

॥ सर्व उपविशन्ति। स्नात°॥

भो इहभवन्तस्तीर्थिका नन्विदानीमत्रभवतां छिन्नाः समग्राः संशयग्रन्थयः। एष हि साक्षादक्षपाद इवान्वीक्षिकीप्रजापतिरुपस्थितो नराधिपानुरोधेन धैर्यराशिः।

॥ वादिनः॥

तीर्थकरानुरोधेन यथा न तथा राजानुरोधेन।

---

**140** °सन्निहिता ] conj. Isaacson, °संविहिता PāPuRT **140** विद्वांसः ] PāRT, विद्वांस Pu **142** °तोत्तमतया ] em. RT, °तोरसतया PāPu **142** प्राप्तः प्रतीतिं पराम् ] PāRT, प्राप्तैः प्रतितिपरां Pu **143** °गतो ] em. RT, °मतो PāPu **143** °देशा° ] RT (em. ?), °देहा° PāPu **149** °हितं विद्या° ] em. RT, °हितविद्या° PāPu **150** °धैर्व्रतैः ] PāRT, °धैव्रीतेः Pu **152** ब्रह्मा ] em. RT, ब्रह्माविष्णुः PāPu **152** साक्षाद् ध्रुवं ] RT (em. ?), साक्षाध्रुवं Pā, साक्षात् ध्रुवं Pu **154** °शेषः ] RT (em. ?), °शेष° PāPu **155** ⟨करोति⟩ ] conj., om. PāPuRT **157** सर्व ] em., सर्वे PāPuRT **162** °रोधेन ] PāRT, °सेधेन Pu

॥ स्नात॰, धैर्य(राशि)मुद्दिश्य॥

भो नैयायिकतिलका विदितवृत्तान्ता एव यथाप्रस्तुतवस्तुनि भवन्तः। तदुपक्रम्यतां स्वप्रतिभानानुसारेण यथोचितमभिधातुम्।

॥ धैर्य॰॥

आर्य, विदितमेतावत्। पञ्चरात्राद्यागमाः प्रमाणमप्रमाणं वेति वादिनामिह विप्रतिप्रत्तिः। अत्रभवत्सु पुनः सन्निहितेषु कीदृशो मादृशामभिधानाधिकारः? यदि परं भवदनुज्ञासृष्ट्या भवत्प्रसूता इव किमपि वक्तुं शक्ष्यामः।

॥ स्नात॰॥

किमेवमभिधीयते? स्रष्टारो ऽत्रभवन्तः। सर्ववादिनां च त्वय्येव विश्वसिति हृदयम्। तदभिधीयताम्।

॥ धैर्य॰, प्रवादकानुद्दिश्य॥

भो भवन्त आर्याः, पक्षद्वये ऽपि युक्तयो भवदुक्ताः श्रुता गृहीताश्च निराकाङ्क्षा अस्माभिः। ततो ऽविरतवचसि मयि नान्तरा किमपि वक्तुमर्हन्ति भवन्तः।

॥ वादि॰॥

आर्य, यथा भवानाह। न किञ्चिदपृष्टाः सन्तो ऽन्तराले भवतां वचनमाक्षिप्य ब्रूमः।

॥ धैर्य॰॥

तदिदानीमवहितैः श्रूयताम्।

॥ वादिनः॥

अवहिताः स्मः।

॥ धैर्य॰॥

मीमांसकैस्तावदवादि वेदः
स्वतः प्रमाणं किल बोधकत्वात्।

---

185 NM I 430.10–11: स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम्। न हि स्वतो ऽसती शक्तिः कर्तुमन्येन पार्यते॥ = ŚV codanā 47 (v.l. in ŚV(V, M, T) प्रमाणमिति गम्यताम्, कर्तुमन्येन शक्यते); ĀḌ Third Act: न हि नित्यतयास्माभिः प्रामाण्यमभिधीयते। वेदस्य बोधकत्वात्तु तथाभावं प्रचक्ष्महे॥

---

**163** ⟨॰राशि॰⟩ ] em. RT, om. PāPu **165** ॰प्रतिभाना॰ ] conj. Sanderson, ॰प्रतिभा॰ conj. Isaacson, ॰प्रतिभासा॰ PāPuRT **168** ॰भवत्सु ] PāRT, ॰भवत्स्यु Pu **169** ॰प्रसूता इव ] conj., ॰प्रसूता एव PāPu, ॰प्रसूतमेव em. RT **172** ॰सिति हृदयम् ] em. RT, ॰सितिः सहृदयं PāPu **174** भो ] PāRT, तो Pu **175** ॰काङ्क्षा अस्माभिः ] PāPu, ॰काङ्क्षैरस्माभिः em. RT **175** ततो ] em. Sanderson, यतो PāPuRT **177** किञ्चिद॰ ] PāRT, किंचिदृ॰ Pu **180** ॰वहितैः ] Pu$^{pc}$RT, ॰विहितैः PāPu$^{ac}$ **184** ॰स्तावद॰ ] conj., ॰स्तत्त्वम॰ PāRT, ॰स्तत्तम॰ Pu **184** वेदः ] em. RT, वेद PāPu

अनादितादर्भनिरस्तकर्तृ-
प्रमापवादद्वयपांसुपातः॥ १५॥

तथा चाहुः,

सर्वे बोधाः स्वतो ऽमी समुचितविषयावेदकत्वात् प्रमाणं
नैषां बाधोपपातः करणकलुषताप्रत्ययो वा यदि स्यात्।
नित्ये वेदे ऽपवादद्वयमनवसरं बोधकत्वं च सिद्धं
कार्ये वातीन्द्रियार्थे न भवति सुतरां बाधकस्यावकाशः॥ १६॥
प्रत्यक्षगोचरे ह्यर्थे ग्रहीतुं शक्नुयुर्नराः।
तथात्वमतथात्वं च, तेषां कातीन्द्रिये गतिः॥ १७॥

तस्माद् बोधकत्वादपवादद्वयाभावाच्च स्वत एव वेदः प्रमाणम्।

अत्र ब्रूमः, सरलसुगमः सत्यमेषो ऽस्ति पन्था-
स्तत्प्रामाण्ये न पुनरमुना चित्तमावर्ज्यते नः।
शब्दे ऽर्थे वा क्व खलु रचना दृश्यते ऽपौरुषेयी

---

189 ff. NM I 434.9–435.5: किंत्वर्थबोधजनकत्वात् तस्य नैसर्गिके प्रामाण्ये सति पुरुषदोषानुप्रवेशकारितः क्वचिद्धि विप्लवः। तदुक्तम्, 'शब्दे दोषोद्भवस्तावद् वक्त्रधीन इति स्थितम्।' (= ŚV codanā 62ab, v.l. in ŚV(T) and ŚV(V): इति स्थितिः) इति। तत्र पौरुषेये वचसि गुणवति वक्तरि तद्गुणापसारितदोषतया तत्प्रामाण्यमौत्सर्गिकमनपोदितं भवति। न तु गुणकृतं तत्प्रामाण्यमनङ्गत्वात् प्रामाण्ये गुणानाम्। बोधकत्वनिबन्धनमेव तदित्युक्तम्। वेदे तु प्रणेतुः पुरुषस्याभावाद् दोषाशङ्कैव न प्रवर्तते वक्त्रधीनत्वाद् दोषाणाम्। न च बाधकप्रत्ययो ऽद्य यावद् वेदार्थे कस्यचिदुत्पन्न इति निरपवादं वेदप्रामाण्यम्। आह च, 'तत्रापवादनिर्मुक्तिर्वक्त्रभावाल्लघीयसी। वेदे तेनाप्रमाणत्वं न शङ्कामधिगच्छति॥' (= ŚV codanā 68, reading in ŚV(M, T, V): नाशङ्कामपि गच्छति) इति। 190 f. NM I 431.9–16: स्थिते चैवमौत्सर्गिके प्रामाण्ये यत्र तस्यापवादः क्वचिद् भवति तत्राप्रामाण्यम्। अप्रामाण्ये चावश्यंभाव्यपवादः। द्विविध एवापवादः, बाधकप्रत्ययः कारणदोषज्ञानं च। तदुक्तं भाष्यकृता, 'यत्र दुष्टं करणम्, यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययः, नान्यः।' (= ŚBh(F) ad MS 1.1.4 (p. 26), v.l. यस्य च दुष्टं) इति। वार्तिककारो ऽप्याह, 'तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता। अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते॥' (= ŚV codanā 53) 193 f. ĀḌ Third Act: बाध्यतां विषयो यस्य प्रमाणान्तरगोचरः।; also NM I 129.12–13: मानान्तरपरिच्छेद्यवस्तुरूपोपदेशिनाम्। शब्दानामेव सामर्थ्यं तत्र तत्र तथा तथा॥ 198 NM I 579.16–580.2: भो भगवन्तः सभ्याः, क्वेदं दृष्टं क्व वा श्रुतं लोके। यद् वाक्येषु पदानां रचना नैसर्गिकी भवति॥ यदि स्वाभाविकी वेदे पदानां रचना भवेत्। पटे हि हन्त तन्तूनां कथं नैसर्गिकी न सा॥; also NM I 590.14: एवं च पदवाक्यरचनादौ तावद् वेदेषु पुरुषापेक्षित्वमुपपादितम्।

---

**186** °दर्भ° ] conj., °दर्प° PāPuRT, °दूर° conj. Isaacson, °पूर्व° conj. Kataoka **187** °प्रमापवाद° ] conj. Isaacson, °प्रलापवाद° PāPuRT **191** सिद्धं ] conj., सिद्धे PāPuRT **192** वातीन्द्रियार्थे ] conj., वतीन्द्रियेर्थे PāPuRT

स्वाध्यायो ऽपि प्रथमसमये संप्रवृत्तः कुतश्चित्॥ १८॥
श्रुतेः को ऽसावाद्यः समय इति चेत्, कल्पय वरं
न हि व्यूहो नित्यो ऽयमवयवनित्यस्य घटते।
ध्रुवान् वर्णान् कामं कथय, रचनानां पुनरिदं
न रूपं दृश्यं ते, ननु जगति ताः कर्तृवशगाः॥ १९॥
द्वैपायनादिवदिह स्मरणं न कर्तु-
रस्तीति हन्त न भयावह एष दोषः।
कर्ता विलक्षणतया हि न दृश्य एष
मादृक्षदृष्टिविषये स्मृतयो भवन्ति॥ २०॥
अपि च हिरण्यगर्भमनिशं कथयन्ति जना
जनकमुदारवैदिकवचोरचनासु चिरम्।

---

199 ff. NM I 589.15–590.9: तस्मादेक एव कर्ता सर्वशाखानाम्। काठकादिव्यपदेशस्तु प्रकृष्टाध्ययननिबन्धनो भविष्यतीति भवद्भिरप्युक्तम्। अपि च यथा तरोर्विक्षिप्ताः शाखा भवन्ति, न च कृत्स्नं पुष्पफलपत्रमेकस्यां शाखायां सन्निहितं भवति, किन्तु कस्याञ्चित् कस्याञ्चित्, एवं वेदस्यापि शाखाः पृथगङ्गकर्मोपदेशिन्यो विक्षिप्ताश्च। तासां च वृक्षशाखानामेकस्माज्जन्म बीजतः। तथैव सर्वशाखानामेकस्मात् पुरुषोत्तमात्॥ कर्ता य एव जगतामखिलात्मवृत्तिकर्मप्रपञ्चपरिपाकविचित्रताज्ञः। विश्वात्मना तदुपदेशपराः प्रणीताः तेनैव वेदरचना इति युक्तमेतत्॥ 201 ff. NM 574.5–8: नापि परमाण्वनित्यतायामिव मूर्तत्वमप्रयोजकमिदं साधनम्, रचना*विशेषाणां (ed$^{pc}$: °व्यापाराणां ed$^{ac}$) कर्तृव्यापारसाध्यत्वावधारणात्। यथा धूमस्य ज्वलनाधीन आत्मलाभः, ज्ञप्तिस्तु धूमादग्नेः, तथा कर्त्रधीना रचनानामभिनिर्वृत्तिः, प्रतीतिस्तु ताभ्यः कर्तुरिति। 202 f. NM I 414.1: पदे नित्ये ऽपि वैदिक्यो रचनाः कर्तृपूर्विकाः?; also NM I 573.4–7: पदनित्यत्वपक्षे ऽपि वाक्ये तद्रचनात्मके। कर्तृत्वसंभवात् पुंसः वेदः कथमकृत्रिमः॥ तथा च वैदिक्यो रचनाः कर्तृपूर्विकाः रचनात्वात् लौकिकरचनावत्।; also NM I 696.5–6: कार्यत्वात् पदरचनायाः पुरुषेच्छापूर्वकत्वमनुमीयते। 204 f. NM I 575.4–5: ननु भारते कर्तृस्मृतिरविगीता विद्यते। यद्येवं वेदे ऽपि प्रजापतिः कर्ता स्मर्यत एव॥; also NM I 577.12–14 न पुनः परमार्थतः कश्चित् कश्चिद् वेदस्य कर्तारं स्मरति। तस्मादकृतका वेदाः, अवश्यस्मरणीयस्यापि कर्तुरस्मरणात्। 206 NM I 503.12–13: यथा चन्दनधूममितरधूमविसदृशमवलोक्य चन्दन एव वह्निरनुमीयते तथा विलक्षणात् कार्याद् विलक्षण एव कर्ता ऽनुमास्यते।; also NM I 581.13–14: अपि च यद् विलक्षणेयं रचना तद् विलक्षण एव कर्ता ऽनुमीयताम् न पुनस्तदपलापो युक्तः। 207 NM I 583.1–5: कर्त्रस्मरणमेवत्वप्रयोजकमसिद्धत्वात्। सिद्धमपि वा वेदे कर्त्रस्मरणमन्यथासिद्धम्। वेदकरणकालस्यातिदवीयस्त्वात् तत्प्रणेतुश्च पुंसः सकलपुरुषविलक्षणत्वान् नियतशरीरपरिग्रहाभावादिदन्तयास्य पाणिनिपिङ्गलादिवत् स्मरणं नास्ति न तु स नास्त्येव। 208 NM I 575.4–5: ननु भारते कर्तृस्मृतिरविगीता विद्यते। यद्येवं वेदे ऽपि प्रजापतिः कर्ता स्मर्यत एव।

---

**201** °मवयवनि° ] em. RT, °मवयविनि° PāPu **209** °मुदार° ] PāRT, °मुदर° Pu

स्मृतिरियमर्थवादजनितेति विशेषधियो
न खलु भवान् प्रमाणकणिकामपि वक्तुमलम्॥ २१॥

किं च,

यथाष्टकादिस्मृतिमूलभूता
नित्यानुमेयाः श्रुतयस्त्वयोक्ताः।
नित्यानुमेयो ऽस्तु तथैव वेदे
कर्ता विशेषो यदि वाभिधेयः॥ २२॥

ननु तेनानुमेयेन विना किमवसीदति।
श्रुतिवाक्यानुमानेन विना किमवसीदति॥ २३॥

स्मृतिश्चेन्नोपपद्येत, रचना नोपपत्स्यते।
स्मृतिः कार्यस्वभावा चेद्, रचनापि तथाविधा॥ २४॥

मिथ्या ननु मनोर्वाक्यं भवेन् मूलश्रुतिं विना।
प्रयोजनानुरोधेन किं प्रमाणव्यवस्थितिः॥ २५॥

अथवा,

मिथ्या सन्तु मनोर्वचांसि, न पुनः शाखाशताध्यायिना-
मेकस्यापि मुखे क्व वाप्यपतिता शक्यानुमातुं श्रुतिः।
कल्प्या वेदविदामथादरवशात् तन्मूलभूता श्रुतिः
कर्ता वेद⟨पद⟩क्रमादिरचनायोगात् तथा कल्प्यताम्॥ २६॥

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।

---

210 f. NM I 575.6–9: अथ वैदिकमन्त्रार्थवादमूलेयं प्रजापतिकर्तृत्वस्मृतिः, 'प्रजापतिना चत्वारो वेदा असृज्यन्त, चत्वारो वर्णाः चत्वार आश्रमाः' इति तत्र पाठादिति—उच्यते—हन्त तर्हि भारते ऽपि तत्रत्यवचनमूलैव पाराशर्यस्मृतिरिति शक्यते वक्तुम्॥ 213 f. NM I 645.10–11: न च मन्वादिस्मृतीनां मूलभूता श्रुतिरुपलभ्यते। अनुमानेन तु तत्कल्पनमागमान्तरेष्वपि तुल्यम्। 215 f. NM I 500.11: तेनानुमानगम्यत्वान् न कर्तुर्नास्तिताग्रहः। 222 NM I 56.11: न च प्रयोजनानुवर्ति प्रमाणं भवति।; also NM II 436 1–3: यदुक्तं तादृशो मोक्षः प्रेक्षावतां प्रयत्नविषयो न भवतीति—तद् अपि न साम्प्रतम्, प्रयोजनानुसारेण प्रमाणव्यवस्थानुपपत्तेः। न हि प्रयोजनानुवर्ति प्रमाणं भवितुमर्हति। 226 NM I 630.7–9: न तावन्मन्वादिदेशना भ्रान्तिमूलाः संभाव्यन्ते, बाधकाभावात्, अद्य यावदपरिम्लानादरैर्वेदविद्भिस्तदर्थानुष्ठानात्। 228 ff. NM I 574.12–15: 'वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्। वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा॥' (= ŚV vākyādhikaraṇa 366) इति नैतद् युक्तम्, एवंप्रायाणाम् प्रयोगाणामप्रयोजकत्वात्। न हि तच्छब्दवाच्यत्वकृतमनादित्वमुपपद्यते।

---

**210** °धियो ] conj., °विता PāPu, °दिता RT **212** किं च ] PāPu, om. RT **214** °ताः ] RT (em. ?), °ता PāPu **215** °यो ऽस्तु ] em. RT, °यास्तु Pā, °यास्नु Pu **220** °विधा ] em. RT, °विधाः PāPu **227** कर्ता ] em. RT, कान्ता PāPu **227** ⟨°पद°⟩ ] em. RT, om. PāPu **228** सर्वं ] PuRT, शर्वं Pā

वेदाध्ययनवाच्यत्वादिति हेतुरसाधकः ॥ २७ ॥
अप्रयोजकता चैवंप्रायाणामुच्यते स्वयम् ।
स्वयं चैते प्रयुज्यन्त इति केयं विडम्बना ॥ २८ ॥
क्वचन चिरन्तनरचने ऽभ्रमजनितपरम्पराप्रथिते ।
अस्मर्यमाणकर्त्रिणि मूले कर्ता भवत्येव ॥ २९ ॥
वेदे हि पौरुषेये तत्कर्मसु विततवित्तसाध्येषु
पुरुषमननुस्मरन्तः कथमिव सन्तः प्रवर्तन्ते ॥ ३० ॥
अनुमानेनापि मिते कर्तरि विदुषां प्रवृत्तिरुचितैव ।
स्मार्ते ऽष्टकादिकार्ये श्रुत्यनुमानाद् यथा भवताम् ॥ ३१ ॥

अतश्च नित्यानुमेयो वेदे ऽस्ति कर्ता ।

विश्वजित्युचितमश्रुतं फलं
कल्प्यते किमपि विध्यपेक्षया ।
तत्र कस्य तदपेक्षिता भवे-
च्चेतनौ न खलु वाच्यवाचकौ ॥ ३२ ॥

---

234 ff. NM I 435.18–436.4: अदृष्टे तु विषये वैदिकेष्वगणितद्रविणवितरणादिक्लेशसाध्येषु कर्मसु तत्प्रामाण्यावधारणमन्तरेण प्रेक्षावतां प्रवर्तनमनुचितमिति तस्य प्रामाण्यनिश्चयो ऽवश्यकर्तव्यः । तत्र परत एव वेदस्य प्रामाण्यमिति वक्ष्यामः ।; also NM I 481.13–16: शब्दे पुनरदृष्टपुरुषार्थपथोपदेशिनि प्रामाण्यमनिश्चित्य महाप्रयत्ननिर्वर्त्यानि ज्योतिष्टोमादीनि न प्रेक्षापूर्वकारिणो यज्वानः प्रयुञ्जीरन्नित्यवश्यं निश्चेतव्यं तत्र प्रामाण्यम् । तच्च परत एवेति ब्रूमः ।; also NM I 576.6–8: एवं च सति उच्चावचकविरचितजरत्पुस्तकलिखितकाव्यवदस्मर्यमाणकर्तृकेण वेदेन व्यवहारानुपपत्तेरवश्यस्मरणीयस्तत्र कर्ता स्यात् ।; also NM I 583.13–584.2: अपि च कर्तुरस्मरणे सति सुतरां वेदार्थानुष्ठानं प्रेक्षावतां शिथिलीभवेत् । न ह्यकर्तृक एवोपदेशः संभवति । संभवन्नपि वा प्रामाण्यनिश्चयनिमित्ताभावात् कथं विस्रंभभूमिरसौ भवेत् । बाधकाभावमात्राच्च न प्रामाण्यनिश्चयो वचसामित्युक्तं प्राक् । तस्मादाप्तप्रत्ययादेव निर्विचिकित्सं वेदार्थानुष्ठानं सप्रतिष्ठानं संभवति नान्यथेति । तस्मान्न कर्त्रस्मरणस्य रचनात्वप्रतिपक्षतयोपन्यास उपपन्नः । 239 ff. NM II 118.11–12: ननु विधेः फलापेक्षा नास्ति चेत्, किं तर्ह्यश्रूयमाणफलेषु विश्वजिदादिषु स्वर्गादिफलं कल्प्यते?

---

**230** °वंप्रा° ] em. RT, °वंप्र° PāPu **232** क्व° ] RT (em. ?), क्वे° Pā, के° Pu **232** ऽभ्रमजनितपरम्पराप्रथिते ] conj., भयजनितपरस्पराप्रथते PāPu, द्वयजनितपरम्परा प्रथते em. RT **233** °कर्त्रिणि ] em. Sanderson, °कर्तॄणि PāPu, °कर्तृणि RT (em. ?) **236** °षां ] RT (em. ?), °षा PāPu **237** °मानाद् य° ] em. RT, °मानाय° PāPu **241** °ता भ° ] PuRT, °ता भा° Pā$^{ac}$ (?), °त भ° Pā$^{pc}$ (?) **242** °कौ ] PāRT, (hardly legible syllables, probably deleted:) °कौ । अवगतिधर्मो (some more deleted syllables) कौ । Pu

अवगतिधर्मो ऽयं चेदवगतिरपि कस्य न स्वतन्त्रासौ
अस्माकं चेत् पुरुषप्रभवः प्राप्नोति वेदार्थः॥ ३३॥
अवगन्तारो हि वयं बोद्धृतया कर्तुराशयं विद्मः।
इह कस्याभिप्रायः शब्दस्यार्थस्य वा नासौ॥ ३४॥
यदाकाङ्क्षाबलादङ्गं फलं वा कल्प्यते क्वचित्।
सो ऽस्य कर्तास्ति पुरुषः कस्याकाङ्क्षान्यथा भवेत्॥ ३५॥
अतो नित्यानुमेयो ऽपि कर्ता वेदस्य विद्यते।
न हि तेन विना को ऽपि व्यवहारो ऽवकल्पते॥ ३६॥

यच्च कर्ता न स्मर्यत इति भण्यते तत्रायं विवेकः।

कर्तारो ये हि यान्ति स्मरणपथमिह व्यासवाल्मीकिमुख्याः
सर्वे मादृग्दृशां ते विनियततनवो गोचरे संचरन्ति।
कामं व्योमैककायः श्रितविविधतनुर्निःशरीरो ऽथवासौ
देवो वेदस्य कर्ता कथमिव विषयत्वं प्रयाति स्मृतीनाम्॥ ३७॥

---

243 NM I 409.11–410.2: धूमादिभ्यः प्रतीतिश्च नैवावगतिपूर्विका। इहावगतिपूर्वैव शब्दादुत्पद्यते मतिः॥ स्थविरव्यवहारे हि बालः शब्दात् कुतश्चन। दृष्ट्वार्थमवगच्छन् तं स्वयमप्यवगच्छति॥; NM I 596.17–597.2: न च तयोर् (i.e. शब्दार्थयोर्) अविनाभावो धूमाग्न्योरिव सम्बन्धः। तत्र हि सम्बन्धः प्रतीयमान एवं प्रतीयते, 'धूमो ऽग्निं विना न भवति' इति। इह पुनः 'अयमस्मात् प्रतीयते' इति, एतावत्येव व्युत्पत्तिपर्यवसानम्। अत एवावगतिपूर्विकैवावगतिरिहेत्यनुमानात् शब्दस्य भेद उक्तः। 245 NM I 696.5–7: कार्यत्वात् पदरचनायाः पुरुषेच्छापूर्वकत्वमनुमीयते। अर्थावगमपुरस्सरं च पुरुषवचनाद् विवक्षानुमानम् 'एवमयं वेद', 'एवमयं विवक्षति' इति। 251 NM I 576.8–13: न च कदाचन वेदेषु व्यवहारविच्छेदः संभाव्यते येन तत्कृतं जरत्कूपारामादिष्विव तेषु कर्त्रस्मरणं स्यात्। तस्मादवश्यं स्मर्येत कर्ता। न च *स स्मर्यते (em. : संस्मर्यते ed.), स्मर्तुं शक्यते वा। स्मृतिर्हि भवन्ती तदनुभवमूला भवति। न च मूले ऽपि कर्त्रनुभवः कस्यचिज्जातः सर्गादेरभावात्। भावे वा कर्तुरशरीरत्वेन दर्शनयोग्यत्वाभावात्। 252 ff. NM I 586.3–13: शरीरपरिग्रहमन्तरेण प्राणिनामुपदेशस्य कर्तुमशक्यत्वात् कदाचिदीश्वरः शरीरमपि गृह्णीयादिति कल्प्यते। नियतशरीरपरिग्रहाभावाच्च व्यासादिवदसौ न स्मर्यते। ततश्च, अद्य सद्यः कविः काव्ये यथा कर्तेति मीयते। तथा तत्कालजैः पुंभिः सो ऽपि कर्तेति मास्यते॥ यथा परकृता शङ्का तस्मिन् काव्ये व्यपैति ते। वेदे ऽप्यन्यकृता शङ्का तथा तेषां व्यपैष्यति॥ परोक्षमनुमानेन यच्च बुध्यामहे वयम्। प्रत्यक्षं योगिनां तच्चेत्युक्तं प्रत्यक्षलक्षणे॥ प्रत्यक्षमनुमानं च तदेवं कर्तृतामितौ। मूलप्रमाणमस्तीति स्मृतौ नान्धपरंपरा॥

---

**244** पुरुषप्र° ] em. RT, पुरुषः प्र° PāPu **245** बोद्धृतया कर्तु° ] em. RT, चोद्धृतया च दु° PāPu **247** °बला° ] em. Isaacson, °फला° PāPuRT **247** कल्प्यते ] conj., कल्पते PāPu **248** कस्याका° ] em. RT, कस्य का° PāPu **250** °कल्पते ] em. Isaacson, °कल्प्यते PāPuRT **251** यच्च ] em. RT, यश्च PāPu **251** भण्यते ] em. RT, गुण्यते PāPu **252** कर्तारो ] PāRT, कर्तारा Pu **253** गोचरे ] PāRT, गोचार Pu **254** °कायः ] PāRT, °काया (?) Pu **255** कथमिव ] PāRT, थथमिव Pu

अत एव च तत्र कर्तरि
प्रतिभानेकविधा विपश्चिताम्।
परमार्थत एक एव स
त्रिजगत्क्षेमनियोजनक्षमः॥ ३८॥
समानसङ्कल्पतयेश्वराणा-
मनेकता कल्पयितुं न शक्या।
विरुद्धसङ्कल्पितसिद्ध्यभावा-
न्नूनं ततः केचिदनीश्वराः स्युः॥ ३९॥
तस्मात् सर्वविदेक एव जगतो ऽधिष्ठातृभेदे पुन-
र्निष्पद्येत न तत् कृतं न च चिरं तिष्ठेत् कुराष्ट्रं यथा।
एकस्य स्थपतेर्मतानुसरणात् प्रासादसम्पादनं
भूयोभिः क्रियते नरैरिति भवेदेकप्रणीतं जगत्॥ ४०॥
व्यापारिभिश्च बहुभिः पुरुषैरिदं हि
शक्यं जगद्युगशतैरपि न प्रणेतुम्।
एकस्तु निर्मलमतिः सहसैव सत्य-
सङ्कल्प एवमुपपादयतीति युक्तम्॥ ४१॥

उक्तं च,

एकस्य कस्यचिदशेषजगत्प्रसूति-
हेतोरनादिपुरुषस्य महाविभूतेः।
सर्गस्थितिप्रलयकार्यविभागयोगाद्
ब्रह्मेति विष्णुरिति रुद्र इति प्रसिद्धिः॥ ४२॥

---

260 ff. NM I 587.17–588.11: अनेकेश्वरवादो हि नातीव हृदयङ्गमः। ते चेत् सदृशसङ्कल्पाः को ऽर्थो बहुभिरीश्वरैः॥ संकल्पयति यदेकः शुभमशुभं वापि सत्यसङ्कल्पः। तत् सिध्यति तद्विभवादित्यपरस्तत्र किं कुर्यात्॥ भिन्नाभिप्रायतायां तु कार्यविप्रतिषेधतः। नूनमेकः स्वसङ्कल्पविहत्यानीश्वरो भवेत्॥ एकस्य किल सङ्कल्पो राजायं क्रियतामिति। हन्यतामिति चान्यस्य तौ समाविशतः कथम्॥ राज्यसङ्कल्पसाफल्ये विहता वधकामना। तस्याः सफलतायां वा राज्यसङ्कल्पविप्लवः॥ तेन चित्रजगत्कार्यसंवाहानुगुणाशयः। एक एवेश्वरः स्रष्टा जगतामिति साधितम्॥ एवं जगत्सर्गवत् स एव वेदानामप्येकः प्रणेता भवितुमर्हति। 266 f. cf. NM I 510.11–511.4. 273 ff. NM I 636.8–11: एकस्य कस्यचिदशेषजगत्प्रसूतिहेतोरनादिपुरुषस्य महाविभूतेः। सृष्टिस्थितिप्रलयकार्यविभागयोगाद् ब्रह्मेति विष्णुरिति रुद्र इति प्रतीतिः॥

---

**257** विपश्चि° ] PāPuRT[pc], विपश्वि° RT[ac] **260** °णा° ] PuRT, °णां Pā **262 f.** °भावान्नु° ] RT (em. ?), °भान्नू° PāPu **270** सत्य° ] PuRT, सत्प° Pā **273** एकस्य कस्यचिद° ] PāRT, एकस्यचिद° Pu **274** °नादि° ] PāRT, °नाहि° Pu

विधाता विश्वात्मा सकलजगतामेष च यथा
प्रणेता वेदानामपि ⟨स हि⟩ तथैवामलमतिः।
यथान्योन्याधीनस्थितय इह लोकास्त्रय इमे
तथान्योन्यापेक्षानभिदधति वेदा अपि विधीन्॥ ४३॥
सन्निवेशो हि यो ऽन्योन्यव्यतिषक्तो ऽवधार्यते।
अर्थे वा वाचि वा नासौ संभवेदिति कल्प्यते॥ ४४॥
वेदानामेक एवातुलकुशलपथादेशकानेकशाखा-
विक्षिप्तानां विधाता कविरमलमतिः को ऽपि देवः पुराणः।
तद्वत् सर्वागमानां भवतु स भगवानेक एव प्रणेता
नानात्वं कर्तुरित्थं न सुवचमिति हि प्रागुपन्यस्तमेतत्॥ ४५॥

अहो,

परस्परविरोधिनो ननु च सर्व एवागमाः
समानमभिधेयमेषु न हि किञ्चिदीक्षामहे।
त एकनरनिर्मिता इति कथं नु मन्यामहे
प्रमाणमितरेतरप्रतिहताश्च ते वा कथम्॥ ४६॥

यत्तावद् ब्रवीषि परस्परविरोधे कथं प्रामाण्यमिति तत्रानुयुज्यसे।

परस्परविरोधितां प्रतिकरोषि वेदे कथं
स नित्य इति चेदहो गृहकथासु सक्तो भवान्।
विभागमवलम्ब्य कञ्चन विरोधितापास्यते

---

277 f. NM I 588.11–12: एवं जगत्सर्गवत् स एव वेदानामप्येकः प्रणेता भवितुमर्हति, नानात्वकल्पनायां प्रमाणाभावात्, कल्पनागौरवप्रसङ्गाच्च। 279 ff. NM I 588.17–589.1: अतश्चैककर्तृका वेदाः, यतः परस्परव्यतिषक्तार्थोपदेशिनो दृश्यन्ते। एकमेव हि कर्म वेदचतुष्टयोपदिष्टैः पृथग्भूतैरप्येकार्थसमवायिभिरङ्गैरन्वितं प्रयुज्यते। 285 f. NM I 644.1: अन्ये मन्यन्ते सर्वागमानामीश्वर एव भगवान् प्रणेतेति।; NM I 644.6–7: अर्हन्निति कपिल इति सुगत इति स एवोच्यते भगवान्। नानासर्वज्ञकल्पनायां यत्नगौरवप्रसङ्गात्। 288 ff. NM I 640.9–10: यत् पुनरत्रोक्तम्, सर्व एवागमाः परस्परविरुद्धार्थोपदेशित्वादप्रमाणं स्युरिति...

---

**277** च ] em. RT, न् Pā, न Pu **278** प्रणेता ] em. RT, प्रणाता PāPu **278** वेदानामपि ⟨स हि⟩ तथैवामलमतिः ] conj. RT, वेवाज्ञामपि ‾ ‾ ‾ तथैवामलमिति PāPu (the lacuna is marked by two dashes in the manuscripts) **280** °भिदधति वेदा° ] em. RT$^{pc}$, °पि दधति वेदा° RT$^{ac}$, °पि दधमि वेवा° PāPu **281** °वेशो ] RT (em. ?), °वेसो PāPu **282** कल्प्यते ] RT (em. ?), कल्पते PāPu **284** °रमल° ] em. RT, °नमन° Pā, °नमम° Pu **285** °तद्वत् सर्वा° ] PāPu$^{pc}$RT, °तद्वत्ससर्वा° Pu$^{ac}$ **286** हि ] RT (em. ?), ही PāPu **286** °पन्य° ] RT (em. ?), °पव्य° PāPu **288** सर्व ] RT (em. ?), सर्वा PāPu **290** त ] PāPu$^{pc}$RT, ए Pu$^{ac}$ **292** °वीषि ] em. RT, °वीमि PāPu **293** f. वेदे कथं स ] conj., वेदं कथम° Pā, चेदं कथम° Pu, चेत्थं कथाम° em. RT

यदि श्रुतिषु सागमान्तरवचःसु तुल्या गतिः॥ ४७॥
श्रुतावायुष्कामं प्रति हि विहितः कृष्णलचरु-
स्तथा सर्वस्वारः किल मरणकामस्य पठितः।
विरोधश्चैतस्यां यदि विषयभेदात्परिहृतो
भवद्भिः सैव स्यात् सरणिरिह तीर्थान्तरगिराम्॥ ४८॥

एवं तावदितरेतरविरोधिनीष्वपि वेदचोदनास्विव ⟨न⟩ तीर्थान्तरदेशनासु दोषः। अथवा

परमं पुरुषार्थं प्रति न चागमानां विरोधिता काचित्।
आदिश्यते हि सर्वैः कैवल्यं तुल्यमेव फलम्॥ ४९॥

---

297 ff. NM I 642.14–643.12: यत्त्वागमान्तरेभ्यः कौलादिभ्यः खेचरताद्यर्थसिद्धावपि निषिद्धाचरणकृतः कालान्तरे प्रत्यवायो ऽवश्यंभावीत्युक्तम्, तदपि न युक्तम्, तस्यार्थस्य तदागमनिषिद्धत्वाभावात्। आगमान्तरनिषिद्धत्वे ऽपि वैकल्पिकत्वकल्पनोपपत्तेः। पुरुषार्थप्राप्त्युपायत्वाच्च तस्य तस्मिन् सिद्धे कुतः प्रत्यवायः? भवतु वा कालान्तरे प्रत्यवायः, तथाप्यधिकारिभेदेन तत्फले कर्मणि चोद्यमाणे श्येनादाविव नागमप्रामाण्यमत्र हीयते। श्येनेनाभिचरन् यजेत इत्यत्राभिचरन्निति शता लङ्घितनिषेधमधिकारिणमाचष्टे। तस्य च श्येनयागः चोदितः। स च तत्प्रयोगात् कृतवधः प्रत्यवैत्येव न च वेदस्याप्रामाण्यम्। उक्तं च 'उभयमिह चोदनया लक्ष्यते ऽर्थो ऽनर्थश्च' (ŚBh ad MS 1.1.2) इति। अधिकारभेदाच्च विचित्रकर्मचोदना नानुपपन्ना। मरणकामस्य सर्वस्वारश्चोदितः आयुष्कामस्य कृष्णलचरुः। तस्मादेतदपि नाप्रामाण्यनिमित्तम्। 301 f. NM I 640.12–14: विरोधमात्रं त्वकिञ्चित्करम्। प्रमाणत्वाभिमतेषु वेदवाक्येष्वपि परस्परविरोधदर्शनात्। पुरुषशीर्षस्पर्शनसुराग्रहगवालम्भादिचोदनासु वचनान्तरविरुद्धमर्थजातमुपदिष्टमेव। 303 ff. NM I 640.15–641.3: किञ्चागमानां विरोधो ऽपि नातीव विद्यते *प्रधाने (Calicut MS : प्रमाणे ed.) पुरुषार्थे वा सर्वेषामविवादात्। नानाविधैरागममार्गभेदैरादिश्यामाना बहवो ऽभ्युपायाः। एकत्र ते श्रेयसि संपतन्ति सिन्धौ प्रवाहा इव जाह्नवीयाः॥ तथा ह्यपवर्ग उपेयः सर्वशास्त्रेषु निर्दिश्यते। तदुपायः सर्वत्र ज्ञानमुपदिश्यते। ज्ञानविषये तु विवदन्ते। तत्रापि प्रायश आत्मविषयतायां बहूनामविप्रतिपत्तिः।

---

**296** श्रुतिषु ] em. RT, शक्तिषु PāPu **296** °वचःसु ] em. RT, °वचःश्रुत° PāPu **297 f.** विहितः कृष्णलचरुस्त° ] em. RT, विहितकृष्तलमकस्त° Pu, विहितकॢप्तलमकस्त° Pu **298** सर्वस्वारः ] em. RT, सर्वश्वारः PāPu **298** °कामस्य ] RT (em. ?), °कादस्य PāPu **300** भवद्भिः ] RT (em. ?), भवस्ति Pā, भवस्तिः Pu **300** तीर्थान्तर° ] PāPu[pc]RT, तीर्थांरर° Pu[ac] **301** °चोदनास्विव ] RT (em. ?), °वोदनाष्विति Pā, °चोदनाष्विति Pu **301** ⟨न⟩ ] em. RT, om. PāPu **301** °रदेश° ] PāRT, °रादश° Pu **302** दोषः ] em. Sanderson, देषः PāPu, द्वेषः em. RT **304** तुल्यमेव ] PāRT, तुल्यमेच Pu

मार्गभेदास्त्वनुग्राह्यसत्त्वबुद्ध्यनुसारिणः।
तत्र तत्रोपदिश्यन्ते विचित्रास्त्राणकारिणः॥ ५०॥

अमी हि चानेन पथा यथेष्टं
शक्याः शुभं प्रापयितुं मनुष्याः।
इतीश्वरः सर्वविदेष पश्यन्
नानाविधानादिशति स्म मार्गान्॥ ५१॥

प्रवेष्टुकामा बहवः पुमांसः
पुरे यथैकत्र महागृहे वा।
द्वारान्तरेणापि विशन्ति केचित्
तथोत्तमे धाम्नि मुमुक्षवो ऽपि॥ ५२॥

अत एव हि बालकवेरवलोकितसकलशास्त्रसारस्य।
सूक्तमिदं तत्त्वविदो भ्रष्टभ्रान्तेर्जयन्तस्य॥ ५३॥

नानाविधैरागममार्गभेदै-
रादिश्यमाना बहवो ऽभ्युपायाः।
एकत्र ते श्रेयसि संपतन्ति
सिन्धौ प्रवाहा इव जाह्नवीयाः॥ ५४॥

इति। यत् पुनरभिधीयते विरोधिनामागमानां कथमेककर्तृकत्वमिति तत्राप्युक्तमेव—

वेदानामीश्वरोक्तत्वात् प्रामाण्यं न पुनः स्वतः।

---

305 f. NM I 641.4–12: प्रकृतिपुरुषविवेकज्ञानपक्षे तु प्रकृतेर्विविक्ततया पुरुष एव ज्ञेयः। नैरात्म्यवादिनस्त्वात्मशैथिल्यजननाय तथोपदिशन्ति। स्वच्छं तु ज्ञानतत्त्वं यत् तैरिष्यते तत् स्वातन्त्र्यादनाश्रितत्वादात्मकल्पमेव। कूटस्थनित्यत्वे प्रवाहनित्यत्वे च विशेषः। एवं प्रधानयोस्तावदुपायोपेययोरविवादः। क्रिया तु विचित्रा प्रत्यागमं भवतु नाम। भस्मजटापरिग्रहो वा दण्डकमण्डलुग्रहणं वा रक्तपटधारणं वा दिगम्बरता वावलम्ब्यताम्, को ऽत्र विरोधः? वेदे ऽपि किमल्पीयांसः पृथगितिकर्तव्यताकलापखचिताः स्वर्गोपायाश्चोदिताः? तस्मात् परस्परविरोधे ऽपि न प्रामाण्यविरोधः। 307 ff. NM I 644.1–4 अन्ये मन्यन्ते, सर्वागमानामीश्वर एव भगवान् प्रणेतेति। स हि सकलप्राणिनां कर्मविपाकमनेकप्रकारमवलोकयन् करुणयाताननुग्रहीतुमपवर्गप्राप्तिमार्गं बहुविधमुत्पश्यन्नाशयानुसारेण केषांचित् क्वचित् कर्मणि योग्यतामवगम्य तं तमुपायमुपदिशति। 317 ff. = NM I 640.17–18, cf. MBh 12.336.77 323 f. NM I 588.11–16: एवं जगत्सर्गवत् स एव वेदानामप्येकः प्रणेता भवितुमर्हति, नानात्वकल्पनायां प्रमाणाभावात् कल्पनागौरवप्रसङ्गाच्च। तेन यदुच्यते, 'नन्वेकः सर्वशाखानां कर्तेत्यवगतं कुतः। बहवो बहुभिर्ग्रन्थाः कथं न रचिता इमे॥' इति, तत् परिहृतं भवति।

---

**305** °ग्राह्यसत्त्व° ] em. Isaacson, °ग्राह्याः सत्त्व° PāPuRT **308** शक्याः शुभं ] PāRT, शक्याप्पुभं Pu **309** सर्व° ] Pā$^{pc}$ (?) RT, सर्वा° Pā$^{ac}$ (?), सर्वे Pu **310** मार्गान् ] RT (em. ?), मार्गां Pā, मार्गं Pu **314** मुमुक्षवो ] PāPu$^{pc}$RT, मुमुक्षुवो Pu$^{ac}$

न चेश्वरबहुत्वे ऽपि युक्तिः काचन विद्यते॥ ५५॥
कर्तृभेदव्यपदेशः पुनरन्यथासिद्धः।
एको ऽप्यसौ सकलसत्त्वहिताय काय-
मिच्छाविनिर्मितमनेकमुपादधानः।
नानागमानुपदिशन् विविधा बिभर्ति
तास्ताः समस्तभुवनप्रथिताः समाख्याः॥ ५६॥
एकः शिवः पशुपतिः कपिलो ऽथ विष्णुः
संकर्षणो जिनमुनिः सुगतो मनुर्वा।
संज्ञाः परं पृथगिमास्तनवो ऽपि काम-
मव्याकृते तु परमात्मनि नास्ति भेदः॥ ५७॥
अन्यत्वे ऽपि नरो यः सातिशयो भवति को ऽपि नूनमसौ।
तेजो बिभर्ति भगवत इति हि द्वैपायनः प्राह॥ ५८॥
यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छेस्त्वं मम तेजोंशसंभवम्॥ ५९॥
इति।
यद्वा जिनप्रभृतयो बहवो भवन्तु
भिन्नागमप्रणयनप्रवणा मुनीन्द्राः।
पश्यन्तु ते ऽपि भगवत्प्रणिधानलब्ध-
शुद्धाविनश्वरदृशः कुशलाभ्युपायान्॥ ६०॥

---

326 ff. NM I 644.5–6: स्वविभूतिमहिम्ना च नानाशरीरपरिग्रहात् स एव संज्ञाभेदानुपगच्छति। 330 ff. NM I 644.6–7: अर्हन्निति कपिल इति सुगत इति स एवोच्यते भगवान्। 334 NM I 589.9–14: तत्रापि प्रथमस्यैव कवेस्तद्वस्तुदर्शनात्। तदभिप्रायवेदी तु सो ऽन्यस्तमनुवर्तते॥ अन्यथानन्वितं काव्यं स्याद् विश्ववसुकाव्यवत्। अन्वितत्वे तु सा नूनमाद्यस्यैव कवेर्मतिः॥ इहाप्येकाशयाभिज्ञद्वितीयेश्वरकल्पने। एकाभिप्रायतैव स्यात् किं च तत्कल्पने फलम्॥ 336 f. = *Bhagavadgītā* 10.41. 337 °गच्छेस्त्वं ] Kashmirian reading, Vulgate: °गच्छ त्वं 339 ff. NM I 633.9–11: सर्वं जानात्येव भगवान्। किञ्चित् स्वयमुपदिशति किञ्चित् परानुपदेशयति। ते हि तस्यानुग्राह्या भगवतः। तेषां च तदनुग्रहकृतैव तथाविधज्ञानप्राप्तिः।

---

**328** °दिशन् विवि° ] Pā$^{pc}$PuRT, °दिशन् विविवि° Pā$^{ac}$ **329** समस्त° ] PāRT, समस्तः Pu **331** °मुनिः ] PāRT, °मुनि Pu **332** °स्तनवो ] PāRT, °स्तनवा Pu **334** नूनमसौ ] conj. Sanderson, दूरमसौ PāPuRT **336** यद्यद् ] PāRT, अद्य Pu **336** विभूतिमत् ] Pā$^{pc}$PuRT, विभूतिमित् Pā$^{ac}$ **337** तेजोंश° ] PuRT, तेजोंस° Pā **339** जिन° ] em. RT, जन° PāPu **341** भगवत्प्र° ] PuRT, भगवन्प्र° Pā **342** °विनश्वरदृशः ] RT (em. ?), °विनस्वरदृशः Pā, °विनस्वरदशः Pu **342** °पायान् ] RT (em. ?), °पायां PāPu

एष एव विशेषो हि योगिनां परमेश्वरात्।
तस्य नैसर्गिकं ज्ञानं ध्यानयोगेन योगिनाम्॥ ६१॥
एवं तावद् वेदमाप्तप्रणीतं
ये मन्वानास्तत्प्रमाणत्वमाहुः।
स प्रत्येकं पञ्चरात्रादिशास्त्र-
प्रामाण्ये ऽपि न्यायमार्गः समानः॥ ६२॥
एकस्तेषामीश्वरो वा प्रणेता
भिन्ना वाप्ताः सन्तु मार्गान्तरज्ञाः।
न प्रामाण्यात् सर्वथा तत्प्रणीता
ग्रन्था एते वेदवत् प्रत्यवेताः॥ ६३॥
यदि वानादयो वेदाः स्वत एव प्रमाणताम्।
यान्तु कामं तथैवैताः पञ्चरात्रादिचोदनाः॥ ६४॥
कर्तृस्मरणमत्रापि न स्पष्टमुपलभ्यते।
संकर्षणादयस्त्वासां प्रवक्तारः कठादिवत्॥ ६५॥
ननु चत्वार एवैते वेदाः सुप्रथिता जने।
इतिहासपुराणे ऽपि तदुक्तिरुपचारतः॥ ६६॥
वेदो ऽयं ब्राह्मणो ऽयं सलिलमिदमयं वह्निरेषा महीति
स्पष्टे शब्दार्थबोधे प्रणिहितमतयो हन्त वृद्धाः प्रमाणम्।

---

343 f. NM I 279.1–4: नन्वेकेन ज्ञानेन सर्वानर्थान् भूतभाविनः परोक्षानपि पश्यन्तो योगिनः कथमखिलत्रैलोक्यवृत्तान्तदर्शिनः सकलजगद्गुरोरीश्वराद् विशिष्येरन्? अस्ति विशेषः, ईश्वरस्य तथाविधं नित्यमेव ज्ञानं योगिनां तु योगभावनाभ्यासप्रभवमिति।; also NM I 633.14–634.2: न हीश्वरप्रत्यक्षस्य योगिप्रत्यक्षस्य च प्रामाण्ये कश्चिद्विशेषः। नैसर्गिकाहार्यकृतस्तु भविष्यति। 345 ff. NM I 636.7: तत्र [पञ्चरात्रे] च भगवान् विष्णुः प्रणेता कथ्यते। स चेश्वर एव।; also NM I 640.7–8: सर्वत्र वेदवत् कर्तुराप्तस्य परिकल्पना। दृष्टार्थेष्वेकदेशेषु प्रायः संवाददर्शनात्॥ 357 ff. NM I 625.16–19 (on the validity of the Atharvaveda) : यत् पुनरभिधीयते, वेदशब्दस्त्रयाणामेव वाचकः, न चतुर्थस्येति, सो ऽयमत्युत्कटो द्वेषः। वृद्धव्यवहारो ह्यत्र प्रमाणम्। वेदो ऽयं ब्राह्मणो ऽयमिति तत्र तत्र वेदशब्द उच्चारिते चत्वारो ऽपि प्रतीयन्ते।

---

**346 ये** ] PāRT, प्ये Pu **346 मन्वा॰** ] RT (em. ?), मत्वा॰ PāPu **347 प्रत्येकं** ] PāRT, प्रात्यकं Pu **348 समानः** ] em. RT, सामान्यः Pā, समान्यः Pu **350 भिन्ना** ] PāRT, भिन्नो Pu **351 प्रामाण्यात् सर्वथा** ] RT (em. ?), प्रामाण्यासर्वथा PāPu **351 तत्प्रणीता** ] em. , तत्प्रणीताद् PāPuRT **352 प्रत्यवेताः** ] conj. Isaacson, प्रत्यवान्तः PāPu, प्रच्यवन्ते em. RT **353 वेदाः स्वत** ] Pā, वेदाः स्तत Pu, वेदास्तत RT (em. ?) **354 कामं तथैवैताः** ] conj. Sanderson, कामातथैताः Pā, कामानथैता Pu, काममथैवैता RT[ac], काममथैवैताः RT[pc] **354 पञ्च॰** ] PāPu, पाञ्च॰ RT (em. ?) **356 ॰स्त्वासां** ] RT (em. ?), ॰स्त्वांसां PāPu **357 सुप्रथिता** ] conj. Sanderson, सुकथिता PāPuRT

तत् को ऽस्मिन् पञ्चरात्रे शिशुरपि सहसा वेदशब्दं प्रयुङ्क्ते
के वा तच्छासनस्थं मुनिसदृशमपि ब्राह्मणं व्याहरन्ति॥ ६७॥
वयमपि न वदामः पञ्च षड् वात्र वेदान्
विदितनियतसंख्यास्ते हि चत्वार एव।
भवति तु बहुशाखाविस्तरस्तत्र चित्र-
स्तदयमपि हि तेषामस्तु शाखाविशेषः॥ ६८॥

आह

ननु च सकलशाखाप्रत्ययं कार्यमेक-
मभिदधति विधिज्ञाः सोमपश्वादियागम्।
वदत यदि कदाचित् पञ्चरात्रानुषक्तं
क्वचिदपि परिदृष्टं वैदिकं कर्म किञ्चित्॥ ६९॥

उच्यते

अनेकगुणयुक्तमेकमुपदिश्यते कर्म यै-
र्बहून्यपि वचांसि तानि दधते समावेशिताम्।
ततस्य किल कर्मणः किमपि चोदितं शाखया
कयाचिदभिधीयते भवतु सैव संसर्गिता॥ ७०॥
नियतविषयं शास्त्रं शास्त्रान्तरेण न पृच्छ्यते
विसदृशविधौ वेदे ऽप्येषा स्थितिर्न न दृश्यते।

---

368 ff. NM I 620.14–621.2: यदेष न त्रयीप्रत्ययं कर्मोपदिशति न तत्सम्बद्धं किञ्चिदिति तदस्य त्रयीबाह्यत्वमिति, एतदपि न साधूपदिष्टम्, इष्टिपश्वेकाहाहीनसत्रादिकर्मणां तत्रोपदेशदर्शनात्। सर्वशाखाप्रत्ययमेकं कर्म इति न्यायात्। त्रय्युपदिष्टे ऽपि कर्मणि सम्बद्धमथर्ववेदात् किमपि लभ्यत एव। 373 ff. NM I 588.18–589.4: एकमेव हि कर्म वेदचतुष्टयोपदिष्टैः पृथग्भूतैरप्येकार्थसमवायिभिरङ्गैरन्वितं प्रयुज्यते। तत्र हि हौत्रमृग्वेदेन, यजुर्वेदेनाध्वर्यवं, औद्गात्रं सामवेदेन, ब्रह्मत्वमथर्ववेदेन च क्रियते। पैप्पलादिशाखाभेदोपदिष्टं च तत्तदङ्गजातं तत्र तत्रापेक्ष्यते। तत्र सर्वशाखाप्रत्ययमेकं कर्मेत्याहुः।; also NM I 590.1–3: अपि च यथा तरोर्विक्षिप्ताः शाखा भवन्ति, न च कृत्स्नं पुष्पफलपत्रमेकस्यां शाखायां सन्निहितं भवति, किन्तु कस्यांचित् कस्यांचित्, एवं वेदस्यापि शाखाः पृथगङ्गकर्मोपदेशिन्यो विक्षिप्ताश्च। 378 ff. NM I 640.12–14: विरोधमात्रं त्वकिञ्चित्करम्, प्रमाणत्वाभिमतेषु वेदवाक्येष्वपि परस्परविरोधदर्शनात्। पुरुषशीर्षस्पर्शनसुराग्रहगवालम्भादिचोदनासु वचनान्तरविबुद्धमर्थजातमुपदिष्टमेव।; also NM I 643.10: अधिकारभेदाच्च विचित्रकर्मचोदना नानुपपन्ना।

---

**361** पञ्चरात्रे ] PāPu, पाञ्चरात्रे em. RT **361** °युङ्क्ते ] PāRT, °युक्ते Pu **363** वयमपि ] em. RT[pc], अयमपि PāPuRT[ac] **363** षड् वात्र ] em. Sanderson, षब्भा (?)त्र° Pā, षड्भा (?)त्र° Pu, षड्वात्र° RT **365** °शाखा° ] PāRT, °शाश्वा° Pu **374** °र्बहून्यपि ] PāRT, °र्बह्वन्यपि Pu **374** समावेशिताम् ] em. Kataoka, समावेदिताम् PāPu, समस्यात्मतां RT **375** ततस्य ] em. RT, तत्तस्य PāPu

इह हि नियता सौत्रामण्यां सुराग्रहचोदना
क्रतुभिरितरैः संसर्गं सा न हि प्रतिपद्यते॥ ७१॥
श्रुतिस्मृत्युदिता धर्माः पृथगाश्रमगोचराः।
अन्ये ऽपि प्रतिपद्यन्ते किं परस्परसंकरम्॥ ७२॥
साधारणं पुनरहिंसनसत्यवाद-
सन्तोषशौचदमदानदयादिधर्मम्।
तीर्थेषु नित्यमखिलेष्वपि वर्णयन्ति
सेयं श्रुतिस्मृतिसमन्वयतापि तेषाम्॥ ७३॥
यस्तु वेद इति ⟨च⟩ व्यपदेशः पञ्चरात्रवचनेषु जनानाम्।
सो ऽन्यगोचरतया, न च शक्यं वस्तु लोकवचनेन नियन्तुम्॥ ७४॥
किं वा सतासता वापि व्यपदेशेन, नन्वसौ।
आयुर्वेदधनुर्वेदप्रभृतिष्वपि दृश्यते॥ ७५॥
तच्छासनस्थे भगवत्प्रधान-
कर्मान्तरावाप्तविशेषसंज्ञे।
सामान्यतो ब्राह्मणशब्दमात्रं
ब्रूते परिव्राजकवच्च लोकः॥ ७६॥
न च जगति न प्रसिद्धा ब्राह्मणशब्दाभिधेयता तेषाम्।
व्यवहरति जनः कामं सामान्यविशेषसंज्ञाभिः॥ ७७॥
ब्राह्मणत्वादिजातौ च विवदन्ते विपश्चितः।
वदन्तः शब्दमात्रेण चातुर्वर्ण्यव्यवस्थितिम्॥ ७८॥

---

383 ff. NM I 641.8–9: एवं प्रधानयोस्तावदुपायोपेययोरविवादः। क्रिया तु विचित्रा प्रत्यागमं भवतु नाम। 387 ff. NM I 626.2–3: सर्वथा तु सोपपद एवायुर्वेदादिषु वेदशब्द इति न तत्तुल्यकक्ष्यता ऽधिक्षेपक्षेत्रतामथर्ववेदो नेतव्यः।

---

**379** सौत्रा° ] em. RT, सौप्रा° PāPu **379** सुरा° ] em. RT, पुरा° Pā, मुरा° Pu **381** °त्युदिता ] conj. Isaacson, °त्युचिता PāPuRT **383** पुनरहिंस° ] RT (em. ?), पुनरसिंह° PāPu **387** वेद ] em. RT, वेदन PāPu **387** ⟨च⟩ ] RT (em. ?), om. PāPu **388** सो ऽन्य° ] conj. Sanderson, सार्य° PāPu, सो ऽर्य° RT[ac] (em. ?), सो ऽर्थ° conj. RT[pc] **391** °नस्थे ] conj. Sanderson, °नस्थो PāPuRT **391** भगवत्प्र° ] PuRT, भगवन्प्र° Pā **392** °संज्ञे ] conj. Sanderson, °संज्ञा Pā, °संज्ञ। Pu, °संज्ञः em. RT **394** °वच्च ] conj., °वन्न PāPuRT **396** सामान्य° ] em. RT, कामान्य° PāPu **398** °र्ण्यव्यवस्थितिम् ] em. RT, °र्ण्यव्यवस्थितिः PāPu

गोत्वादिजातिवदियं प्रकटान्यथा वा
विप्रादिजातिरिति तत्त्वविचारणैषा।
अप्रस्तुता किमनयाखिलशास्त्रलोक-
सिद्धा स्थितिस्तु न कथञ्चन तर्कणीया॥ ७९॥

तदास्तामियं जातिसदसद्भावचिन्ता। प्रकृतमनुसरामः।

तेनानादय एव वेदवदिमे सर्वे भवन्त्वागमाः
कार्या एव हि वा न तेषु कलुषं वाच्यं वचो धार्मिकैः।
यच्चैषामपभाषणं कृशमपि स्याद् वेदनिन्दैव सा
प्रायश्चित्तिन एव ते हतधियो ये तेष्वसूयापराः॥ ८०॥

अथ वा पञ्चरात्रादिवाक्यानां वेदमूलता।
प्रामाण्यहेतुर्मन्वादिवचसामिव वर्ण्यताम्॥ ८१॥

कार्येण प्रतिनियतः स्वसिद्धिहेतु-
र्धूमेन ज्वलन इव प्रकल्पनीयः।
न ह्यर्थग्रहणमिदं विना स्मृतीना-
मुत्पादः क्वचिदवलोकितः श्रुतो वा॥ ८२॥

न लोभमोहौ न जनप्रतारणा

399 f. NM I 552.3–7, 10–11: एतेन ब्राह्मणत्वादिसामान्यमपि समर्थितं वेदितव्यम्, उपदेशसहायप्रत्यक्षगम्यत्वात्। न चोपदेशापेक्षणादप्रत्यक्षत्वं तस्य भवितुमर्हति, गोत्वादिप्रत्ययस्यापि सम्बन्धग्रहणकाले तदपेक्षत्वदर्शनात्। उक्तं च—'न हि यद् गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षम्' (TV ad MS 1.2.2) इति। (...) अपि च उपदेशनिरपेक्षमपि चक्षुः क्षत्रियादिविलक्षणां सौम्याकृतिं ब्राह्मणजातिमवगच्छतीत्येके।; also NM II 253.7–9: यथा हि ब्राह्मणत्वादिजातिरुपदेशसव्यपेक्षचक्षुरिन्द्रियग्राह्यापि न प्रत्यक्षगम्यतामपोज्झति। यथाह—'न हि यद् गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षम्' (TV ad MS 1.2.2) इति। 408 f. NM I 645.6–10: अपरे पुनर्वेदमूलत्वेन सर्वागमप्रामाण्यमभ्युपागमन्। यो हि मन्वादिदेशनानां वेदमूलतायां न्याय उक्तः, 'भ्रान्तेरनुभवाद्वापि पुंवाक्याद्विप्रलम्भनात्। दृष्टानुगुण्यसामर्थ्याच्चोदनैव लघीयसी॥' (cf. TV ad MS 1.3.2) इति स सर्वागमेषु समानः। 414 ff. NM I 635.9–13: तत्र शैवागमानां तावत् प्रामाण्यं ब्रूमहे, तदुपजनितायाः प्रतीतेः सन्देहबाधकारणकालुष्यकलापस्यानुपलम्भात्, ईश्वरकर्तृत्वस्य तत्रापि स्मृत्यनुमानाभ्यां सिद्धत्वात्, मूलान्तरस्य लोभमोहादेः कल्पयितुमशक्यत्वात्। न हि तत्रेदंप्रथमता स्मर्यते।

**399** गोत्वादि° ] em. RT, सौत्वादि° PāPu **403** प्रकृतमनुसरामः ] em. RT, प्रकृतिमनुसरां PāPu **404** °गमाः ] em. RT, °गमा PāPu **405** वचो ] PāRT, वाचा Pu **406** यच्चै° ] em. RT, यश्चै° PāPu **407** प्रायश्चित्तिन ] em. RT, प्रायश्चिंतिन PāPu **407** ये ] Pā$^{pc}$PuRT, येष्व् Pā$^{ac}$ **407** °पराः ] em. RT, °परा PāPu **409** °ण्यहेतुर्मन्वा° ] em. Isaacson, °ण्यहेतुमत्त्वा° PāPu, °ण्यं हेतुमद्वा° RT **411** °र्धूमेन ] em., धूमेन PāPu, °र्धूमेण RT (em. ?) **411** इव ] em., इति PāPuRT **414** °मोहौ ] em. RT, °मोहो PāPu **414** न जन° ] PuRT, जन Pā

न बीजशून्या नृवचःपरम्परा।
अबाधिते वस्तुनि याति मूलतां
न चेह बाधा कृतिभिः परिग्रहात्॥ ८३॥
अनादिवेदवादिभिर्न योगिबोधमूलता।
विषह्यते स्म, तद्गिरामथावशिष्यते श्रुतिः॥ ८४॥
नन्वत्र कर्तृसामान्यं न किञ्चिदुपलभ्यते।
न च तेन विना युक्तमनुमानमिह श्रुतेः॥ ८५॥

उच्यते,

प्रविभक्तकर्तृकतया कामं तुल्यप्रयोगता मा भूत्।
कार्यं त्वनुगुणकारणकल्पनयोग्यं भवत्येव॥ ८६॥

आह,

त्रैवर्णिकानामुपपद्यमानो
वेदान्वयः कल्पयितुं हि शक्यः।
कार्यं पुनः कारणमात्रमूलं
तज्जायतामत्र यतः कुतश्चित्॥ ८७॥

उच्यते,

धर्मे प्रमाणं श्रुतिरेव नान्य-
दित्येवमत्र श्रुतिमूलतोक्ता।
न कर्तृसामान्यबलेन, योगि-
प्रत्यक्षवादो ऽप्यत एव नेष्टः॥ ८८॥
तदिदं कर्तृसामान्यमस्तु मा वात्र सर्वथा।
कार्ये ऽस्ति धर्मरूपे ऽस्मिञ् छ्रुतेरेव हि मूलता॥ ८९॥
इहैषां सर्वेषां जिनकपिलबुद्धादिवचसां

---

420 f. NM I 645.12–14: ननु चोक्तम्, ‘अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्’ (MS 1.3.2) इति, तच्चेह नास्तीति कथं श्रुत्यनुमानम्? 422 ff. NM I 645.15–646.7: एकाधिकारावगमो न प्रामाण्ये प्रयोजकः। मिश्रानुष्ठानसिद्धौ तु कामं भवतु कारनम्॥ न च पृथगनुष्ठीयमानमपि कर्म न प्रमाणमूलं भवति वर्णाश्रमभेदानुष्ठेयकर्मवत्। कर्तृसामान्यशून्य-त्वादथ मूलान्तरोदयः। तदसत्, बाधकाभावाद् भ्रान्त्यादिप्रतिषेधनात्॥ प्रत्यक्षमूलतायां तु गुर्वी भवति कल्पना। वेदस्त्वनन्तशाखत्वाद् मूलं तत्र सुसंगतम्॥

---

**419** °मथाव° ] em. RT, °मव° PāPu **421** श्रुतेः ] em. Isaacson, श्रुतिः PāPuRT **428** पुनः ] conj. Isaacson, पुरः PāPuRT **428** °मात्रमूलं ] conj. Isaacson, °मत्र मूलं PāPuRT **429** यतः ] em. RT, व्यतः Pā, च्यतः Pu **433** °बलेन ] PuRT, °बले। न Pā **436** ऽस्ति ] em. RT, ऽस्मि PāPu **436** छ्रुतेरेव ] em. RT, छ्रुतेव Pā, छ्रुते एव Pu

न योगिप्रत्यक्षं श्रुतिरपि न मूलं यदि भवेत्।
कथं स्याद् व्यामोहादनवधिरनेकार्यविदितः
प्ररोहो, नन्वेषां क्वचिदपि च संवादबहुलः॥ ९०॥
व्यामोहाच्च हि वर्तन्ते कामं कतिपयैर्दिनैः।
सो ऽयं युगपदस्थायी व्यामोह इति विस्मयः॥ ९१॥
पुरापि सौगता आसन्निति केनावगम्यते।
पुरापि श्रोत्रिया आसन्निति केनावगम्यते॥ ९२॥
लोभादि दृश्यमानं वा यदि मूलमिहोच्यते।
वेदो ऽपि जीविकोपाय इति जल्पन्ति नास्तिकाः॥ ९३॥
महाजनपरिग्रहाद् यदि पुनः श्रुतौ वार्यते
बृहस्पतिमताश्रितप्रलपितो ऽपवादक्रमः।
स वारयितुमागमान्तरवचःसु शक्यस्तथा
कृतः किल परिग्रहः कुशलधीभिरेषामपि॥ ९४॥
यावांश्च कश्चन न्यायो वेदप्रामाण्यसिद्धये।
भवद्भिर्वर्ण्यते, सो ऽयं तुल्यस्तीर्थान्तरेष्वपि॥ ९५॥
न कदाचिदनीदृशं जगत्
कथितं तत्रभवद्भिरेव यत्।
इतरैरपि तत् तथोच्यते
सततं ते ऽपि बभूवुरागमाः॥ ९६॥
कृतमतिवाचालतया, द्वेष्या बहुभाषिणो भवन्ति जनाः।
तदिदमुपसंहरामो रसनायाश्चापलं विपुलम्॥ ९७॥

---

441 NM I 648.11–12: अहमप्यद्य यत्किञ्चिदागमं रचयामि चेत्॥ तस्यापि हि प्रमाणत्वं दिनैः कतिपयैर्भवेत्। 447 ff. cf. NM I.637.18–638.3: महाजनश्च वेदानां वेदार्थानुगामिनां च पुराणधर्मशास्त्राणां वेदाविरोधिनां च केषांचिदागमानां प्रामाण्यमनुमन्यते, न वेदविरुद्धानां बौद्धाद्यागमानामिति कुतस्तेषामाप्तप्रणीतत्वम्? मूलान्तरं हि तत्र सुवचमज्ञानलोभादीत्येवमभिधाय वेदस्पर्धिनो बौद्धादयो निषेद्धव्याः।; also NM I.644.14–645.2: ननु वेदसमानकर्तृकेष्वागमान्तरेषु कथं तादृशो महाजनसंप्रत्ययो नास्ति? एवं नास्ति। तेन वर्त्मना भगवता कतिपये प्राणिनो ऽनुगृहीताः, येषां तादृश आशयो लक्षितः। वैदिकेन तु वर्त्मना निस्संख्याकाः प्राणिनो ऽनुगृहीता इति तत्र महानादरः, आगमान्तरेषु कृश इति। 453 f. NM I 491.13–14: न कदाचिदनीदृशं जगत् कथितं नीतिरहस्यवेदिभिः॥

---

**439** °दनवधि° ] em. RT, °दनविधि° PāPu **440** प्ररोहो ] PāRT, प्ररोहा Pu **446** ऽपि ] em., हि em. RT, प PāPu **448** °प्रलपितो ] PāRT, °प्रलपितौ Pu **456** बभूवुरा° ] conj. Isaacson, रघूदना° PāPu, बहूत्तमा° em. RT **458** रसनाया° em. RT, रसना° Pā, स्मना° Pu

सत्यंवदाप्तपुरुषोक्ततया प्रमाणं
तीर्थानि वेदवदनादितया स्वतो वा।
आम्नायसंमिततया मनुवाक्यवद् वा
सर्वं प्रमाणमिति नीतिविदो वदन्ति॥ ९८॥

आह,

ननु चैवमतिप्रसङ्गदोषा-
दतिमात्रं भुवि विप्लवेत धर्मः।
क्व नु नाम न शक्यमेतदित्थं
गदितुं यादृशतादृशे ऽपि वाक्ये॥ ९९॥

उक्तमत्र,

अविच्छिन्ना येषां वहति सरणिः सर्वविदिता
न यत्रार्यो लोकः परिचयकथालापविमुखः।
यदिष्टानुष्ठानं न खलु जनबाह्यं न सभयं
न रूपं येषां च स्फुरति नवमभ्युत्थितमिव॥ १००॥

प्रमत्तगीतत्वमलौकिकत्व-
माभाति लोभादि न यत्र मूलम्।
तथाविधानामयमागमानां
प्रामाण्यमार्गो न तु यत्र तत्र॥ १०१॥

आप्तोक्तत्वमनादित्वमथवाम्नायमूलताम्।
तत्रैव शक्नुमो वक्तुं न पुनर्यत्र कुत्रचित्॥ १०२॥

---

464 ff. NM I 648.10–13: सर्वागमप्रमाणत्वे नन्वेवमुपपादिते। अहमप्यद्य यत्किञ्चिदागमं रचयामि चेत्॥ तस्यापि हि प्रमाणत्वं दिनैः कतिपयैर्भवेत्। तस्मिन्नपि न पूर्वोक्तन्यायो भवति दुर्वचः॥ 473 ff. NM I 648.17-649.2: नैतदस्त्यविगीतां ये प्रसिद्धिं प्रापुरागमाः। कृतश्च बहुभिर्येषां शिष्टैरिह परिग्रहः॥ अद्य प्रवर्तमानाश्च नापूर्वा इव भान्ति ये। येषां न मूलं लोभादि येभ्यो नोद्विजते जनः॥ तेषामेव प्रमाणत्वमागमानामिहेष्यते। न मृष्यते तु यत्किञ्चित् प्रमाणं कुट्टनीमतम्॥

---

**459** सत्यंवदा° ] PāPu, सत्यं तदा° em. RT **461** संमिततया ] conj. RT, संबद्धतया PāPu **465** भुवि वि° ] PāRT, भुवि° Pu **466** नाम न ] em. RT, मामनु PāPu **469** अविच्छिन्ना ] RT (em. ?), अवच्छिन्ना PāPu **469** सरणिः ] em. RT, सरिणः PāPu **470** °लाप° ] RT (em. ?), °लाभ° PāPu **471** यदिष्टानु° ] em. RT, यदष्टानु° Pā, यदृष्टानु° Pu **473** °गीत° ] em. Sanderson, °गीति° PāPuRT **473** f. °मलौकिकत्वमाभाति ] em., °मलौकिकत्वं लाभादि em. RT, °मवलोकिकत्वमाभादि PāPu **477** आप्तोक्त° ] PuRT, आप्तोकृ° Pā **478** शक्नुमो ] RT (em. ?), शक्नुमे PāPu

आदिश्यते किमपि कुत्सितमेव कार्यं
येषु त्वगम्यगमनाशुचिभक्षणादि।
प्रामाण्यवर्णनमिदं तु तथाविधानां
एते तु वादिवृषभा न सहन्त एव॥ १०३॥

॥ इत्युक्त्वा क्षणं च तूर्ष्णीं स्थित्वा सङ्कर्षणं प्रति॥

आर्य, यथाप्रतिभानमेतावदभिहितमस्माभिः। तदिदानीं यथासन्निहितं पृच्छ्यन्तामत्रभवन्तो वादिनः, अपि हृतं हृदयमेषामस्मद्वचसा न वेति।

॥ सङ्क॰। सहर्षम्॥

आर्य धैर्यराशे, वयं तावदुच्छ्वासिता इव, शालिता इव, पवित्रीकृता इवाप्यायिता इव जीवलोकफलमनुभाविता इव भवत्प्रभवयाभिनवया सरस्वत्या। अहो आश्चर्यम्!

सूक्ष्मा दृष्टिरहो अहो गतिरियं वाचामहो कौशलं
शास्त्रेष्वेतदहो मनः परिहृतं दोषैरसूयादिभिः।
को ऽसौ वास्ति गुणो न यो ऽत्र परमां काष्ठां गतो वर्तते
लोको ऽनारतमाह साहटसमः सत्यं न जातो नरः॥ १०४॥

एते ऽपि महाविद्वांसः सहृदया एव, कथं नावर्जिता आर्येण? अप्येनान् पृच्छामि।

॥ वाद्यभिमुखं स्थित्वा॥

भो भवन्तो महाविद्वांसः, अपि भवतामावर्जितं धैर्यराशिवचसा हृदयम्?

॥ वादिनः॥

आर्य, इयं तावदमानुषी।

---

479 ff. NM I 638.16–18: ये ऽप्यन्ये केचिदशुचिभक्षणागम्यागमनादिनिर्विकल्पदीक्षाप्रकारमकार्यमनुतिष्ठन्ति ते ऽपि चातुर्वर्ण्यमहाजनभीताः तत् कर्म रहसि कुर्वन्ति न प्रकाशम्।

---

**479** f. कार्यं येषु ] conj. Kataoka, येषु PāPu, येषु येषु em. RT **480** ॰शुचि॰ ] RT (em. ?), ॰शुवि॰ PāPu **482** सहन्त ] RT (em. ?), महन्त PāPu **483** च ] PāPu, om. RT **484** ॰मेतावद॰ ] em. RT, ॰वेतावद॰ PāPu **485** पृच्छ्य॰ ] em. RT$^{pc}$, पृच्छ॰ PāPuRT$^{ac}$ **485** हृदयमे॰ ] RT (em. ?), हृतमे॰ PāPu **486** सङ्क॰ ] PāPu, स्नात॰ RT (em. ?) **488** इवाप्यायिता इव ] conj., इवाप्यायिता em. RT, इवप्यातिता Pā, इव। प्यायिता Pu **488** ॰भिनवया ] PāRT, ॰भिनवयाभिनवया Pu **490** वाचामहो ] PuRT, वाचामहा Pā **492** वास्ति गुणो न यो ऽत्र ] conj., नास्ति न यो ऽत्र PāPu, वास्ति नयो न यो ऽत्र conj. RT **492** परमां ] RT (em. ?), परमा PāPu **493** ऽनारतमाह साहटसमः ] em. RT, नाहतमाह साहटसमं PāPu **494** एते ] PuRT, एति Pā **497** भवतामावर्जितं ] em. RT, भवतावर्जित PāPu **497** ॰वचसा ] RT (em. ?), ॰वचसां PāPu **498** वादिनः ] RT (em. ?), वो Pā, वोदि Pu **499** तावदमानुषी ] conj. RT, तावमानुषा PāPu

⟨॥ सङ्क° ॥ ⟩

आभिः पुनरपरिमितनीतिधारावर्षिणीभिरसदृशगतिभिरपगतमात्सर्याभिरार्य-धैर्यराशिवाग्भिर्ब्रह्मर्षिकल्पनिर्मलमनसः सर्वत्र भवन्तो वर्तन्ते। तथापि पुनः पुनरिदमवबोध्यन्ते भवन्तः। द्वयमिदमवश्यरक्षणीयमार्यैः।

॥ वादि° ॥

किमिव?

॥ सङ्क° ॥

एतानि किल परस्परमसंकीर्णानि पृथक्प्रस्थानानि यथावस्थानि तीर्थानि। त-देषामितरेतरसंकरपरिहारे सततमवहितैर्भवितव्यमार्यैः।

॥ वादि° ॥

आर्य, यावानिह स्वे स्वे शासने समाम्नातः कश्चिदहिंसादिः साधारणो मान-वो धर्मः, तत्र किमुच्यते? तदतिरिक्तं तु नियतोपदिष्टविशिष्टक्रियाकाण्डसंकरं स्वशास्त्रकथितप्रत्यवायभयात् परिहराम इत्येकं तावत् स्थितम्। अथ द्वितीयं किम्?

॥ सङ्क° ॥

भवदीयं नाम मुखे दत्त्वा दुराचारतया ये विप्लावयन्ति शास्त्रं धर्मं च, तेषां स्वाश्रमेष्ववकाशो न देयः।

॥ वादि° ॥

एतदपि सत्यमनुष्ठीयते। किं त्वयमर्थो नास्मदधीनः। आर्येण राजनियुक्तैश्च निर्वाह्यो ऽयम्।

॥ सङ्क° ॥

एवमेतद्। गृहीतक्षण एवात्र देवो वर्णाश्रममर्यादाचार्यः। भवद्भिरपि तथाविधे-षूदासितव्यम्। न तेषां दयितव्यम्।

---

**500** ⟨सङ्क°⟩ ] em., ⟨स्नात°⟩ em. RT, om. PāPu **501** °गति° ] conj. Sanderson, °म-ति° PāPuRT **502** ब्रह्मर्षिकल्प° ] conj. RT, ब्रह्मातिकल्प° PāPu **506** सङ्क° ] PāPu, स्नात° RT (em. ?) **507** परस्परमसंकीर्णानि ] em. RT$^{pc}$, परस्परसंकीर्णानि PāPuRT$^{ac}$ **507** यथावस्थानि ] PuRT, यथाचस्थानि Pā **508** °संकर° ] PuRT, °सकर° Pā **510** यावानिह ] RT (em. ?), यावानेह PāPu **510** °हिंसादिः ] RT (em. ?), °हिंसादि PāPu **510** साधारणो ] em. RT, साधारो PāPu **511** मानवो ] conj., मानसो PāPuRT **512** द्वि-तीयं ] RT (em. ?), द्वितीय PāPu **514** सङ्क° ] PāPu, स्नात° RT (em. ?) **515** भव-दीयं ] Pā$^{pc}$PuRT, भवदीयं मुखे Pā$^{ac}$ **516** °ष्ववकाशो ] em. RT, °ष्वावकाशो PāPu **516** देयः ] PuRT, देया Pā **518** °नियुक्तैश्च ] PāRT, °नियुक्तौश्च Pu **519** ऽयम् ] em. RT, यत् PāPu **520** सङ्क° ] PāPu, स्नात° RT (em. ?) **521** वर्णाश्रम° ] PāRT, वर्णाश्रमधर्म° Pu **522** °विधेषू° ] Pu$^{pc}$RT, °विधेष्व° PāPu$^{ac}$

॥ वादि॰ ॥

यथार्य आह।

॥ सङ्क॰ ॥

तदिदानीमुत्थाय यथायथं गम्यताम्। आश्रमेषु च स्वेषु स्वेषु यथाव्यवस्थमास्यताम्। आर्य धैर्यराशे, तदेहि वयमपीदानीं यथावृत्तं स्वामिने निवेदयामः।

॥ इति निष्क्रान्ताः सर्वे॥

॥ चतुर्थो ऽङ्कः॥

**525** **सङ्क॰** ] PāPu, **स्नात॰** RT (em. ?) **527** **यथाव्यवस्थमा॰** ] em. RT, **यथाव्यवस्थामा॰** PāPu **529** **चतुर्थो ऽङ्कः** ] Pā, **चतुर्थोङ्कः समाप्तम्** Pu **529** Colophons: **शुभं भवतु॥ जिनशासनस्य कल्याणं भूयात्॥ ⊘ ⊘॥ मंगलंमस्तु॥ ⊘** Pā, **सपूर्ण॥ श्री॥** Pu